र्णीति अयइव कर्णौ यस्या नासिकोदरौष्ठेत्यादिना ङीप् अधः शिरसी पदयोरिति सूत्रेतत्षष्ठ्याः स्थाने प्र
थमाबोध्या अदस्पदमिति मयूरव्यंसकादित्वात्समासः शिरःपदस्येमिति षष्ठीसमासइति विसर्गसं
धिः समसज्जुषोरुः पदस्येत्यनुवृत्ते समसज्जूभ्यां विशेष्यते विशेषणेनतदंतविधिः नचसज्जुः शब्दग्रहणेन गृ
ह्यतांनाप्रातिपदिकेन तदंतविधिर्नास्तीति निषेधः शंक्यः तस्य प्रत्ययविधिविषयत्वात् तेनसज्जुष्
शब्दान्तंचयत्पदंतस्य रुः स्यात् सचालोन्त्यस्य पूर्वोस्थितेफलितमाह पदान्तस्येति सज्जुष् शब्दस्येति तदं
तस्य पदस्येत्यर्थः तेन सज्जुषइत्यादौ नातिप्रसंगः नचसज्जूरित्यत्र [illegible] व्याप्तिः व्यपदेशिवद्भावोप्रातिपदि
केनेति निषेधादिति वाच्यं येनविधिरिति सूत्रेभाष्यकौस्तुभे तस्य प्रत्याख्यातत्वात् व्यपदेशिवद्भावोप्रातिप
दिकेनेति ग्रहणवतेति च परिभाषाद्वयमपि प्रत्ययविधिविषयकमिति दिवउत्सूत्रे कैयटहरदत्ताभ्यामु
क्तत्वाच्च एवंचपरम सज्जूभ्यामित्यादावपि निर्बाधम् पदांस्थितेइह सज्जुष शब्दे तदंतविधिर्नेति प्राचामु
क्तिरपास्ता इत्यवधेयं भोभगोअघो संधिः सौत्र इति भगोअघोशब्दयोरोकारस्याकारस्यचदृर्वद्भसंसौत्रत्वा
न्नेत्यर्थः यदितु भोस् भगोस् अघोस् इति सान्तनिपातेन वानुकृत्य भोइत्यादीनां त्रयाणां सलोपस्य यः स्यादस्य
र्वस्य रोरुक्तेति व्याख्यायते तर्हि संधिर्न्याय्य एव यत्नं चैनन्त अन्यथा विभोरिदं सप्रभागोयस्य सप्रभगुस्त

एवं रुत्वोरिदं इत्यत्रापि यत्वापत्तेः भवति हि यत्वं भोशब्दादि सर्वोऽहः न चात्र भोशब्दादेर्लाक्षणिकत्वादग्र
हणं विभाषाभवद्भगवदघवतामोच्चावस्येति वार्तिकेन निष्पन्नानां भवदादिप्रकृतिकानां भोशब्दादीना
मपि लाक्षणिकत्वाविशेषात् अनर्थकत्वमप्युभयत्र तुल्यं हविशिष्टानामेवार्थवत्त्वात् तत्र एकारस्या
नुबंधत्वाद्धेकमात्रे विसर्गस्य स्थानित्वं तथा चानल्विधाविति स्थानिवद्भावो न स्यादित्याशंक्याह तस्ययाम
ति यथा अग्रहीदित्यत्र ग्रहोऽलिटि दीर्घं स्थानिवद्भावेने[illegible] दिटईटीति प्रवर्तते एवमिहापि विसर्गस्य रुत्वा
यत्वं प्रवर्तत इति भावः तथा च स्थानिवत्त्वे भाष्यं विशिष्टं ग्रेणोनल्माश्रयते इत्थं नामेति इतोपि हेतो
र्लिंगेत्यादि परिगणनमस्मुद्रमित्यवधेयं निपाता इति भो भगो इति सूत्रे निर्दिष्टाः स्वादेराकृतिगणत्वा
त्तत्रबोध्याः तथा च विभाषाभवद्भगवदित्यादि वार्तिकं नाश्रयणीयं अन्यथा पुंलिंगैकवचनमात्रे भो
हरे इत्यादि प्रसिद्धावपि भो हरिहरौ भो विद्वद्वृन्द भो गंगे इत्यादि न सिद्ध्येत् इति भावः एतच्च वृत्तिकारहरद
त्तादीनां मतेनोक्तम् भाष्यस्वरसस्त्वना विभाषेत्यादि वार्तिकमारभ्यमेव किंतु निपातोपि [illegible] भोःशब्दोऽस्ति
तेन द्विवचनादौ स्त्रीनपुंसकयोश्च नोक्तदोषः एतेन तं चैनत् हे भवन्निति वक्तं हे भो इति प्रयोगस्यापीष्ट
त्वात् तस्य च वार्तिकारंभ एव सिद्धेः स्युः प्याट् प्याड् अंग हे है भोः इत्यमरोक्तानां संबोधनार्थानां निपाता
नां सह प्रयोगायोगात् किंच अत्र भवान्हरिः तत्रभवान् ततो भवानिति वक्तं तत्र भो इत्याद्यपि वार्तिकेन
त्येव सिद्ध्यति इतराभ्योपि दृश्यंते इति सर्वविभक्त्यंतेनात् तत्र भोर्भवदादियोगप्रवेशत्वात् किंचामंत्रितत्वे

२४

हा ४

म० १० ११

स्त्र

पदान्यस्याष्टमिकोनिघातः आमंत्रितेसर्वमित्य विद्यमानवद्भावः आमपक्वोनरामितिविधिःवाक्यादेरामंत्रित
स्येतिद्विर्भावः स्त्वामंत्रितेइतिपरांगवद्भावस्येत्यादिसर्वमिथ्यातिनत्वन्यथेतिदिक् भगोअघोनिपातावपिय स्ति
दिप्रामाणिकोनर्हिस्तानाम आमंत्रितकार्यसिद्धिर्वार्तिकायत्नैवेतिसुधीभिराकलनीयम् यत्नुवदंतिस
कारांतानेवैतान्निपातानास्थायहल्वोत्वेभाष्येप्रत्याख्यानेइतितदतिरभसात् स्यादेतत् निपा नामभ्यु ता
पगमेयत्वविधौनेपवस्स्येवत् प्रतिपदोक्तत्वात् नत्वसंबुद्धः लाक्षणिकत्वादितिचेन्नैवंस्वरितेनाधिकार ध्य
इत्यत्राधिकःकारोधिकारइतिव्याख्यानमाश्रित्यलक्ष्यानुरोधेन स्वरितत्वमाश्रित्योभयग्रहणात् भु
वस्महाव्याहृतिरिहत्रे महाव्याहृतिग्रहणंलक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वज्ञापनार्थमि
तिहरदत्ताद्युक्तेस्तुनचैवमपिप्रभोरित्यादावनित्याभिः परस्परसाहचर्येणनिपातानांवार्तिकोक्ता
नांचग्रहणेप्यन्येषामग्रहणात् व्योर्लघुः लघुप्रयत्नतरोलघूच्चारणतरः सचोनरतस्याइस्यवः
यस्य यः इत्याह वयाविति ओतोगार्ग्यस्य ओकारादिति यत्वोकारांतादंगादितिप्राचांव्याख्यानंतन्न अं
गस्या प्रकृतत्वात् असंभवाच्चनह्युदाहरणेष्वोकारांतमंगमस्ति हलिसर्वेषां यकारस्येति वकारस्त
नानुवर्तते भोभगोअघोपूर्वस्यासंभवात् अपूर्वस्त्वयद्यपिसंभवति वृक्षव् करोति इतितथापि न
वलोपप्रसंगः अपीत्यनुवर्त्य अश्हलोविशेषणात् वृक्षव् दसतीत्यादित्वेनाभिधानात् असाधुत्वा
त्: गव्यमि त्यत्रअपदांतत्वेनाक्तिग्यातिविध्यत्रवकारप्रश्लेषान्नलोपस्त्वकंनतुदेवानैस्यादित्यादौलोपोर

म

ओं० ११

19

ओरित्येव सिद्धमेवं तं प्रति यत्वस्यासिद्धत्वात् ऊढवायांती यत्र बलयत्वाभावाच्च ग्रहोरत्व इति णत्वाकाङ्क्षा
ह्राः पुंसीति पुंस्त्वे ग्रहरादीनामित्युभयत्राप्यादिशब्दः प्रकारवेनेनस्वर्चद्वारयितः मन्यमुष्मः विप्रःका
विःकाक्षेनात्वर्चनाइत्यादि ग्राह्यं लूढोहूढ इति उदित्त्वेनवेड्कत्वाघस्यविभाषेतिनिष्ठायां नेट् ढत्व
धत्वष्टुत्वढलोपाः यत्तु प्राचा प्रसङ्गादाह लूढ इति तन्न तत्र ढलोपस्यैवाभावात् तथाहि हढः स्थूल
बलयोरिति सूत्रेण हंहे नकार हकारयोर्लोपः लकारस्य ढत्वं च निपात्यते नत्वसिद्धकाण्डस्थढत्वस्य
प्रवृत्तिः दादेर्धातोर्घ इति घत्वेन बाधात् न चैवं भावो ढत्वं च निपात्यतां धत्वष्टुत्वढलोपास्तु भविष्यन्त्ये
वेति वाच्यं तथा सति परिवृढ्योत्यत्रापि लक्षणं पूर्वादिति णत्वयादेशो न स्यात् पारिवृढीकन्याइत्य
त्रचा [illegible] जोरिति निष्ठ्युङ् स्यात् ढलोपस्यासिद्धत्वेन गत्त्वपोन्नमत्वादिति भाष्ये स्थितम् यत्तु प्राचा व्याख्या
तं हंहे वेदं निपातनं हहवृद्धाविति प्रकृत्यन्तरं तस्यानिष्ठायामागमशास्त्रस्यानित्यत्वादिड्भावे वा
हेत्यत्र वेति योगविभागात् वेत्वाभावे ढलोपे च प्रसङ्गादाह वर्णमिदं द्रष्टव्यमिति तत्र उभयोरपि निपा
तनाभ्युपगमात् तदाह वामनः अथ हंहिः प्रकृत्यन्तरमस्ति तस्याप्येतन्निपातनं नलोपवर्जमिति यु
क्तं चैतत् तथाहि अस्मात् णत्वयादेशो न स्यात् ष्युङ् च स्यात् उत्वमेवेति सिद्धासिद्धयोस्तुल्यबल
त्वेन विप्रतिषेधे परमित्यस्या प्रवृत्तौ निष्ठान्तिपतत्वाद्धत्वमेव भवतीत्यर्थः तदुक्तं पूर्वत्रासिद्धे नास्ति
विप्रतिषेधोभावाद्धत्वस्येति पतेनाविभक्तिकार्यं प्राक् पश्चाद्धत्वमन्वेइत्यादि व्याख्यातं सूत्रे सूत्र इति एष

म०
र०
२०

पृथक्पदं लुप्तषष्ठीकमित्याह एतत्तदोरर्थः स्यादिति एतत्तदर्थगतसंख्याभिधायीयः स्यत्तस्येत्यर्थः एतत्तदोर्वि
हितइतिव्याख्यानेन परमसददाति परमैषददातीत्यादौ न स्यात् अर्थग्राहकसंबंधाश्रयणे लिंगत्वनञ्समा
सइतिबोध्यं अकोः किमिति साकाङ्क्षयोः शाहृतत्वादप्रसंगइतिप्रश्नः एषकइति अकोरिति प्रतिषेध
एव तन्मध्यपतितस्तद्ग्रहणेन गृह्यतेइतिपरिभाषां ज्ञापयतीतिभावः बहुलग्रहणेति अतएवलोपंवि
नापादस्पूरणेपिक्वचिद्भवति सास्माअरंतमः असौइतिच्छेदः इतित्वादिसंधिः अर्थवद्धातोः प्रत्ययप्र
त्ययांतं चेतिसूत्रे तं आदिनाउभयंविवादितामितिभावः तथाहिप्रत्ययस्यैवपर्युदासेकृत्तद्धितेतिसूत्रेणत
द्धितांतस्यसंज्ञाविधानंव्यर्थंस्यात् नचतत्रापितदंतेन ग्राह्यमितिवाच्यं अर्थवदित्यनुवृत्तिसामर्थ्यात्तदंत
ग्रहणात् प्रशंसायांहिमतम् एकार्थीभावेनलौकिकेप्रयोगेप्रसिद्धत्वंचप्रशंसाहूलेन वार्थवदित्यस्य
पूर्वसूत्रेचरितार्थता धातुप्रत्ययपर्युदासेनैवतल्लाभात् तस्मात्प्रत्ययांतं चवर्जयित्वेत्युचितमेवयदितु
प्रत्ययो न पर्युदस्येत तर्हिसात्पदाद्योरितिसूत्रे सातिग्रहणंव्यर्थंस्यात् अर्थवदितिकिं धनंवनमित्या
दौ प्रतिवर्णंसंज्ञामाभूत् तस्योच सत्योस्त्वादयः स्युः नत्रसंख्याकर्मादेरभावान्नभविष्यतीतिचेन्न एकव
चनमुत्सर्गतः करिष्यतइतिसिद्धांतात् ङ्यप्ङ्यादिभ्यइव सोर्दुर्वारत्वात् नचार्थवद्ग्रहणपरिभाषयाना
र्थकेनस्यादिति वाच्यं तस्याविशिष्टरूपोपादानाविषयत्वात् अथातुरित्यादि पर्युदासबलेनयद्यप्या
र्थवत्त्वंलभ्यते तथाप्युत्तरार्थंतदित्युक्तं एतच्चहन्तमित्युक्तं नमितिसूत्रेभाष्येध्वनितं यच्चाङः पर्युदासोना

गं०
२०
20

र्थवत्त्वं गमयति अनर्थकयोरपि धातुप्रत्यययोर्दर्शनात् अधीते याचक इति अधिपूर्वस्येङः प्रयोगाद्धि
शिष्टप्रवार्थवान् तत्र केवलः इङ् अध्ययने इत्याद्यर्थनिर्देशात्समुदाये समुदायार्थारोपात् एवं कृत्स्नप्य
नर्थकः यावत्साहाय्यादपि तदर्थप्रतीतेः शेषयेत्सु विभक्तावप्रथमायाम् अकर्तरि च कारके इति विभक्ति
कारकग्रहणाभ्यां नञ्विवक्षा न्यायस्यानित्यत्वकल्पना चेति अत्रेदं वक्तव्यं धातुरनर्थक इति तावत्
द्व्याहतं क्रियावाचकत्वं विना धातुत्वायोगात् आरोपितं तदिति चेत् सत्यं नावत्तैवेष्टसिद्धेः प्रकृतिप्र
त्ययविभागस्तत्तदर्थविभागश्च सर्वः काल्पनिक एव परमार्थेन स्फोटस्यैवार्थवानिति सिद्धान्तात् उक्तं च
हरिणा उपायाः शिक्ष्यमाणानां बालानामुपलालनाः असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते इति
कथमन्यथा इङः द्विवचनमाडादयश्च स्युः तथा च प्रत्याहाराह्निके अर्थवन्तो वर्णा इति पक्षे अधी
ते इत्यत्रेकारोऽर्थवानिति भाष्ये स्पष्टमेवोक्तं एवं कृत्प्रत्यययोरप्यर्थवत्त्वेन स्वार्थिकानां प्रकृत्यर्थेनैवार्थ
वत्त्वात् कल्पनामात्रमिदमिति चेत् उक्तोत्तरत्वात् नैषा कल्पना शास्त्रकृत्सम्मतेति चेन्न द्वितीयतृती
यचतुर्थतुर्याणीति सूत्रे पूरणतयार्थे प्रत्ययस्य पूरणान्तताया भाष्यकारैरेवोक्तत्वात् प्रत्यय इति म
हासंज्ञां कुर्वतः सूत्रकृतोऽपि सम्मतमेवेदं यदप्यो [illegible] ष्ठ्येत्यादि तदपि न अनित्यत्वेऽप्यौत्सर्गिकप्रवृत्त्ये
ष्टसिद्धेः इष्टस्थले प्रवृत्तौ न्यायस्य निर्विषयत्वापाताच्च अनित्यत्वज्ञापनस्य कथंचिदावश्यकत्वेऽप्येव
ङ्ग्रहणस्यैव ज्ञापकत्वसम्भवाच्च उत्तरस्यापीह किंचिद्योऽनिति न्यायेनोहकरणस्य सफलत्वौचित्यात् ङो

घेयेऽस्त्यादौ विभक्तिकारकयोर्ग्रहणयोरेवेदं सति प्रत्याख्यानसम्भवाच्चेतिदिक्। अर्थवदिति किं ग्रहन् न
लोपो माभूत् न च कार्यकालपक्षे प्रत्ययान्तत्वेन पर्युदासोऽस्त्विति वाच्यं प्रत्ययलक्षणेनोक्तपर्युदासाप्रवृत्तेः
नङिःसंबुद्ध्योरिति निषेधेन ज्ञापितत्वात् कथमन्यथा राजेत्यादौ नलोपः स्यात् अप्रत्ययः किं हरिषु करो
षि अत्र षत्वमिसिपोर्माभूत् अप्रत्ययान्तः किं तत्रैव विभक्तिविशिष्टयोर्माभूत् न चान्तवद्भावेन कांडे कुड्ये इत्या
दौ प्रातिपदिकत्वं स्यादेव तथा च ह्रस्वो नपुंसक इति ह्रस्वत्वं स्यात् [illegible] स्यादिति वाच्यं कार्यकालपक्षे
ऽपि सिद्धेः यथोद्देशपक्षेऽपि विभक्त्येकदेशेनान्तवत्त्वात् सप्तम्यधिकरणे चेत्यादिनिर्देशात् ह्रस्वो नपुंसके इति
सूत्रे प्रातिपदिकग्रहणं वोक्तार्थसामान्यापेक्षं [illegible] ज्ञापकमस्त्वयन्तवदिति प्रत्ययपर्युदासो न कर्तव्यः
प्रत्ययान्तपर्युदासेनैव गतार्थत्वात् व्यपदेशिवद्भावेन तस्यापि प्रत्ययान्तत्वात् तत्र प्रत्ययग्रहणे यस्मा
त्स विहितस्तदादेर्ग्रहणात् केवलस्य चानर्थकत्वात् अन्यथा त्वइक इत्यादौ सिद्धे ज्ञापितं दूनत्वात् पदत्वं
स्यात् तथा च हरिषु करोषीत्यादौ षत्वं न स्यात् सात्पदाद्योरिति निषेधात् अर्थवत्प्रत्ययाविति सिद्धे नि
त्य् द्वयोपादानं स्पष्टार्थम् महासंज्ञाकरणं अन्वर्थरोधात् तथा चार्थवत्त्वोपपद्यते कोऽर्थवान्ः किं प्राति
पदिकं कः प्रत्यय इति डित्थादीन्यव्युत्पन्नानि इहोदाहरणम् अव्युत्पन्नपक्षस्य चेदमेव ज्ञापकमिति
प्राचः यत्तु व्युत्पन्नपक्षेऽपि निपातार्थमत्र करणार्थं चेदमिति हरदत्तेनोक्तम् तच्चिन्त्यं तत्रापि प्रकृतिप्र
त्ययादिकल्पनासम्भवात् वस्तुतस्तु व्युत्पन्नपक्षेऽपि बहुपठवदित्याद्यर्थं सूत्रं न चैवं बहुच्पूर्वस्येत्येव सू

अनामिति वाच्यं मूलकेनोपदंशमित्यादौ कृदंतत्वेनातिप्रसंगात् न च समासग्रहणं नियमार्थमिति
तिलादः अर्थवत्सूत्रारंभं विना समासग्रहणस्य नियमार्थत्वायोगात् इति दिक् कृत्तद्धितसमासाश्च ॥
अर्थवदित्यनुवर्तते तत्सामर्थ्यात्तदन्तविधिः नहि जहत्स्वार्थायां वृत्तौ कृत्तो तद्धितानां वार्थोस्ति भू
तस्सर्वगतिलभ्यस्तत्र प्रमाणतः अजहत्स्वार्थायामपि न प्रत्ययमात्रेणार्थपर्यवसानं इत्यभिप्रेत्याह कृ
त्तद्धिताविति लिङ् फक्कत्यादौ अधातुरिति कर्तेत्यादौ अप्रत्ययान्तमिति पर्युदासे प्राप्ते कृदंते वि
धिरयं नियमार्थमिति न च प्रत्ययान्तत्वेन पर्युदासे प्राप्ते विध्यर्थं मास्त्विति शंक्यं वाक्यस्याप्रत्ययान्त-
त्वात् प्रत्ययग्रहणे यस्मात्स विहितस्तदादेरेव ग्रहणात् न च स्त्रीप्रत्ययेन तदादिनियमो निषिद्धः एवं
राजकुमारीत्यादौ विध्यर्थं मास्त्विति चेन्मैवं अंतरंगस्यापि हल्ङ्यादिलोपस्य लुग्विषये प्रवृत्त्या सूय
माणप्रवृत्त्यपि समासप्रवृत्तेः न च चाप्रत्ययान्तत्वेन प्रवृत्तायाः संज्ञायाः एकदेशविकृतन्यायेन विभ
क्तिलुक्यपि सत्त्वलभ्यत्वात् अतएव गोमान्प्रिय इत्यादौ नुमादेशो न लुकः प्रागन्तरंगप्रवृत्तौ तस्य देवन
त्वेवमपि असमर्थसमासे दशदाडिमादिवदनर्थके विध्यर्थं मास्त्विति चेन्न अर्थवदित्यस्यानुवृत्तेस्तत्त्व
त्वात् कथं तर्हि असमर्थसमासे संज्ञेति चेदिमं ग्राहकमानाद्देवेति सहाण असूर्यललाटयोरिति हि अ
सूर्यंपश्ये उपपदे खश् विधीयते उपोच्चारितं न पदं चोपपदं पदं च स्यामिद्धं तमिति नियमशरीरमाह १
यत्र संघातेत्यादि सर्वोभाग इत्युपलक्षणं उत्तरत्र प्रत्ययो नेत्यपि बोध्यं अन्यथा जन्मवानित्यादौ संज्ञा

१५८

२५

प्रत्ययोत्तरत्वं वर्तते

म०
भू०
२२

नस्यानुद्भिन्नग्रहणस्य गौणगवादौ कृतार्थत्वात् पूर्वभागः पदमिति किंच वृत्तिविशिष्टस्य प्रातिपदिकसंज्ञाय
द्यास्यात् तेन बहुपदवत्स्यत्र प्रथमजसोल्लौकिकवृत्तशब्देस्यपदे चित्रगुरेकृन्जोसित्युपोत्तमोदात्तत्वं सिध्य
ति यद्वा प्रकृतिप्रत्ययभावनापन्नसंघातविषयको नियमोस्तु न चाद्यपदेत्तमप्रकर्षवित्यादौ प्रकर्षवित्या
दे: संज्ञास्यादिति वाच्यं अर्थवत्त्वेनैव वारणात् प्रत्ययार्थो हि विशिष्ट एवान्वेति न तत्र पदार्थ मात्रेण
प्रकर्षवित्यस्यार्थवत्त्वं स्यात् नियमफलमाह तेनेत्यादि नन्वेवमपि मूलकेनोपदंशमित्यादौ वाक्यस्य
संज्ञा दुर्वारा कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणादिति चेन्नैवं समासग्रहणकृतनियमेन परत्वाद्बाधा
त् एवं च महत्वद्धितेति सूत्रे कृद्ग्रहणपरिभाषा नोपतिष्ठते एव निष्फलत्वादिति नन्वेवं यत्तद्वदन्ति समा
सग्रहणेन नियमार्थं किं त्वविधर्थमेव अर्थवत्त्वं हि द्वितीयमत्त्वेह वृत्तिस्वाद्विधाशाङ्का: लक्षणा च न च समासे सा
स्तीति अत्रेदं वक्तव्यं सिद्धान्ते तावदेकार्थीभावाभ्युपगमाद्वृत्तिरस्तीति बाधितमेव मीमांसकमतेपि ल
क्षणास्त्येव यदाहुः सर्वत्रैव हि वाक्यार्थो लक्ष्य एवेति वाचितं इति अथ नैयायिकरीत्योच्यते तदापि न ब
हुपदवत्त्वाद्यसिद्धेः तद्धितग्रहणं ताद्दिष्टपरमिति चेन्न पचतकीत्यादौ अतिव्याप्तेः किंचैवं कृद्ग्रहणप
रिभाषया मूलकेनोपदंशमित्यादावतिव्याप्तिरीदृशी वेत्यास्तां तावत् चकारो नुक्तसमुच्चयार्थः तेनानि
पातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्येति गतार्थम् येषां द्योत्योप्यर्थो नास्ति तदर्थमिदं अवयति अ
नुकरणे अत अनुकार्येणाभेदविवक्षायां अर्थवत्त्वाभावादेव न प्रातिपदिकत्वं अस्तत्रायामिति यथाभे

शि०

गे०
२२

22

दविवद्भावार्थं तु संज्ञाप्रत्यादेव प्रबोधुगिति यथालिंगविशिष्टस्येति लिंगबोधकप्रत्ययविशिष्टस्यापीत्यर्थः
परिभाषायाः प्रयोजनं तु अयमत्र क्रमः अतः कृकमीति सत्वे नाडिकंसादिष्टत्तरपदेष्वविधीयते किंच
कुमारीमाचष्टे कुमारयति णाविष्टवद्भावे टिलोपः एवं यामिनयतीत्याहानिष्टत्वं आचारे क्विपि फ
लम् आभ्यां प्राग्निति तेन लोहनिका आर्यका च सिध्यति तथाहि स्वार्थिकत्वेनान्तरंगः प्रत्ययः लोहि-
तान्मणाविति कन् ङीपं बाधते ततः लोहितिके त्येव स्यादिष्यते तूभयं ङीप् ग्रहणसामर्थ्यात्तु भ्रा-
त्कनि द्वयं सिद्धं वर्णादनुदात्तादित्यस्य वैकल्पिकत्वात् आर्यशब्दात्तु नसामिवचनत्वस्य पत्वा प्रतियमा-
माणत्वेन स्वार्थिकोपि कन् आप्ग्रहणसामर्थ्यात्पूर्वं न प्रवर्तते तेन उदीचामातः स्थाने यकपूर्वाया इति
इत्वविकल्पः सिध्यति स्यादेतत् एवं च सति बहुगोमत्कोति नासिध्येत् बहुगोमच्छब्दात् कपः प्राक् उगि-
लक्षणङीप्प्रसंगादिति चेन्नैवं अकृत एव समासे लौकिकप्रक्रियावाक्ये एव उत्तरपदस्यावयवी भूय
समासांतः प्रवर्तत इति वक्ष्यमाणत्वात् स च विभक्तेः प्रत्ययादिष्य के -प्रत्ययादिति पदेऽलं तद्धितांतत्वा-
त्सुब्लुकि पुनः स्वापि च कृते समास इति सिद्धांतः तस्मादंतरंगादपि तद्धितान्माक आपोः प्रसंगार्थं आपग्र-
हणमिति स्थितं यत्त्वाहुः आब्ग्रहणं स्पष्टार्थमिति तदनेन प्रत्युक्तं वस्तुतस्तु आपोर्थग्रहणं मास्तु एवं त्वा-
ड्डान्तात्वनिवृत्तिरिति निष्कर्षः स्यपः प्रागेव च आपो प्रवर्तने स्वार्थादि प्रत्ययकार्याणां क्रमिकत्वस्वीकारा-
दित्यवधेयं स्वाङः स्योरिति लोकारो वर्णग्रहणसावित्यत्र विशेषणार्थः अन्योन्यको हि अस्यकारसावित्यर्थः स्या

स॰
टी॰
२३

त् तथाचवाजसर्वत्रप्रयग्राहियाहइतिनासिध्येत् ङसेरिकारोऽकस्मदस्मद्भ्यांङसोशिन्यत्रग्रस्यग्रहणंमाभू
दिति यदित्वेकवचनस्यैवेत्यत्रैवस्यादित्यत्रबहुत्वेः पारिशेष्याद्भ्यसङसोऽत्रग्रहणंभविष्यतीत्युच्यते तर्हि
टाङसिङसामित्येतदर्थः जस्तु सोर्वेकारः शकारो जसः शी तस्माज्जसोनइत्यनयोः विषयविभागार्थः अ
न्यतरस्यनिरनुबंधकत्वमेवास्तु इतिचेन्न जसोजकाराभावे शेइत्यस्याव स्यात्ततस्तु प्रत्ययस्यवकारान्तता
पिसंभावेनप्रवेशप्रसः शकाराभावेऔटोडित्वे संभाव्येत अतोसन्देहार्थं तत्करणंविस्यात् औटष्टका
रः सुडितिप्रत्याहारार्थः टाटकारस्तु टाङसीतिविशेषणार्थः ङेप्रभृतीनांङकारोघेर्ङितीतिविशेषणा
र्थः सुपःपकारस्तुप्रत्याहारार्थः एवंच सर्वेषांसफलत्वेपि संज्ञार्थाइतिप्राचोयन्त्यो संगतएव सम्यक्
ज्ञानेसंज्ञातदर्थाविशेषणार्थाइतियावत् इतिभक्त्याव्याख्यानेपिक्लिष्टत्वमेवेत्युपेक्षितं त्रिङसीणिच्यो
णिइतिसूत्रात्रीणिच्योणीतिपदंतान्येकवचनेत्यादिसूत्रेच संपूर्णमनुवर्तते इतिप्राचश्चेष्टःपक्षोणिच्यो
णिइत्यादिनापकशइतिपकैकमित्यर्थः संख्यैकवचनाच्चेतिवीप्सायांप्रयुज्यमानात् शस् यत्तुप्राचापके
कशइत्युक्तंतदयुक्तं शसैववीप्सायाउक्तत्वेनद्विर्वचनायोगात् येननाप्राप्तिन्यायेनद्विर्वचनापवादः शस्
इतिसिद्धान्तात् यच्चाहुः सर्वस्यद्वेइत्यत्रपकैकशोददातीतिभाष्यप्रयोगात् तान्येकेतिसूत्रेपकशइति
सूत्रकारनिर्देशाच्चोभयंसाधितितत्र उदाहृतस्यभाष्यस्यान्यविषयत्वात् यत्रनाद्वितेनानुक्तावीप्साभवति
तत्रद्विर्वचनेइष्टपकमपिहितयथा पकैकशोददातीतिभाष्येउदाहृतंव्याख्यातंचकय्यटेन अल्पार्थेप्येक

रां॰
२३

शब्दोऽस्ति तस्य वीप्सायां द्विवचने बहुत्वार्थाऽऽदिति शब्दस्य यद्यपि न चैवेर्थे प्रवृत्तेः संभवतीत्यालांताव
त् रामइति संज्ञाशब्दोऽयमव्युत्पन्न इति पक्षे अर्थवत्सूत्रेण प्रातिपदिकसंज्ञा करणाधिकरणयोः
सूत्राधिकारे चापवादेन हलश्चेति चकारमतेनास्मिन्निति व्युत्पादने तद्धितनिसूत्रेणेति विवेकः
सरूपाणामेकशेष एकविभक्तौ एकविभक्तौ यानीति विभक्तिः सारूप्ये उपलक्षणं न त्वेकशेषे निमि
त्तं एवं चानैमित्तिकत्वेनान्तरंगोऽयमेकशेषः सुबुत्पत्तेः प्रागेव प्रवर्तते यद्येतन्नाभ्येत तर्हि प्रत्येकं वि
भक्तिः स्यात् द्वंद्वश्च प्रवर्तेत आरब्धे त्वेकशेषे नैकस्यैव नविरहात् द्वंद्वस्याप्राप्तिरेव फलितं भव
तीति भावः सरूपाणामेवेति एतच्चोत्तरसूत्रस्यस्यैवकारस्येहानुकर्षणाल्लभ्यते तेन मातृशब्दयोः
जननीवाचिपरिच्छेतृवाचिनोः नैकशेषः मातृभ्यामित्यादौ साद्रूप्येऽपि औजसादिष्वेव द्रूप्यात् एकए
वेति एतच्च सह विवक्षायामेव प्रवर्तते इतरेतरयोगद्वंद्वस्य विषये इति यावत् यत्र ह्यनेकस्यार्थस्य मि
लितस्यैतरान्वयः स तथाभूतो विषयः इदं च इदं च इतो नेत्यतो लिंगाल्लभ्यते न्यायाच्च तथा हि यः शिष्यते
स लुप्यमानार्थाभिधायीति स्थितेः श्रूयमाणैकशब्दोऽपास्यते सर्वमविशेषादेकरूपेणैवान्वेतुमर्ह
ति यद्वा सर्वे सहान्वात् द्वंद्वइत्यनुवर्त्य द्वंद्वप्रसंगे सतीति व्याख्येयं स्यादेतत् द्वंद्वे कृते सतीत्यर्थोऽस्तु मेवं
पन्थानौ पन्थानः इत्यादौ कृतसमासस्य समासान्तापत्तेः करौ करः इत्यादौ एकवद्भावापत्तेश्च सर्वे सर्वे
षामित्यादौ द्वंद्वे च विभाषा जसीत्यनयोरापत्तेश्चेति दिक् यत्तु प्राचा रामरामश्च इति स्थिते इत्युक्तं एक

शि॰ ५

स॰ ३॰ २५

एवशिष्यते एकविभक्तावपरतस्तनिच न तेषां शक्तिसंभवः रामरामइत्यत्रावयवयोरिवसमुदायस्यापिप्रा-
तिपदिकसंज्ञास्तिमिलितेनार्थवत्वात् नचार्थवत्त्वेपिसमासग्रहणस्यनियमार्थत्वान्नैवमितिवाच्यं यत्र
समुदायेपूर्वोभागः पदंतद्विषयकोनियमइत्युक्तत्वात् इन्द्रपदं वदित्याद्यनुरोधेननियमस्यसजातीयविष-
यतायाश्चोचितत्वाच्च तथाचैकाच् द्विवचनन्यायेनसमुदायप्रातिपदिकादेव द्विवचनात्कल्पनिर्लावत.
अवयवार्थानां संख्यान्वयेनानुग्रहसम्भवात् नन्वेवंरामकृष्णावित्यादिष्वपिद्वंद्वंविनैवसमुदायाद्वि-
भक्तिःस्यादितिचेन्नैवंद्वंद्वविधावनेकंसुबन्तमित्यस्यानुवृत्त्यापकाच् द्विवचनन्यायस्याबाधादितिदिक्
इत्थंशक्तिसंभवेसत्यपिसमुदायादेकाविभक्तावपरत इतिपदंकिमर्थमुपात्तम् इतिचेत् शृणु अस्मिन्
पदेमातरौइत्यादावप्येकशेषःस्यात् नन्वेकाविभक्तावित्यावर्त्यएवकारंचानुकृष्यएकविभक्तौया-
निसरूपाण्येवेतिव्याख्येयमितिचेन्न आवृत्तौमानाभावात् विभक्तेरेकशेषविशेषणत्वेफलाभावाच्चन
चपयःपयोजरयतीत्यादिव्यावृत्तिःफलंसहविवक्षायामित्यस्यावश्यकत्वादन्यथापयःपयोनयतीत्य-
त्रगौणमुख्यकर्मणोरेकशेषापत्तेः देवदेवइत्यादावतिप्रसंगाच्च अस्तुतर्हिअनुवृत्त्याउभयविशेषणत्वेभिन्ना-
र्थेसरूपोहीभेदामितिनसिद्ध्येत् तथाहिभिक्षाग्रामइतिस्थितेअन्तरंगानपिविधीन् बहिरंगोपीनिलुकिह्ब
नेविभक्तिपरत्वाभावादेकशेषोनस्यात् लकाललोमप्रत्ययलक्षणाभावात् किंचरामावित्यादौपरत्वा-
न्नित्यत्वाच्चवृद्धिरेचीतिपकादेशेकृतेविभक्तिपरत्वाभावादेकशेषोनस्यात् उभयतआश्रयणेनादिवद्भा-

माता

गं॰ २५

वाभावादिति दिक् यत्तु प्राचां व्याख्यात्रा पक्षांतरमुपन्यस्तं सविभक्तिकानामेकशेष इति तत्तन्निवर्त्त्य-
मानानां विभक्त्या सहैव निवृत्तावपि शिष्यमाणे एकवचनश्रवणप्रसंगात् अथोच्येत युगपदधिक-
रणवचनतायां द्विवचनबहुवचनानां नानामेकशेषः द्वंद्वोप्येवं तथा हि अजहत्स्वार्थायां वृत्तौ एकैकम-
नेकार्थाभिधायि परस्परं समभिव्याहारात् तथा च अलौकिके द्वंद्वैकशेषयोः प्रक्रियावाक्ये द्विवचन-
बहुवचनयोरेव प्रवेशात् विभक्त्यंतानामेकशेष इति पक्षो निर्बाध एवेति तदपि न जहत्स्वार्थायां वृत्तौ
तदयोगात् पक्षांतरेपि प्रथमप्रवृत्तस्यैकवचनस्य गायोगात् अन्यथा षष्ठीतत्पुरुषाद्युच्छेदापत्तेः त्या
तत्रापि पूर्वपदस्योत्तरपदार्थे उपसंक्रमेण षष्ठ्यायोगात् तथा च भाष्ये सेयं युगपदधिकरणवचन-
ता दुःखा च दुरुपपादा चेति यदप्याचख्युः व्यक्तिपक्षे यावद्व्यक्ति तत्तच्छब्दप्रयोगे प्राप्ते एकस्यैव
प्रयोगो यथा स्यादिति सूत्रं आकृतिपक्षे तु एकेनाकृत्यविनाभूतानेकव्यक्तिलाभादनर्थकमिति तन्न
व्यक्तिपक्षेपि न ब्राह्मणं हन्यादित्यत्र ब्राह्मणशब्देनैवैकेनापि अनेकस्य तंत्रेणैव वाच्यत्वात् अन्यथा जाति-
पक्षेपि वासेन सम्यक् द्रमयोस्तु तस्मिन्नित्यादिना नार्थानुरोधेन सूत्रं विना निर्वाहात् तस्माज्जातिव्य-
क्तिपक्षयोरुभयोरपि तंत्रेण प्रयोगनिर्वाहेपि सर्वत्र तंत्रेणैव बोधनीयमिति नियामकाभावात्यादिको
द्वंद्वः सूत्रं विना दुर्वारः घटोयं च घटोयं च घटोयमिति नानाशब्दप्रयोगदर्शनात् तद्वत् घटाविति द्वंद्वस्य-
न्यायप्राप्तत्वात् न चैवमपि चंद्रकलशाविति द्वंद्वापत्तिः विरूपाणामपि समानार्थानामिति वार्तिकात्

ना

म॰
द॰
२५

तृप्यते र्वेर्ध्यते इति तृप्यत्याद् रूपं पश्चात् तृप्त्यार्थपरत्वमाश्रित्य वार्निकार्थस्यापि सूत्रेणैव क्रोडीकारात् तस्मात् तृव
दो घटकलशावित्यादि प्रातिकानि दृवाराणाय पदद्वयेपि सूत्रभावप्रकामित्यवधेयं पर्वाप्यते सूत्रैवं य
र्थमेव सूत्रितनिधाय यदि हव्याचाख्युः नानेनैकशेषो विधीयते इत्यादि यत्तु सरूपायादेकस्योविभक्ताविति
पदे भस्याख्याय तत्र राज्ञः रामरामौ इत्यादि निपात्यते इति अलौकिकमेतत्प्रक्रियावाक्यं युज्यते न तु लौकिकं अ
लौकिके च विभक्त्येकादेशादिकार्यं न प्रवर्तते पृथक्ज्ञानामेवाख्याख्यानादित्यादि तत्सर्वं संदर्भविरुद्ध
न्यायविरुद्धं च पृथक्ज्ञाने वत्स्यत्वाख्यात्वे अलौकिकमुत्पद्यते शास्त्रीयकार्यं च सर्वमलौकिकेष्वेव प्र

अमि पूर्वः ४

वर्तते न तु परिनिष्ठिते प्रथमयोः पूर्वसवर्ण इत्यादीनां प्रवृत्तिं विना परिनिष्ठितरूपालाभात् परिनिष्ठि
ते न तस्य हन्नेर्दुरूपमादत्वाच्चेत्याख्यानावत् अमि पूर्वः अस्य चीति अमि योश्च तस्मिन्नमोवयवे चीति या
वत् तेन मकारसहितस्य पूर्वरूपं न पवमत्ताहहित्यामित्यादावपि डाहित्यां योश्च नासान्निग्यादिवोद्धव्यं
इको यणचीत्यत्र ग्रहणस्यानुवृत्तेर्निर्विवादत्वात् पदास्यैरिवाद्यैत्यादिनिर्देशश्चेह लिंगं तस्मात् शसः त
त् शब्देन सन्निहितः पूर्वसवर्णदीर्घः परामृश्यते शसइत्यवयवषष्ठी स चावयवः परत्वेन विशेष्यते पू
र्वसवर्णदीर्घात्परस्य शसोवयवस्य तेन नस्तेनदाह पयोः शसः सकारइति पयोः शसइति तत्रोक्तं अ
संभवात् नहिङ्क्ते पूर्वसवर्णदीर्घेन ततः परः शस् संभवति अट्कुप्वाड्· रषाभ्यामिति पंचमीनिर्देशा
द्व्यवहितस्याशसोवचनमिदं तत्र सर्वैर्व्यवायो सम्भवी एकैकमात्रव्यवाय इत्यपि नार्थः तृभादिषु तु

गं॰
२५

नशाह्रूपादसामर्थ्यात्तद्रूपाणामित्यादिनिर्देशाद्वेत्यभिप्रेत्याह अस्तैर्यथासंभवंमिलितैश्चेतिन
चैवं आदर्शेनेत्यादावतिप्रसंगः नचाडादिभिरेवव्यवधानेइतिनियमः अप्राप्तेविधिरयमितिव्यक्त
त्वात् सत्यंयोगविभागोत्रबोध्यः व्यवायेपीत्येकोयोगोविध्यर्थः अट्कुप्वाङ्नुम् इत्यन्यः नियमा
र्थः चर्वादस्तोभिस्तोलक निषेधंवापितमिति तेनपर्याणद्धमित्यत्र उपसर्गादसमासेपीति णत्वं
सिध्यतीतिभावः नुम्ग्रहणमिति तत्स्थानिकस्यस्वाभाविकस्यचानुस्वारमात्रस्योपलक्षणमि
त्यर्थः तेनबृंहि बृंहो बृंहितत्वान्नुम् तस्यानुस्वारः त्वंहिहिंसायांस्वाभाविकोत्रानुस्वारः बृंहणं त्वंहणं
उभयत्रापिणत्वंसिद्धं हविर्षीणानेप्रेन्वनंइहहृत्स्यचइजादेः सनुमः इतिणत्वेन यथानतद्ग्रहणा
वाचंविसृजेदितिविधौनतद्दर्शनस्यकालविशेषोपलक्षणत्वात् सत्यापादिवानतद्दर्शनेवा
ङ्गविसृज्यते उपलक्षितस्यकालविशेषस्याभावात् एवंतत्प्रसत्यापिनतद्दर्शनेविसृज्यते न
त्रसत्त्वात् तथेहापिबोध्यं नन्वेवंनुम्ग्रहणंव्यर्थं अनुस्वारस्याड्त्वेनैवसंग्रहात् उरःकेणत्यादौवि
सर्गजिह्वामूलीयादिव्यवधानेप्येवैषाणानिङ्कुतिचेत्सत्यमित्याह नचेति स्यादेतत् उरःकेणेत्यादौवि
सर्जनीयेनिस्त्रेपिडग्रहणंत्याज्यंस्यात् तत्रापिअनुस्वारस्यलक्षणीयत्वात् अन्यथासंभवान्नहि
षत्वप्रवृत्तिवेलायांसर्पीषीत्यादौनुंलभ्यते षत्वस्यासिद्धत्वेनततःप्रागेवानुस्वारप्रवृत्तेः यद्यपिवृहि
त्यइत्यत्रसंभवत्येवतथापितत्रैवानित्यासिंवारयितुंलक्ष्यानुरोधान्नुंस्थानिकेनुस्वारेलक्षणाश्रय

म· २· ४९
टी

णोयैवव्याख्यानात् तस्य च शर्वैर्न तद्भावाये षत्वस्यासिद्धत्वादिति चेन्मैवं उक्तरीत्या तत्रत्यविसर्गग्रहणस्य
प्रत्याख्यानसंभवेपि नियमार्थं ग्रहणं तथा हि अत्र स्वाश्रयव्यवधाने चेत्वत्वं तर्हि इण्स्थानिके नैवेति निय
म्यते तेन उं स्थित्यादौ षत्वं नेति नानिष्टिक् यस्मात्प्रत्ययविधिः अत्र प्राचोक्तं यस्मात् ज्ञातेः प्रातिपदिकाद्वेति तन्न
निर्दिष्टं नो नामपितरखादिकं प्रत्ययंगात्वात्संकोचस्य निर्मूलत्वात् आग्निष्यायणइत्यादौ इद्धभावापत्तेश्च
नहि प्रातिपदिकाद्यं [illegible] तद्धितः किं तु स्वत्वेनादिनिष्टिक् अतो भिस ऐस् पस् क्रियमाणे छंदसि
नद्यैरिति न सिध्येत् नन्वैसित्येवास्तु न चातो गुण इति परत्वपापत्तिः एकारोच्चारणावैयर्थ्यापत्तेः अन्य
था इसमेव विदध्यात् इति चेत्सत्यं एदैतो हि मात्रत्वाविशेषेण गौरवाभावात् ऐस्तुनः एवं च परत्वपक्षे
केवला स्तीति महल्लाघवं यस्याजः ऐस्कवर्णेन जरसैरित्यैकारश्रवणार्थमिति तद्भाष्यविरुद्धं सन्निपात
परिभाषया जरसादेशाप्रवृत्तेः निर्जरैरित्येव भाष्ये सिद्धांतितत्वात् नामिपरिभाषाविरोधादिति एतच्च
रुदादिभ्यः सार्वधातुके इति सूत्रे अन्नलोपइति सूत्रे च भाष्यकैय्यटयोः स्पष्टं आरंभसामर्थ्यादिति सामीचेत्पर
त्वेन सामर्थ्यं रामाभ्यामित्यादौ सावकाशत्वादितिभावः एवं च रामशब्दे नामीत्युत्सोपन्यासो लेखकप्रमा
दादिति यत्तूचुः तच्चिंत्यं आदेशप्रत्यययोः एकापि षष्ठी विषयभेदाद्भिद्यते इत्याशयेन व्याचष्टे आदेशः
प्रत्ययावयवश्चेति यदित आदेशावयवोऽपि गृह्यते तर्हि निरुणामित्यादौ दोषः यदि च प्रत्ययावयवः सकार इति
तर्हि रामेष्वित्यादौ न स्यात् यद्यप्येवं वैरूप्ये व्याख्याने सह विवक्षाविरहात् इदं तेन कज्यनेनत्याप्यसौत्र

ग्रे· ४९
26

ति

त्वाद्धोष्यः विप्रुताघोषस्येति यत्तूक्तं सकारस्य सोष्मणो घोषस्ताद्दृशएव षकार इति तन्न स्नेटका
रेति प्रसंगात् तथा च प्रातिशाख्ये वर्गे वर्गे च प्रथमावघोषौ कण्ठ्यौ सोष्माणएवं नासिक्यौ न्त्य इति नतु
दधि सेचौ दधि सेच इत्यादौ प्राक् सुत्रुत्यन्तेः समासे षत्वं वारयितुं पदादादेः पदादिरिति पंचमी समा
सो भाष्ये उक्तः नन्वेवमपि सात्पदाद्योरिति निषेधः स्यादिति चेन्नैवं स्वादिष्विति या पद संज्ञा तामाश्रित्यो
क्तनिषेधो न प्रवर्तते इति सातिग्रहणेन ज्ञापितत्वात् यत्त्वाहुः प्रत्ययविषये नायं निषेध इति ज्ञास्य
न इति तन्न ज्ञानिसे इत्यादौ षत्वापत्तेः नतु पदस्यादिरिति पदत्वं व्यतिसह इत्यत्र षत्वं इत्तं वारं न च व्यपदेशिव
द्भावेन सहत्यस्यापि तिङ् तत्वात्पदत्वं शंक्यं प्रत्ययग्रहणे यस्मात्स विहितस्तदादेरेव ग्रहणात् अन्यथा
रामेष्वित्यादावपि षत्वनिषेधापत्तेरिति चेन्मैवं न वयं प्रत्ययमात्रस्य पदत्वं ब्रूमः किं तु प्रकृतिप्रत्यय
समुदायस्य ज्ञापदसंज्ञा एकदेशविकृतन्यायेन तल्लम प्रकृतिके प्रत्यये व्यानयामः एमोरामाः इत्या
दावपि एकदेशविकृतन्यायेनैव पदत्वं एकदेशन्यायेनैव पदसंज्ञा प्रवृत्तेः नन्वेकादेशोक्त नेह सिद्ध न तर
मित्यस्य प्राप्तिरस्ति उभयत्र आश्रयणेनान्तादिवदिति सिद्धांतात् यत्तूक्तं प्रकृतिसन्निधाने प्रत्य
यस्य पदत्वं नास्ति मंत्रेषु सर्वेषामित्यादिनिर्देशादिति तन्न तन्न उक्तरीत्या पदत्वाभावे न्यायसिद्धस्ता
पनस्यासंभवादनुपयोगाच्च सर्वादीनि सर्वादीनि इति तद्गुणसंविज्ञानो बहुव्रीहिः हलि सर्वेषामि
ति निर्देशात् इंद्रे चेति साहसमुदायस्य निषेधः नत्ववयवानामिति वक्ष्यते न च नदन्तविधिं विना समु

म॰
१॰
१२

दायेसंज्ञाप्रसक्तिरस्तीतिभावः नन्वनदंतसंज्ञायाः किंफलंनचपरमसर्वस्मायित्यादौस्मादयः फलंग्रगाधि
कारेणतदंतविधिनैवतदंतसिद्धेः इत्यतआह नेनेति नचेहापिप्रातिपदिकादित्यनुवृत्तेः सर्वनाम्नातद्विशे
षणेनतदंतविधिर्भविष्यतीतिवाच्यं समासप्रत्यय[illegible]विधौप्रतिषेधइत्युक्तेरितिभावः प्रकृतेतिचका
रात् परमसर्वत्रेतित्रल् नसः शोप्रनेकाल्त्वादिति नत्वशित्वादितिभावः अवर्णान्तादिति अवर्णा
न्ताद्गात्परस्येत्यर्थः अतोयेषांतेषांकेषामित्यादौनाव्याप्तिः सर्वनाम्नोविहितस्यामइतिसर्वनाम्नः प
रस्येतितुनोक्तं दक्षिणोत्तरपूर्वाणामित्यत्रसुट्प्रसंगात् द्वंद्वेचेतिनिषेधोहिसमुदायस्यनत्ववयव
स्य नचतस्मादयमाविहितः किंतुसमुदायादेवेतिनसुट् विहितविशेषणत्वस्याश्रयणेप्रमाणंतु
दक्षिणोत्तरपूर्वाणामितिभाष्यप्रयोग एव पंचत्रिंशादिति पंचत्रिंशद्वादितिद्वंद्वः पंचाधिकात्रिंशादि
ति तत्पुरुषोवायत्तुप्रत्याहाराणपकचत्वारिंशादितिभाष्यग्रंथव्याख्यानेकैयटेनायंमध्यमपदलोपी
तत्पुरुषः तथासतिराजन्यबहुवचनद्वंद्वेबहुव्रीहौसंख्येतिविधीयमानःपूर्वपदप्रकृतिस्वरोनस्यात्
तस्मात्समाहारद्वंद्वएवायंएकविंशतिरित्यादौनपुंसकत्वंनभवतिलोकाश्रयत्वाल्लिंगस्येतितद्वि
त्यसमासभेदेनस्वरभेदउपपत्तेः तथाचबहुव्रीहौसंख्येयेडजिति सूत्रेसंख्यायांतत्पुरुषस्योपसंख्यान
त्रिंशाद्यर्थमन्यत्राधिकलोपादिति वार्तिकव्याख्यानेभाष्यकारआह एकाधिकाविंशतिरेक
विंशतिर्द्व्यधिकाविंशतिः द्वाविंशतिरित्यतएवेति द्विवचनस्यैवन्याय्यत्वादितिभावः नन्वेवंसर्वादिष्व

न॰ इत्यत्र॰ व॰ त्रि॰

उ॰
१२

27

पाठोऽयमर्थः सर्वनामकार्याणां स्मायादीनां द्विवचनेऽभावात् नच उभाभ्यां हेतुभ्यां उभयोः हेत्वोरित्यत्र
सर्वनाम्नस्तृतीया चेति पाक्षिकतृतीयातत्फलमिति यत्कं निमित्तकारणहेतुषु सर्वासां प्रायदर्शन
मिति वार्तिकेन गतार्थत्वात् नच सूत्रनिर्दिष्टता सर्वनाम्नस्तृतीया चेति सूत्रे पठितत्वादिदं वार्तिकं सर्वना
मसंज्ञासापेक्षमिति वाच्यं भाष्ये हेत्वाविति सूत्रे तस्य पठितत्वादत एवान्नैकारणेन वसत्यत्र स्वकार
णस्येत्युदाहृतं हरदत्तेनेत्याशंक्याह तस्येह पाठस्त्विति ॥ अयचावसेयादिति अयं भावः उभादुदा
त्तो नित्यमित्यत्रोभादुदात्त इति योगो विभज्यते अवयवसूत्रे संख्यावाचिन उभशब्दादवयवे तय
प्स्यात् उभयो मणिः ततः नित्यं उभशब्दात् तद्विषये नित्यमयच् स्वार्थे तेन उभयपदवितीतनि
त्याद्यन्यादौ अयच् यथानित्यः एवं कप्रत्ययोऽपि स्यादिति नन्वेवं अकाचिह्नतेऽपि अयजुवीदितिचे
त् मैवं योगविभागस्येष्टसिद्ध्यर्थत्वात् उभौ साभ्यासस्येति निर्देशेनच यत्राद्विवचनं तत्स्वार्थे तेनैवाय
मिति व्याख्यानात् तथाच वार्तिकं अन्याभावो द्विवचनटाब्विषयत्वादिति अकाचि हि सतितन्मध्यप
तितत्वाद्ग्रहणेन गृह्यते इति न्यायेन उभशब्दस्य द्विवचनविषयत्वेन विहन्यते कप्रत्यये तु विहन्यतेैव
तदुक्तमिति वार्तिककृता नेति शेषः यद्यपि पूर्ववार्तिके टाबप्युक्तः तथापि नासौ विवादितः टाब्विषय
त्वमपि द्विवचनपरत्वमेव बोद्धव्यमिति कैयटादिभिर्व्याख्यातत्वादित्याशयेन व्याचष्टे द्विवचनपर
त्वाभावे इति टाबेकादेशस्यापि पूर्वान्तत्वेन ग्रहणात् द्विवचनपरत्वमस्तीति भावः यदप्युभावित्यादौ हि

म॰ १॰ २८

वचनपरत्वं इहपपाठे उभयतआश्रयणेनांतादिवद्भावविरहात्तथापि उभयशब्दात्त्वं द्विवचनं लकाः
नापद्दतेयत्नतोन्यत्रापच् इतीहविवदितोर्थः यद्यपि भाष्ये कप्रत्ययस्यापि स्वार्थिकत्वेनोभशब्दान्यत्र
स्यद्विवचनमस्तीत्याशयेनोभशब्दपाठः प्रत्याख्यातस्तथापि प्रौढिवादमात्रं तत् कृत्रिमस्यैवाद्विवचनस्ये
हगृहीतत्वशब्दितत्वात् अन्यथा वनामिलावावतिप्रसक्तत्वात् नत्रकारकाविभक्त्यन्ताद्विहितौवत्तासिलो
स्वार्थत्वेपिद्वित्वमात्रेनाभिधत्त इतिचेन्न कप्रत्ययस्यापि प्रज्ञानाद्यर्थबोधकत्वात्यचकपदैधिकबोध
कत्वयोग्या द्वित्वादिक् नास्तीति अनभिधानादितिभावः तथाच उभयशब्दस्याद्विवचनान्तत्वाद्दसर्व
विभक्तिकत्वेनाव्ययत्वप्रसक्तेनाद्वितस्मात्सर्वविभक्तिरितिसूत्रेकृत्तद्धितानां ग्रहणं चपादेइतिभाष्ये केयु
टेनावनारितं अस्तीति पचतिकल्पं पचतितरूपमित्यादिवारणेन पाठस्योपक्षीणत्वादनभिधानेप्रमा
णेनास्तीतिभावः तयपप्रत्ययांततयेति उभयशब्दस्येतिभावः नित्यैवेति परे तुउभयात्प्रमित्राइतिन २८
स्यादसत्वाद्दोध्य अच्युतन्नावित्ति पतत्त्रपक्षपशायांकयटेस्पष्टएवकेकाशिकाकाराः एतत्त्वमन्ये
इत्युदात्तस्य उनत्वः यथ्यन् इत्यनुदात्तस्य दर्शनादितिभावः एकः प्रथमः संहितापाठेनांतस्यास्त
दत्वेपिनांतच्छेनव्योन्यथापवाष्ठन्यासकृदेवपठेत् नचतांतेविप्रतिपत्तव्यं तत्रत्वसमासिमेत्यनु
नीतिफिट् सूत्रात् तथाचक्रस्वस्त्रः स्तरीकत्वइवानस्वतउत्वादितिवेदभाष्यकाराः स्वयं व्याचख्युः ब
हिनिसर्वनामपदतोनुदात्तोयमन्ययपर्यायइतिजयदेवोपिप्रायंकृत्वदधरमफरमधूनापिवंतासितिः

त्वत्तोन्यास्याः पृथगिति विग्रहः तत्र न वाधक इति पश्यामि दिशि दिशि वहासि भवन्तमिति पूर्ववाक्येन
सहानन्वयापत्तेः नेत्र इति श्रूयते च प्रनेमासि सूर्दृशो समाइति तथा च श्रूयते न भन्तामन्यके समे
मानो वृकायवृक्ये समस्मै उरुष्याणो अघायतः समस्मात् उतो समासि त्राद् इत्यादौ सिमः कृत्स्ने च
शाब्दे च स्यान्मर्यादादावबद्धयोः श्रूयते च आङ्गां ङीवा सत्तत्रनेसिमस्मै उन्नकांक मजते सिमस्मात्
उभयत्रापि सिमशब्दः सर्वपर्याय इति वेदभाष्ये गणसूत्र इति यद्यपि भाष्ये स्वाध्यायोस्ये सूत्रे प्रतीत
वचनमित्यमिति वार्तिकपाठे तथापि तद्गणसूत्रस्य शेषः तत्राप्रे विभाषाविधायकस्य अन इत्यधि
कृत्य जसः शीविधानात् टावेनात्रासंभावात् अन्तरायामिति प्राकारादावप्रायोन्तद्तत्तर्वर्तित्वावेत्य
र्थः लिंगविशिष्टपरिभाषया एकादेशस्य पूर्वान्तत्वेन ग्रहणाद्वा प्राप्तिः वोध्या त्यद् तद् एतौ उक्तप्र
योजनकौ तत्राद्यः स्वातिसद् इति गणसूत्रकारः तत्र स्यत्को दास्वि वज्रलामिति सूत्रे त्यदो ग्रहणावेयर्थ्या प
त्तेः एको न्यार्थे प्रधाने च प्रथमे केवले तथा साधारणे समाने ल्पे संख्यायां च प्रयुज्यते स्वाभिधेये
ति स्वस्य पूर्वादिशब्दस्याभिधेयेनापेक्ष्यमाणस्यावधेः नियम इत्यर्थः दिशः सपत्नो भवदक्षिणस्या
इत्यादावपि व्यवस्थास्त्येव प्रसिद्धत्वात् तेनावधिवाची शब्दः प्रयुज्यते न च संज्ञात्वान्निषेधः आधुनि
कसंकेतो हि संज्ञा न चादित्सास्तीति अतीति प्रकरणे कस्यचिद् हृदन्नादयः अत्रादित्सा चिरंतनः ऋषि
श्रुत्वा आनिकः संकेत इत्यत्र व्याख्यातृवचनमेव प्रमाणं यतेनानित्यस्ये देवानामिति व्याख्यातं वेदभाष्ये

५४

म० २ ५९

इत्याद्येवगणविशेषेविस्रशब्दस्यआधुनिकसंकेतनाभावात् दाक्षिणात्यकाइति इहग्रन्थकस्मात्ज
घालाद्येवध्यन्त्वयसम्भवेपिनत्रियमोनास्तीतिभावः एवंग्रथेतान्तूलरागः उत्तरेप्रत्युत्तरेचशाकाद्य
पिप्रत्युदाहर्तव्यम् कथंतर्हितथापरेषांकार्यचेतिकालिदासः अपरेप्रत्यवतिष्ठन्तेइत्यादिच अत्राहुः
देशवाचितयाव्यवस्थाविषययोरेवपरापरशब्दयोःरूपचाक्रोशोप्रतिवादिनिचप्रयोगः नत्वेवमुपसर्ज
नतानाहिलाक्षणिकत्वमुपसर्जनत्वंकिंतुस्वार्थविशिष्टार्थान्तरसंक्रमः सचसमासादिवृत्तावेवअत
वभूवादिसूत्रेणनान्यपीतिएतत्पनिपयानिवत्वानिइत्यर्थइतिकथ्यदोक्तिः संगच्छते वस्तुतस्तुपरापर
शब्दयोर्देशान्तरनिष्ठत्वादिकमेवार्थः धातुत्वादिकंतुआर्थिकोऽर्थः असंज्ञायांकिं उत्तराःकुरवःस्वमेरु
मवधिमपेक्ष्यकुरुषुत्तरशब्दोवर्ततेइत्यस्तीहव्यवस्थाकिंतुआधुनिकसंकेतोयमित्याहुः स्वमज्ञातिध
नाख्यायां ॥ आत्मात्मीयज्ञातिधनवाचीस्वशब्दस्तत्रज्ञातिधनयोःपर्युदासात् आत्मात्मीयौपरिशि
ष्टावित्यर्थाशयेनव्याचष्टे आत्मीया इत्यर्थः आत्मानइतिवेतियन्त्राहुः आत्मनिस्वशब्दोनपुंसकः तेनस्व
स्वाइत्युदाहरणं तत्रनसंभवतीतिनिरस्तं आत्मन्यपिस्वशब्दस्यपुंस्त्वात् विभाषाजसीतिप्रकरणेस्व
मात्मीयइत्येववक्तव्येग्रहणनिर्देशंकुर्वतः सूत्रकारस्यैवात्रप्रमाणत्वात् यद्यपिस्वोज्ञातावुपदेशभाष्ये स्वोऽ
ज्ञातावात्मनिस्वंत्रिष्वात्मीयेस्वोऽस्त्रियांधनेइत्यमरसिंहोक्तिमाहुः तदापिविंशतकोशेहिआत्मनीतिपूर्वोक्त
यिस्वमित्युत्तरान्वयितयाचहेमचंद्रः योऽस्वर्गानभसोः स्वोज्ञात्यात्मनोः स्वंनिजेधनेइति मेदिनीकारोपि

ग० ५९

स्वः स्वास्त्वे स्वास्त्वनिज्ञातौ शिष्ठात्मीयेष्वियांधने इति तस्मात्स्वे स्वाङ्गस्य स्यात्मान इति विवरणं सम्पर्योगे वेति
स्थितज्ञातिधनवाचिनः स्त्विति तज्ज्ञीत्स्यनाणिनिनाज्ञातिधनयोरपि आत्मीयत्वेऽप्रसक्त्यप्रवृत्तौ सर्व
नामताः स्वे वेति धनयति एतदर्थमेव हि हस्त्वे आख्यायहणं कृतं अन्तरं बहिर्योगोपसंव्यानयोः बाह्
रित्यनाहृतो देशो बाह्यं चोच्यते तथायमर्थं गृहीत्वाह बाह्यायेत्यर्थ इति द्वितीयेन्त आभ्यन्तरार्थो बो
ध्यः बाह्येनाह आभ्यन्तर स्वयोगीति अर्थे हृदयमप्याकारो स्थितं उपसंव्यानशब्दोपि करणव्युत्पन्ना ओत्तरी
यपरः कर्मव्युत्पन्नान्तश्चेत्तरीयपरः सर्वादिभ्यो नवभ्यो वा अत्रेदमवधेयं एतत्सूत्रं जसः शीत्यत्रानु
वर्त्य वाक्यभेदेन व्याख्येयं वाच्छेदसीत्येतदामिप्सर्वे इत्यत्र यथा एवं चाष्टाध्यायीं हि वा पर इत्यादि त्रिसू
त्रीगतार्थेति महल्लाघवम् एकशब्दस्याष्टावर्थाऽङ्गाः तत्र विशेषमाह संख्यायामिति अन्ये प्रमुसम
स्तत्ववचनोत्तरमपि स्यादेव एके एके षामिनियछोति भावः न बहुव्रीहौ सन्ते बहुव्रीहौ नि बोधोव्या
ख्यः उपसर्जनीभूतः न सर्वादयः इति वक्ष्यमाणत्वादतनाह विकीर्षितेऽइति समासात्प्रागेवेतिच
प्राक्क्रियेति अलौकिके विग्रहवाक्ये इत्यर्थः नन्वस्त्वतन्नाणकच् अत आह सचेति न चानिमित्तस्या
नुपसर्जनत्वस्य विनाशोन्मुखत्वात् प्रागेव संज्ञा न भविष्यतीति वाच्यं अकृतव्यूहपरिभाषया अनित्य
त्वात् न चैतत्स्य अस्यैव ज्ञापकत्वात् अनिभावकानिति एतदेव ज्ञापनफलमिति भावः द्वन्द्वे च
त्रिंशात्वेति स्मृतौः स्वडिति सप्तकृ ग्रहणं ज्ञापकं प्रकृतिप्रत्ययादि वचने वा एके लद्व्यान्तरो धाज्व्यवस्थे

स्त्य ५

नित्यत्वेज्ञा ५८

म॰ र॰ ३०

तिभावः यथोत्तरमिति तथाचास्मिन्सूत्रे भाष्यकारोक्तैव व्यवस्थेतिभावः यत्तु प्राचोक्तं बहुव्रीहौ सर्वादेः
सर्वनामत्वानस्यात् प्रियसर्वाय सूत्रकारमते बहुव्रीहौ न सर्वनामता भाष्यकारमते गौणत्वमात्रे त्वक
पितृको मत्कपितृक इत्यत्र समासावयवयोर्युष्मदस्मदोः सर्वनामत्वादनेनाकार्यत्वेनाकच्स्यात्सभूत्क
प्रत्ययएव स्यादित्येतदर्थमिदं सूत्रमिति न्यासकृन्मतमिति तत्रेदं वक्तव्यं किं बहुव्रीहेः संज्ञानेति विवक्षि
ते उत तदवयवानां सर्वादीनामिति नाद्यः समासावयवयोर्युष्मदस्मदोरिति न्यासग्रन्थविरोधात् स
मुदायप्राप्तिविरहाच्च नचतदन्तविधिनाप्राप्तिः बहुव्रीह्यवयवानां उपसर्जनतया सर्वादिबहिर्भावेपि
यत्सर्वादेरित्यत्र तदन्तप्राप्तेरेवापास्तत्वात् अतएव न द्वितीयोपि नचोपसर्जनानां पाठानर्थक्यंदोषो वार्तिक
कृतोक्तो नत्वसूत्राद्वृत्तिरितिवाच्यं अन्वर्थसंज्ञाबलेन सूत्रादेवैतल्लाभात् एतेन सूत्रकारमते बहु
व्रीहौ न सर्वनामतेत्यपि परास्तं बहुव्रीहावपीति तस्यार्थः भाष्यकारमते इत्याद्यपि न विशेषोपादानेन हि
सूत्रकारवार्तिककारयोर्मतमन्यादृशमिति प्रतीयते देवदत्तो वामेनाक्ष्णा पश्यतीत्युक्ते दक्षिणेनन
पश्यतीतिवत् तच्च न सूत्रवार्तिकमतेपि गौणपर्युदासस्येष्टत्वात् यत्तु त्वत्कपितृक इत्यादि तद्विग्रहप्रा
वाक्याख्यानं त्वं पिता यस्याहं पिता यस्येति विग्रहस्य बहुव्रीहौ समासे कृते समासावयवयोः समासान्तःपा
तिनो युष्मदस्मदोः सर्वार्थवाचकत्वेन सर्वनामसंज्ञकत्वादज्ञाताद्यर्थविवक्षायां अव्ययसर्वनाम्नामिति
अकच्प्रसज्येतेतस्मैप्रभृतीनामिवांगाधिकारविहितत्वाभावेनांगसंज्ञानपेक्षत्वात् ननस्त्वकोपि

मा॥

गं॰ ३०

30

त्वकइत्याद्यनिर्दिष्टं प्रसज्येतेतिन्यासकृतापि अन्वर्थसंज्ञाबलादेवसंज्ञानिराकृतेत्यकच् नभविष्यती
त्याशंक्य समुदायोहिविशेषेवर्त्तते पूर्वपदंतुसर्वार्थतायामनपेतमेवेत्युक्तंतदेतत्सर्वंप्रामादिकमे
व तथाहिजहत्स्वार्थायांवृत्तौसमासावयवयोरर्थएवनास्ति अजहत्स्वार्थायामपिस्वार्थविशिष्टा
न्यपदार्थवृत्तित्वेनोपसर्जनत्वंस्पष्टमेवएवंचसमासांतःपातिनोर्यत्तदोःसर्वार्थवाचकत्वेने
त्यादिग्रन्थःसमुदायोहीत्यादिन्यासग्रन्थश्च पदद्वयेपिव्याहतः किंचैवंप्रतिसर्वार्थेमत्रसमासादे
प्योड्वीरः अंगाधिकारेतदंतग्रहणात् त्वइत्कारीत्यासर्वशब्दस्यसर्वा[illegible]र्थ[illegible]ता नपायात् नहिपूर्व
पदेसर्वार्थताऽत्रपदेतुनेतिप्रत्युक्तिमत् अपिचैवंगौणत्वेसर्वादीनां सर्वार्थवाचकत्वेनास्तीतिस्वो
क्त्याःसहविरोधःस्यादिति यत्किंचिदेतत् यदपिव्याचख्युःत्वपितायस्येत्यादौविग्रहवाक्येप्राप्तासं
ज्ञानिषिध्यते इतितदपिनविग्रहवाक्यंहिलौकिकमलौकिकंवाविवक्षितंनाद्यः अलौकिकप्रक्रि
यावाक्येयंनिषेधः नन्वलौकिकइतिकय्यटग्रन्थविरोधात् प्रकृतसन्दर्भेगतसूत्रोपरस्यग्रन्थविरो
धाच्च नद्वितीयःकथमह् स्वपितृह इत्याकारकत्वेनत्वपितेत्याकारकत्वायोगात् यदपिव्याच
ख्युः नन्वत्रसर्वादौसंज्ञानप्रवर्ततेत्वत्कपितृकादौतुप्रवर्ततइत्यत्रकिंविनिगमकं तत्राहुरनगाका
र्यत्वेनेति अंगशाहुः समुदायपरःतेनातिसर्वइत्यत्रांगस्यसंज्ञापेहितासर्वनाम्नोयोगात्स्यादिविधा
नादवयवमात्रस्यसत्यपिसर्वनामत्वेदोषाभावात् समुदायेचसमुदायार्थंप्रतिसर्वादेरुपसर्जनत्वात्

तस्य

म॰ द॰ धी

तदेतस्य संज्ञा न भवतीति फक्किं इह त्ववयवमात्रस्य साचिकीर्षितान समुदायस्य अवयवस्तु स्वार्थमात्रप्रधा
न इति स्यात्प्रसंग इति वैषम्यमस्तीति आशय इति तदपि न अंगाधिकारेत देन विधेः सर्वे समस्तत्वेनावयव
मात्रे सत्यपि सर्वनामत्वे दोषो नास्तीत्युक्ते व्याहतत्वात् अंगाधिकारपरिभाषया सिद्धेस्यात् इति स्वग्रन्थवि
रोधात् अत्र अथायमाशयः प्राक् प्रवृत्तापि संज्ञा अर्थान्तरोपसंगमे समनिगतेति तर्हि अकृजपि राख्याते नन्वा
कार्यकालपक्षे समायायामर्थे पुनः संज्ञापेक्षिता सा च डलभेत्याशय इति चेत् अत्र त्वेवं न त्वसौ प्रकृतग्रन्था
र्थः न्यासग्रन्थाविसंवादेनेति न्यासकृन्मतमिति वाक्यशेषविरोधात् न्यासग्रन्थस्त्वनुपपद्यमेवोदाहरिष्य
ते यदपि व्याचख्युः अंगमप्रधानं बाध्यं तद्धि इदमनंगं बाधकमित्यर्थः तथा च कप्रत्ययापवादत्वादक

व्यर्थ॰ च्यादित्यर्थ इति तदपि क्लिष्टं न्यासग्रन्थासमन्तं च तथा हि त्वत्कपितृको मत्कपितृक इति हि विग्रहे
व्याख्याय न्यासकार उत्तरयाह तत्र चान्वर्थसंज्ञाकरणादेवात्र संज्ञानिरासे कृते अकच् न भविष्यति न ह्यत्र स
र्वार्थता संभवति विशेषविषयत्वात् नैतदस्ति समुदायो हि विशेषे वर्तते सर्वपदं तु सर्वार्थं तथाः अ
नपेतमेव भवतु तर्हि त्वत्कपितृकमत्कपितृकयोरनयोरनंतरयोरेतत्त्वविषयता प्रियविश्वाये
त्यादौ तु नोपपद्यते नहि प्रियविश्वादयः शब्दाः सर्वेषां नामानि नापि तदवयवभूतानां विश्वादिशब्दा
नां किंचित्सर्वनामकार्यमुपपद्यते स्मै प्रभृतीनां अंगकार्यत्वात् विश्वादिशब्दानामनंगत्वात् एवमन्य
ते त्वत्कपितृको मत्कपितृक इत्यत्राकच् मा भूदित्येतदर्थं तावदेतन्न्यासेनोक्तं प्रियविश्वायइत्यादौ अ

गं॰ दे॰

31

पिसम्प्रश्नार्थं भविष्यतीति अनेन हि न्यासग्रन्थेनांगसंज्ञानपेक्षत्वमेवार्थो लभ्यते सच ह्येतत्प्रोक्तमिति न व्या
ख्यातो ह्येतत्सारितमेव यदपि व्याचख्युः यथापि सूत्र वार्तिककृतो रपि एतन्मतं तथापि न्यासकृ
ता विवृतत्वात् न्यासकृन्मतमित्युक्तमिति तदपि स्यवीयः वार्तिककृतास्यार्थस्यास्पष्टत्वात् न्या
सकृता समासे कृते सतीत्यादि वदनात्वङ्कार्थस्य स्फुटत्वव्यक्तत्वेन तद्विवृतत्वाभावाच्च यदप्याहुः न्या
सकृद्ग्रहेन सूत्रकारमेव विवादितमित्यादिना दापनसूत्रकारमते बहुव्रीहाविव्यादिग्रन्थेन सह विरो
धात् भाष्यकारमतेत्वितिग्रन्थेन तस्य विच्छिन्नत्वाच्च तस्मादिह प्राचः प्रक्रियाग्रन्थास्तद्व्याख्यातारश्च
न्यासव्याख्यातारमणीया एवेत्यास्तां तावत् यदि तु प्रक्रियाग्रन्थोपि कथंचिद्व्याख्यायविरोधेन व्याख्ये
य इत्याग्रहस्तर्हि इत्थं व्याख्यायतां ननु प्रियादिष्वपाठयोनित्यगौणत्वयोगस्तदर्थं अतो निकृष्टमाह सूत्रकार
मते इति बहुव्रीहाविति चिकीर्षिते सतीति शेषः गौणत्वमात्र इति मात्रशब्दो वधारणे गौणत्व एव
न तु ततः प्राक् तथाच सूत्रे प्रत्याख्यात इति भावः न्यासकृन्मतस्य तत्र निष्फलत्वात् स्वरूपव्या
क्रिययैव परार्क्रियेत्याशयेनाह त्वत्कपितृक मत्कपितृक इति एतच्च प्राचीनतद्ग्रन्थपरिशीलनशा
लिभिर्विभावनीयं प्रकृतमनुसरामः संज्ञाकार्यमिति सर्वनामसंज्ञाप्रयुक्तं स्मायादिकमित्यर्थः
अन्तर्गणकार्यमिति अद्ड् डतरादिभ्यः त्यदादीनामः तदोः सः सावित्यादिकमित्यर्थः तृतीयासमासार्थे
ति इह सर्वसमूहो विहितः समासोऽप्ययमनेनप्रतिपदोक्तत्वात् न तु कर्तृकरणे कृतेति तेन त्वयकाकृतं

म० टी० ३२ पा० 32

इत्यत्र निषेधो न समुदायस्येति तत्रैव द्वन्द्वशब्दस्य श्रुतत्वात् न च द्वन्द्वे येषां सर्वादीनि इति संबन्धः कार
काणां क्रिययैवान्वयात् न च द्वन्द्वे विद्यमानानि यानीति संबन्धः विद्यतिक्रियाध्याहारे गौरवात् निषेधा
यः भवति क्रियाया एव प्राधान्येन तदन्वयस्यैव न्याय्यत्वाच्च किं च त्यदादीनां द्वन्द्वो नास्ति एकशेषेण बाधित
त्वात् ततः प्राचीनात्वदंताः तत्र काकचोर्न विशेषः न च दक्षिणोत्तरपूर्वाणामित्यत्रेष्टमपि ङवद्भावं
निषेद्धुमिदं किं न स्यादिति वाच्यम् सर्वनाम्नो हि त्रिमात्र इति मात्रग्रहणं क्वचित्सर्वत्वेन मत्वे तद्दृष्टानां सं
ज्ञाभावेऽपि ङवद्भावार्थं अत एव दक्षिणपूर्वस्यै इत्यत्र संज्ञाभावेऽपि ङवद्भावस्तस्मान्न्यायबलात्फ
लबलाच्च समुदायग्रहणमेवोचितं यद्यपि त्वच्छब्दान्तान इति पदे वयवनिषेधेऽपि फलं स्यादेव तथा च
शास्त्रस्याल्पविषयता स्यात् न्यायस्य विरुध्येतेति भावः सद्भूयसंगत इति वर्णाश्रमेतराणामित्यादावि
ति भावः न च निषेधसामर्थ्यं अनेनागमस्य त्रनासिलादेः व्यावृत्त्या चरितार्थत्वात् जसाधारमिति यद्यपि स्था
भावेन जस स्थानिकेऽपि क्रियते तथापि औपचारिकमाधारत्वं बोध्यं यद्वा जसः इर्जसि तस्मिन् नीत्रः समभ्यास
क इत्यर्थं तो व्याचष्टे जसाधारमिति जराया जरमन्यतरस्यां विभक्ताविति एतच्च अष्टन आ विभक्ताविति
त्यतो नुवर्तते तेन जराया इत्यं जारमित्यादौ नातिव्याप्तिरिति भावः पदेति पदमंगं चा विशिष्यते विशेष
णेन च तदंतविधिरिति भावः तदन्तसारिभिरिति इनातो ३२ प्रतिषुर्वषेधे एक स्त्रोपानन्त्वात् स्यादेशो
पि ग्रहीतुमुचितमिति तेषामाशयः अत एव बीजजन्म जरसः परं अप्राचि अज्ञासः पदरूपेत्रम् सिद्धतामिति

श्री० ३२ 32

भारविप्रयोगं प्रसमंजसं मत्वा वीतजन्मस्मस्य द्वातिपाटनीयमिति तैरुक्तं एतच्चेति भाष्यकृतादिह दाङसी
ति सूर्वेत्सूत्रे इनातो प्रत्याख्याय नादेशमदादेशं च विधाय नादेशे परे एत्वं योगविभागेन साधितं बहुव
चने झल्येत् ओसि च आङि चे आङि परे न एत्वं स्यात् रामेण न त आपः संबुद्धौ च आप एकारः स्यात् संबुद्धौ
आङि ओसि च न चैवमनेनैत्वे हलि लोपः स्यादिति वाच्यं अनादेशस्य नकारे परे विशिष्टविधानात्
तथा हि अनापि नकारे आपि च परे न स्यादित्यर्थः सूत्रे इनिनां तस्य न ग्रहणं सकारनिर्देशः न च ङसो दादेशोक्ते
ते परत्वं पस्यादिति वाच्यं अकारोच्चारणसामर्थ्याद्दीर्घसंभवात् इति तथा जरायाजरमन्यतरस्यामिति
सूत्रे उक्तं सोनर्हीयस्त्वाह अनिजरैरिति भवति च सन्निपातपरिभाषयेति एवं च सूर्वविप्रतिषेधेने
त्यादि सर्वं भाष्यविरुद्धमित्यर्थः पद्दन्न अत्र शास्त्र प्रभृतयो निमित्तनयोपाज्ञाः तेच पदाद्यादेशानुरू
पात् प्रकृतिविशेषानादिपंनीत्याह पाददंतेति यद्यपि शीर्षन् च्छंदसीत्यतः छंदसीत्यनुवर्तते
तथापि भाषायामपि क्वाचित्कं विद्वत्वा न मासश्छन्दसीति वार्तिके छंदोग्रहणानुज्ञापकादिति वक्ष्यते प्रामा
दिकमिति तथाहि अस्तो हृकस्य वार्तिकामभीकेशनिमंत्रे आह्नो अवोदित्यर्थः ओचित्याह्नकस्य वि
हर्तिकामेनरस्यादिति मंत्रान्तरसंवादाच्च एवं हव्यात् हृ आनआसनि आसन्यं प्राणमूचुरित्याहावपि र
व्याख्यातं च तथैव वेदभाष्येषु अत एव हरदत्तेनापि काशिकायां प्रमादिकत्वमाविष्कृतमिति ध्येयं
अल्लोपोनः अत्र प्राचः अनं तस्य भस्यांगस्याकारलोपः स्यादिति तथा सतितन्नात्यादौ नकाराकारस्य

म॰ दे॰ ३३

33

पिलोपः स्यात् भस्यांगस्यानोकारस्येति व्याख्यानेन अनर्सम नसेत्यादौ स्यात् नेत्राहृद्ध्यादिनान्तेन स भस्या
नोकारस्येति व्याख्यानेपि अनस्तत्त्वणोत्यादौ अतिव्याप्तिरेव अतो व्याचष्टे अंगावयवस्त्यादि भस्येत्यनेन आदिः
मः प्रत्ययविशेषः अंगं चेति द्वयमनो विशेषणं अनन्तत्र अकारस्य अनो नोक्तदोष इति भावः एतच्च भ्यङः से
प्रसारणमिति सूत्रे भाष्ये स्पष्टं षाष्ठ्यां पदे द्वितीयं तेन समासार्थ्यादेकपदत्वेलक्ष्येपि समानग्रहणं यत्समान
मेव पदं अंतर्वर्त्तिसिनियावत् नत्रयथा स्यात् तेन समासेन भवति राम नाम सुपुत्र इति सुषेमङः शुक्कामलक
सुषगृत्भेदोदीपन मा चन इति दर्शनात् इति पदे त्वितिति एतेन पंचमीसमासस्य पातिकतां ध्वनयति न
थाहि भाष्ये वैभिदिनामायितिकः अपीपचावित्ति प्रयोजन त्रयमुक्तं तच्चान्यथा सिद्धं एकादेउपदेशोऽ
त्यत्र विहितविशेषण अयणादेवबैभिदितेत्यत्र इणिनिषेधेन मापितेपाणिपमस्येति विग्रहे ढकिट स्पेका
देशेयस्येति चेत्यल्लोपे इष्ट्ष्टक्तानेके इति कादेशास्तन भविष्यति दस्याभावात् न च स्थानिवद्भावेन दत्तु
अल्विधित्वात् ढत्रेक इत्यत्राहि स्यान्यादेशयोः अकार उच्चारणार्थः अपीपचावित्यपि णिलोपस्य वद्धुता
कारयोरेकादेशस्य च स्थानिवद्भावं विनापि सिद्धं वितिसाहचर्यात् अभ्यस्तादोपल्लङ एव भेजे सविधानात्
न च सिचा साहचर्यात् लुङ एव किं न स्यादिति वाच्यं पूर्वसाहचर्यात् परसाहचर्यस्य बलीयस्त्वात् इति द
क् पूर्वत्रासिद्धेनेति एतच्चन्यायसिद्धमित्यवोचाम त्रिपाद्याऽसिद्धत्वेन तत्रत्ये [illegible] कर्त्तव्ये अचः परस्मि
न्नित्यनिदेशस्याप्रवृत्तेः तस्येति तस्य पूर्वत्रासिद्धेनेत्यस्य तथा च स्थलत्रये स्थानिवद्भावो वक्तव्य इत्यर्थः

ए॰

ॐ

गं॰ रं

संयोगादिलोपे चक्रात्रुलत्वे निगाल्यते णत्वे माघवपती इहृयस्येतिचेति अल्लोपस्य स्थानिवत्त्वेन र
नकारस्य प्रातिपदिकांतत्वाभावात् णत्वेन यज्वानः कथं वित्त्या निवत्त्वाभावेपि सुप्स इत्यादौ रषाभ्या
मित्यस्यानुपयोगः ष्टुत्वेन सिद्धेः तथाच षग्रहणमुत्तरार्थमित्याकरेस्थितं ततस्तु रभसवादेनैतदु
पन्यस्तमिति सम्यवार्थं रभसवादः तथाहि उत्तरार्थं तथापीह षग्रहणं स्थितं ततस्तु सुप्सः पुष्णाती
त्यादौ रषाभ्यामिति णत्वस्य प्रवृत्तिः केन वार्यतां ष्टुत्वेन इति चेन्न तस्यासिद्धत्वात् न च वचनप्रामा
ण्यात् सिद्धत्वं पुष्णातीत्यादौ चरितार्थत्वात् तस्य प्रयोगेणेत्यंशो चरितार्थ इति चेन्न तस्य पूर्व
त्रोक्तेः इहषाध्वस्येत्यादिरिव चरितार्थत्वस्यापि तत्त्वात् प्राकारेहि षग्रहणं विना लक्ष्यासिद्धिर्नो
स्ति इत्येवाभिप्रेतं ततः पुष्णातीत्यादौ रषाभ्यामित्यस्याप्रवृत्तिरिति दिक्। नलोपः प्रातिपदिकांतस्य न॰
त्यस्य षष्ठीके इति सौत्रत्वात् तत्पुरुषयोः पूर्वपदे सापेक्षत्वेन समासासंभवात् प्रातिपदिक
स्य पदविशेषणत्वाच्चेति भावः तदंतस्येति षष्ठीतत्पुरुषः तस्यांतो यो नकारः तस्येत्यर्थः उक्तं च हरदत्ते
न विशेषणमंतस्येत्यनेन नेत्येतदविभक्तिकं तथैव प्रातिपदिकेत्येतत्पदविशेषणमिति यत्तु प्राचो
क्तं प्रातिपदिकांतस्य पदांतस्य नस्येति यत्तु व्याख्याने अंतस्येत्युभाभ्यां संबध्यते इति तन्नौरवग्रस्तं अं
तस्येत्यस्यावृत्तिप्रसंगात् व्यधिकरणषष्ठीद्वयापत्तेश्च यादृग्भेदेनैव संबंधेन प्रातिपदिकेनैव नेन ने
नापि पदं विशेष्यते तदा विशेषणेन तदंतविधौ सौत्रमंतग्रहणं शक्यमकर्तुं विभाषाङिश्योः प्राति

म॰ दं॰ दूष

34

नपुंसकह्रस्वोनिविहितः ननुजस्शसोःशिः नास्मिन्भत्वासम्भवात् भस्येत्यनेनासर्वनामस्थानस्येव वय
जादेशादेशात् तदेतदाह असर्वनामस्थानेति अतएवैतिदोषणीइतिप्रयोगात् यद्यपिसमाहारद्वंद्वस्यएक
शेषेकृतेपिभाष्यंसुयोज्यं तथापिकज्जादित्यस्यपृथक्त्वादृत्वेन्यायेन्यथाकज्जदृप्कत्वंबाह्वोःद्वित्व
चनलभ्यतेइतिभावः तस्मैपादइवहृदयमस्यदक्षिणांदोर्निषाचरइतिरक्षः तत्रदक्षिणेदोरीति उद्यमेत्यत्य
नेनकर्मतयासम्बध्यते दोषंतस्येति दोषंतस्यतथाविधस्यभजतस्त्रायस्यहृत्तनगुणामिति स्त्रीहर्षप्र
योगः तत्रदोषंहस्तेहर्षणंचभजतस्त्रायस्यगुणमोर्वी अतिशयेचशक्तानिति संबंधः अमरव्याख्याता
रस्तुदोषशब्दंस्त्रियामपिस्त्रीकृत्यभागुरिमतेनदोःपिदोषेत्युक्त्वादोर्दोषाचभुजोबाहुःपाणिहस्तःक
रस्तथेतिधनंजयनिघंटुमुदाजहार: द्वयोरक्ष्णोर्भव इतितद्धितार्थेति समासः कालाहन् द्विगोर्लु
गनपत्यइतिलुक् राजाहःसखिभ्यष्टच् अह्नोह्नएतेभ्यइत्यह्नादेशः अह्नःसायइतिस्यतेः चाजि

इति॰

अवसानवचनःसायशब्दः संख्याविसायेतिज्ञापकादेकदेशिसमासइत्यदंताः हाहानितिगंधर्ववि
शेषवाचकं अव्युत्पन्नंप्रातिपदिकमिदंकौमाराल्लजहातीति हाहाइति क्रियाशब्देवदंतोविसर्गः
वह्नूपमाङः तन्मतेप्रत्युदाहरणेत अकारोवाहदेवःस्यात् तेनसहवर्ततेइतिसाःतान् सानिति बोध्यं
इत्यादंताः अस्त्रीनाम्नियां पुंसीतिनोक्तं अमुनाकुलेनेत्यत्रयथास्यात् नचनुमाद्युपसिद्धिः मुत्वस्यासि
द्धत्वादिकोचीतिनुमोप्राप्तेःनादेशोननासिद्धत्वं नमुनेतिनिषेधात् नचनमुनेइतिनिषेधोऽनुपेवास्तने

गं॰ दूष

इत्यकारस्योच्चारणार्थत्वादिति वाच्यं अनुषंगेऽकृते लोपेन्यायसिद्धापत्तेः अच्चचेः इडड्यामिति ङे.रि

तिशौ इति च पदत्रयमनुवर्तते इत्याशयेनाचष्टे इडड्यामुत्तरस्येत्यादिना छेदनुत्तरस्येति तेनोक्तं

तत्वेद्यैरिन्यस्य षष्ठ्यंतत्वात् नंशाहृद्यादौ च प्रमाणाभावात् औङ् इति एवं तत्वेइडड्यामुत्तरस्य ङे.रि

ति ल्लाम संबंधस्य त्यागायोगाच्च औनपादिति अत्र व्याचख्युः औतात्तत्वं स्वरितार्थं न विभक्तावितीत्व

निषेधस्तु न भवति अनित्यत्वात् अनित्यत्वं च इदमस्य मुरिति थमोमकारस्य तंज्ञापरित्राणार्थं उ

दित्करणात्सुभ्यन्तइनिन तेवोक्तमिति तात्त्विंत्य न विभक्ताविति सूत्रे ङे.रौ न स्तु नकारउच्चारणार्थः

नेत्संज्ञाकइति स्वयमेवोक्तत्वेन पूर्वापरविरोधात् यच्चोक्तं चोच्चारणार्थत्वेन तत्र [illegible] स्वरितार्थत्वं तत्तौ

ऐं बहिंषि सामिधानेष्वमा विन्यादौ स्वरितत्वादर्शनात् अंदिति तपरत्वं तु बुद्धावित्यादावने [illegible] कृते

स्त्रियांटाम्भूत् इत्येतदर्थमित्याहुः तदपि चिंत्यं तपरग्रहणाड्डिटाप सह दीर्घो माभूत् टाप्त

स्यादेव लक्षणद्वयबाधमानाभावात् अनपवृत्तन्मेजंतइति सूत्रे भाष्यवार्तिकयोः विवरणे च स

न्निपातनपरिभाषया टामेतत्रोक्तं टामाव्यवधाने ज्ञानं तर्ये विधानः स्यादिति औत इत्वातोपि तपरकरण

मुच्चारणार्थमेवेत्यवधेयं अनड्सौसोरित्येव सिद्धे अनाड्स्थानमन्यतोपि स्यादिति ज्ञापनार्थं तेनो

शनसः संबुद्धौ अनड्. सिध्यतीति प्राचः तच्चिन्त्यं सोर्डे ऽनक्तोहि अन्ड्स्थाने ऽनुत्तरसूत्रेणापि डाः स्यात्

ननस्वो स्थानेत्यत्र सर्वनामस्थाने चासंबुद्धाविति दीर्घः स्यात् पुरुदंसाइत्यत्र सांत महतनइति स्यात् य

तस्मात्

म॰ दी॰ ३५
35

ज्ञासंज्ञापूर्वकोविधिरनित्यइति योगविभागपरिभाषयावासमाधानंबोध्यम् हल्ङ्याब्भ्योदीर्घात् दीर्घादि
त्येतत् ङ्याप्योरेवविशेषणंनतुहल्लोपसंभवादित्याह दीर्घाविति परामितिनात्विदंविहितविशेषणं या
साकारन्त्यादावव्याप्तेः नचतत्रहल्लेनाद्विहितत्वेननिर्वाहः यःसःइत्यादावतिव्याप्तेःकर्तृत्यादावव्या
प्तेश्चेतिभावः हलितितस्यचहतिसीत्येवंरूपत्वंपकदेशविकृतन्यायेनबोध्यंलभ्यतइति यद्यपीह
लोपोव्योरित्यतोलोपइत्यनुवर्तनेतत्त्वंतत्रभावसाधनंतथापीहकर्मसाधनंहलितिप्रथमांतेनसा
मानाधिकरण्यादितिभावःदीर्घग्रहणंकिंअतिखट्वःनिष्कौशांबिः ॥ नन्विहसमस्तस्याबंतत्वे
नास्ति नचखट्वाप्रत्ययेनतदादिनियमोनास्तीतिवाच्यंग्रहणपसर्जनेनेहि तथाइहहल्ङ्याबुपसर्जनत्वान्तदादि
~~नियमोनास्तीतिवाच्यं ...~~ नियमोस्त्येव सत्यंतथापिउत्तर
पदस्याबंतत्वेनसोस्तुतःप्रवृत्तानुपायात् नहीदंविहितविशेषणमित्यवोचाम अतएवबहुश्रे
यसीत्यत्रहल्लोपःस्यादेतत् गोमीयतेःक्विप् गोमीः इहेकारस्यस्थानिवद्भावेनाप्त्याङीत्वात्ङ्यन्तत्वा
दितिचेत् सत्यं ङीईआश्राप्यइतिप्रश्लिष्टदीर्घग्रहणस्यप्रत्याख्यानात् नकश्चिद्दोषः हतिसीतिकिं
भेत्तानासेतकारस्यलोपोमाभूत् नचैवमपि अभैत्सीत् इत्यादौसिचोलोपापत्तिः हतिभ्यांसाहचर्या
यैणविभक्तेरेवग्रहणात् अपृक्तःकिं भिनत्तिछिनत्तीतिप्रत्युदाहरणंतद्भिन्नंविशिष्टस्याहल्त्वात्
सुतिसीनांहालतिश्लिष्टव्याख्यायानिप्रसंगोपादनस्यानुचितत्वात् यदप्याहुः हरेसुनोतिम्राह

गो॰ ३५

त् नमाचष्टेस्त्रणास्यनिततः क्विप् स्त्रणःस्त्रणासोस्त्रसः इह हनोतेरवयवस्य सस्य लोपंव्याचष्टे
ते श्रुप्तक्त्रग्रहणमिति तदपिन परस्पर साहचर्येण स्नातिसीनांविभक्तेरेवग्रहणात् अन्यथाहि
चोलोपाप्रत्ययकत्वात् प्रत्ययाप्रत्ययोः प्रत्ययस्यैवग्रहणाच्च हलादि किं विभेद् तत्रप्रथमं हलग्र
हणंव्यर्थं हलन्तात्परेषां संयोगान्तलोपसंभवात् अत्राहुः संयोगान्तस्य लोपे हिनलोपादिर्नासिध्य
तिराह्नुते नैवलोपःस्यादुलत्तस्याहिधीयते तथाहि सखेत्यत्रनलोपोनस्यात्संयोगान्तलोपस्यासि
द्धत्वात् स्यादेतत् संयोगान्तलोपोनासिद्धः नङि. संबुद्ध्योरिति सूत्रे संबुधिग्रहणात् ज्ञापकात्
नचैवंगोमानित्यादावपिनलोपापत्तिः ज्ञापकस्याविशेषविषयत्वात् यत्रहि नकारविभक्त्योरानन्त
र्यं तत्रैवासिद्धत्वंव्याख्यानात् यद्वाहुः हेब्रह्मन्नितिनप्रसक्तार्थत्वाच्चैतज्ज्ञापकमितितत्रलुक्का
लमेप्रत्ययलक्षणाभावेनसंबुद्धौवानप्रसक्तानामित्यस्यावधूपकत्वया च संबुद्धिग्रहणस्यनप्रस
क्तविषयत्वासम्भवेनोक्तज्ञापकस्यसफलत्वात् तस्मात्रलोपोनप्रयोजनमितिचेत् नहिभिन्नोद्देश्य
त्रोकत्वेनस्यात् तदिदमुक्तं नलोपादिरिति तथा अभिभर्भवान् अजागर्भवान् इत्यत्रनिलोपोन
स्यात् रात्सस्येतिनियमात् अत्रेदमवधेयं उदात्तग्रहणंसोरेवविशेषणंनतुतिस्योः व्याख्यानात् अ
स्मिन्नेवसूत्रेहिहलग्रहणंतिस्योस्तुग्रहणेनकर्तव्यंभवतीतिभाष्ये चेहप्रमाणं यदिहि अग्रह
णेतिस्योरपिविशेषणंस्यात् कथंतिस्योर्ग्रहणस्याकर्तव्यतांब्रूयात् यन्तूदात्तग्रहणंतिस्योरसंभवपवे

नर्हि

म॰ वृ॰ ३९

36

ति तत्र नात्संभवतीति सत्यं आर्धेनात्त्वचावेद्धिर्वेनालुङः तिप्पिपोस्तपव अगंगात् अगंगाद्गतिपथा
नचप्राप्यत्वथानेपकदेशस्यपूर्वोत्तत्वेनग्रहणात् नचस्यानिवद्भावः अपूर्वविधित्वात् अत्रार्थनिमि
र्षः स्वापःसोरित्येव सूत्रमुचितं नचस्वराःस्वरासोइत्यादौ यानोः सकारेतिप्रसंगः स्वाभ्यांसाहचर्यात्
प्रत्ययाप्रत्ययोरिति परिभाषया च प्रत्ययस्यैव सोर्ग्रहणात् राजेत्यादौ नलोपस्तु नङिसंबुद्ध्योरिति
ज्ञापकेन साधितः पूर्वोभिनोद्वे तिउत्वमपि सूपपादं संयोगांतलोपो रोरुत्वे इति सिद्धकांडे पाठात् हरि
वो मेदिनं त्वेति यथाभिमर्भवानित्यत्रापि न दोषः रान्तस्येत्यत्र नकारस्यापि प्रश्लेषात्सस्येति च्छेदात्
नतु उत्वाश्वादित्यादौ संयोगादिलोपः स्यादिति चेन्न तत्वेक्ष्णेतेनदृष्यामेः असिद्धत्वमिति चेत् न सिद्ध
कांडे वस्वादिषुदत्वमिति पाठात् ननु पदांतत्वाहृत्वं न स्यादिति चेन्न सावपि पदं भवतीति पदत्वाश्रय
णात् नह्वीनं त्व सर्वनामस्थाने यचौति स्थित्वा यज्ञादौ सर्वनामस्थाने पदं नेति व्याख्यातेन चैवं राजेत्या
दौ नलोपे कृते सोरुत्वविसर्गौ स्यातामिति वाच्यं इतो दिति सिद्धे पथिमथ्योरित्याकारविधानेन प्रथमे न
लोपस्य ज्ञापनात् नन्वनेन ज्ञापकं संबुद्धौ चरितार्थत्वात् हे पंथाः हे मंथाः हे ऋभुक्षाः तत्र हि दीर्घो
चककर्तृकगमनं हि पाचक इत्यादेरर्थः एककर्तृका पचिक्रियागामिक्रिया च पचति व्रजत्योः प्र
थमे वार्थः एवं च प्रथमान्तविशेष्यको बोध इति नैयायिकोभाष्याद्युक्तमार्गाद्भिन्नो द्रष्टव्यः यास्कोऽप्या
ह भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानीति पश्य मृगो धावतीत्यादौ तु मृगकर्तृकगमनं ह

२४ नतु४

द्रौ षो ५२

नि॰

म॰ ह॰ ७२
72

ष्टिक्रियायोः कर्मप्रधानं दृष्टिक्रियैव उक्तं च स्वर्वेनं हि यद्यनेकं तिङन्तस्य विशेषणं तथाऽतिङन्तमप्या
ख्यातिङन्तस्य विशेषणमिति एवं पचति भवतीत्यस्य पचिक्रिया भवतीत्यर्थः अयं तु विशेषः तिङन्तो
पस्थितायाः क्रियायाः क्रियान्तरं प्रति विशेषणत्वेऽपि शब्दाध्याहारवादे कर्मत्वं संसर्ग एव न तु प्रकारः
अपदार्थत्वात् अर्थाध्याहारवादे तु प्रकारत्वेऽपीष्टापत्तिः पचतीत्यादौ धात्वर्थपाकफलस्यापीत्थमेव
मतभेदेन व्यवस्था अत एव तत्समानाधिकरणे शोभनं पचतीत्यादौ द्वितीयैकवचनोत्पत्तिः अग्निष्टो
मेन यजेतेत्यादौ तृतीयोत्पत्तिश्च संगच्छते न च दृष्टान्ते विशेष्यसमर्पकात् दार्ष्टान्तिके च विशेषणस
मर्पकाच्च कर्मत्वादिवाचिकायाः द्वितीयाविभक्तेः प्रयोगोऽस्त्विति वाच्यं धातुतिङन्तयोः समानपदिकत्वात्
नैयायिकानां तु स्यादेष दोषः तथा हि धावन्तं मृगं पश्यति वल्गवति मृगमित्यपि स्यात् न चाप्रथ
मासामानाधिकरण्ये शानच्छानचोर्नित्यत्वान्नैवं प्रयोग इति वाच्यं एवमपि द्वितीयान्तत्वापत्तेः दृष्टप
दत्वात् न तु तत्र वाक्यभेद एव पश्य त्वं प्रयत्नमिति कर्माध्याहारात् पचति भवतीत्यादौ तु पाचको
भवतीत्याद्यर्थे निष्ठमेवेति चेन्नैवं अध्याहारे गौरवात् तस्यैकतिवचनविरोधेनाप्रमाणिकत्वात्
यो॰ त्वदीनिच्छामात्रस्याकिंचित्करत्वात् अपि च अपाक्षीत् देवदत्तोऽवेदीत्यादौ शत्रादेः प्रसङ्ग एवना
स्ति एकवाक्यत्वं च भाष्यवार्तिकादिसकलसंमतं न चातिङन्तस्य ले क्रियाविशिष्टक्रियान्तरबोधनं
जायते एवेति वाच्यं तथैव व्युत्पन्नानां तादृशबोधस्यानुभवसिद्धत्वात् ईदृशोऽर्थे साधकत्वेनेष्टमित्यपि च

से॰
७४

साधकत्वात्तच्छासनार्थं मनुष्ये देवदत्तस्वीकारात् धातुसंबन्धाधिकारे क्तप्रत्यादिति परीमवस्कन्देत्यादौ
तस्यावश्यकत्वाच्च नन्वसिद्धान्ते आख्यातवाचिक्रियाया आश्रयकर्तृत्वकर्मत्वस्वीकारे तस्याश्रयत्व
रूपत्वं भज्यते इति चेन्न लिङ्गसंख्ययोः कर्तृकर्मतत्कारकस्य चाभावमात्रेण तथात्वोपपत्तेः कर्मत्व
स्य प्रकारतयानन्वयप्रमाहेत्यन्यत्र विस्तरः अभिहितत्वेति नन्वेवं पच्यते ओदनो भुङ्क्ते इत्यत्रापि द्विती
यानस्यात् इति चेन्नैव इह हि पचिभुजिनिरूपिते हेतुकर्मत्वशक्ती तत्र प्रधानक्रियानिरूपितायाः अ
नभिहितत्वाच्च शक्तिमादाय द्वितीयोपपत्तेः उक्तं च हरिणा प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथ
क् शक्तिर्गुणाश्रयात्तत्र प्रधानमनुरुध्यते प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते यदा गुणे त
दा तद्वदनुक्तापि प्रतीयते कर्मशक्तिरिति अत एव पच्यते ओदनो भुज्यते इत्यत्र भुजिप्रत्ययेनाभिहिते प्र
धानेऽपि पचेः प्रधानत्वात् बहुलं न स्यात् पक्वा भुज्यते इत्यादौ कर्मणः पचिभुजिभ्यामेकरूपप्रकारान्वयः कि
न्तु नवेनाह अपरेणार्थः तत्र च प्रथमाद्वितीये व्यवस्थिते एव तद्यथा पक्वा भुज्यते प्रयुज्यते न
दा भुज्यते इत्यत्राप्योदनेन इति गम्यते एवं च विवक्षाभेदे न पूर्वोक्तं शक्यते हरिर्हरिं वेत्त्रभयं साध
प्रामानेद इति आनेदकान्तेकप्रासिकमीभूत इत्यर्थः यदुक्तं प्राय्येणेति तत्फलमाह क्वचिदिति
विषये इति यदि तद्विधिविषयोरन्यतरेण सह कर्मतयान्वयो विवक्ष्यते तदा द्वितीया स्यादेवेति
ध्येयं । लोणं स्पृशतीति यथा स्पृश्यमानस्य गङ्गादेरीक्षितस्य क्रियया योगः तज्जन्यसंयोगादि

ओदनः किं पक्वा
पत्रिंदनं पचति
ओदनं पक्वा भुज्यते
इति ॥

म० र० ७३
73

फलाधारत्वात्तथैवानीप्सितस्य तृणादेरप्रीतिभावः स्यादेतत् धात्वुपस्थाप्यफलशालिकर्मेत्येवास्तु किमी
प्सितानीप्सितयोः पृथक्कथनेनेति चेन्मैवं अग्नेर्माणवकं वारयतीत्यत्र वारणार्थानामिति सूत्रेण माण
वकस्यापादानत्वंप्राप्ते तद्बाधाय कर्तुरीप्सिततमं इति तत्र कर्मत्वमेव एवं च द्वेष्योदासीनयोः संग्रहार्थं त
[illegible]थायुक्तं चानीप्सितमित्यस्याप्यावश्यकत्वात् अनीप्सितग्रहणं तत्स्पष्टार्थमेव न त्वावश्यकं इदं त्ववधेयं ईप्सि
तानीप्सितयोः शाब्दबोधपर्कंपव ईप्सानीप्सादेरधिगोजादिवत्संज्ञाप्रवृत्तौ अनुपयोगोऽपि द्वितीयावा
च्यकोटौ प्रवेशात् अत एवानन्यलभ्यस्यैव शाब्दार्थत्वात् कर्मणि द्वितीयेति सूत्रेऽपि तत्तत्सूत्रैर्यावन्तां कर्मसं
ज्ञाविहितास्ते सर्वे तेन रूपेणोपस्थिता स्तेभ्यश्च विधीयमाना द्वितीया आधारवाचि कालाद्यवात् क्रियाया आधा
रतानाकर्तृत्वस्य देवदत्तादिशब्देऽलाभात् इष्टतमत्वादेस्तु भानाभावात् प्रकृतिप्रत्ययार्थयोश्चाभेदसंस
र्गः तथा च हर्याधारिका या प्रीतिस्तदनुकूलव्यापारो वाक्यार्थः यद्यपि कर्मणि कर्तरि अधिकरणे च
विहितानां द्वितीयादीनामाधारोऽर्थ इति तत्त्वं तथापि तन्निरूपकं फले व्यापारः स्वाश्रयद्वारा तदुभयं चे
तिफलीभूते शाब्दबोधे वैलक्षण्यं संगच्छते तदाधारतैव वाच्येति मतं तत्त्वं तन्निष्ठधर्मत्ववाच्यतावच्छेदक
तापत्त्यातिगौरवात् कर्मणि द्वितीयेत्यादिसूत्रस्वरसभङ्गापत्तेश्च अत एव भाष्यकार आह सुपां कर्माद
योऽप्यर्थाः संख्या चैव तथा तिङामिति न चातिङ्क्ष्वापि धर्ममात्रमर्थः कर्तरि ह्युक्तं कर्मणि च तयोरेवक्त
त्वक्तलक्ष्या इति सूत्राणां वैयर्थ्यापत्तेः पाचको देवदत्तोऽत्र पचत्योदन इत्यादौ सामानाधिकरण्यात्

श्री० ७३

रोधेनधर्मिवाचकतास्वीकाराच्च तस्मादिहघटादिशब्दानामिव विशिष्टमेव वाच्यं प्राकृतत्वाधिकरणे भूप
गतेनहृतत्वापि धर्ममात्रं सर्वव्यापि नैयायिकमीमांसकाद्यभ्युपेतमर्थजातीयं ज्ञेयमेव नहि हि नित्युक्तौ वै
लक्षणं सूत्रपादं प्रपञ्चितं चैतन्नाहूकौस्तुभे अस्माभिरित्यलमियता परिगणनमिति तेनन दुस्य
गाद्यं सूत्रणेनेत्यादौ नातिप्रसङ्ग इति भावः गां दोग्धीति गोसंबन्धि पयः कर्मकं दोहनमर्थः स्यादेतत्
कर्तुरीप्सिततमं कर्म तथायुक्तं चानीप्सितमिति सूत्राभ्यां गतार्थमेव तथाहि त्यजनोपसर्जनेत्याजने
ऽङ्गेरर्थः दापनमङ्गीकरणं याचेः विच्छेदनं पचेः इत्यादि एवं च धातूपात्तव्यापारविषयीभूतं यत्याज
नदानाङ्गीकारादिनदाश्रयत्वं गवादीनां स्पष्टमेव अत एव हि अणौ कर्ता णौ कर्म त्वस्यन्यायसिद्धतया
गत्यादिसूत्रे नियमार्थमिति प्राचां सिद्धान्तः अत एव चाकथितसूत्रे अपादानग्रहणं गां दोग्धि पयइ
त्यत्र परत्वात्कर्मसंज्ञेति भाष्यसङ्गच्छते पञ्चकर्मनिपदिकार्थ इतिपक्षे विधित्वफलाश्रयत्वयोग
पट्ठिवक्षायां चेदं अवधिभूतायागोः तन्निष्ठोयः पयः क्षरणानुकूलव्यापारस्तद्विषयीणी गोपनिष्ठस्य
णोल्पस्यांत तथा चाकथितं चेति सूत्रं व्यर्थमिति चेत् अत्रोच्यते कर्मणः शेषत्वेन विवक्षायां माषाणामश्नी
यादिति वत्षष्ठीप्रामा तो बाधितुमिदं सूत्रं तथा चेह षष्ठीवत्संबन्धमात्रे द्वितीयार्थ इति स्थिते अपादान
त्वमात्रविवक्षायां तु पञ्चम्येव गोः क्षीरं विशेषणत्वे तु षष्ठी तेन गोः पयो दुग्धीत्यपि प्रयोगः साधुरेव
एवमेणुस्य यत्तु प्राचोक्तं दुस्याद्यर्थकधियाज्ञाचि सूत्राद्वि कर्मेयुक्त नीहरत्यन्यवहू देड्ग्रहणं च

म·
रं·
७४
74

कर्मभावाविति सूत्रे देवेत्यत्र यदुक्तः पाठो निर्मूलः तथाहि ध्वनत्तेरकर्मकस्योदाहरणमप्यसङ्गतं इतरे चोक्तिकर्म
कत्वं यद्यपि प्रामाणिकं तथापि सन्दर्भोऽशुद्धः तथाहि दुह्यादीत्यादौ सूत्रे शेषेनेत्युपादाय भावकर्मक्रि
याशेषे लक्षणत्वज्ञात्वलात्प्रोः किं हि द्विकर्मके प्रयोगात्प्रत्येकमणिसूत्रः गौणे चेत्यादौ कारो यो स्वयमेव पठितः त्वादि
योऽपवृत्तं निष्कर्मगत्यर्थोऽतः प्रत्येकमणि अन्यथा यथादिदुह्यादिगौणे न्यं यथाकचिदिति एवं च दौगस्मादिभ्या
मपि प्रसक्तोऽस्यात् तथा च गर्गान् शतं दण्डयतीत्यत्र मिति भाष्ये विरुध्यते शतेनात्र प्रधानेन गर्गाः प्रार्थितं स्वराजानो
हिरण्येन भवन्तीति वाक्यशेषात् दौर्गस्य हृदयहरणार्थो न तु नियमार्थः अतएव स्यात्र सम्प्रदाये वाक्यसमाप्तिः
गुणानुरोधेन प्रधानात्रानुरोधसंभवात् तथामस्य व्ययपि प्रधाने स्यात् इष्यते न तु गौणे तथा च भारविः येनापवि
द्धसलिलस्फुटनागसद्मादेवासुरैरमृतमम्बुनिधिर्ममन्थे इति अत्राः अमृतं प्रत्युद्देशकत्वात् अम्बुनि
धिस्तु गौणः यद्यपि व्याख्यातरः प्राहुः द्विकर्मके अप्यरेचे प्रामाणिकः पाठ इति तदसत् तथाहि कर्मवत्क
र्मणेति सूत्रे दुहिपच्योर्बहुलं सकर्मकयोरिति वार्तिकेन भाष्ये च पचेर्द्विकर्मकता लभ्यते कौमुद्यादाहरद
ग्राभ्यां च न तथैव स्फुटीकृतत्वात् माधवोऽप्याह तयनेः कर्षतेः मन्थेश्चेति बोद्धव्य इत्यनेः पचेश्चेत्यादि उदाजहारच
तण्डुलानोदनं पचतीति यत्त्वकथितं चेति सूत्रे इह दत्त्वोक्तं अकथितशब्दोयत्रः प्रधानार्थोपेक्ष्यते तदा
पाणिनाकोऽस्य प्राप्त्योर्दोरिध यथा सत्त्वं पाणिकोऽस्य प्राप्त्यौ रूपि स्यात् करणाधिकरणयोस्तु पञ्चम्यादिरव
काशः न हि तत्रास्य प्रसङ्गोऽस्त्वाहादिपरिगणनादिति तन्मनानुसाराभिप्रायेण अन्यथा उदाहृतस्वपरग्रन्थाविव

१
२
३
रो·
७४

रोधादित्यास्तांतावत् शतंजयतीति जिधातुरभिभवे यद्यपि जयतेरिति व्याख्याने तत्र न स्यात् अकर्मकत्वात् यद्य
पि जयत्यादयो भाष्येन पठिताः तथापि चकारेण संगृह्यन्ते इति कैयटः ग्रन्थं निबध्नातीति तत्स्वरूपाश्र
यामग्रहणमपीदमचोद्यं चोद्ये इति तत्राजस्तु भाष्ये दृष्टिपर्यायस्य दृशेरपि द्विकर्मकत्वदर्शनादिति भा
वः तथा च भट्टिः । स्या स्मृ रणे स्मर मा स्रोज गाद मारीच मुच्चैर्वचनं महार्थं कालिदासोपि शिलोच्चयो
पि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव । भारविश्च उदारचेता गिरमित्युदारां द्वैपायनेनाभिदधे
नरेन्द्र इति एवं च नाथत्यादयो बहवो द्विकर्मका बोध्याः देशः इति कुरुन्पंचालादिरेवेह गृह्यते तेनाधिशी
ङ्स्थासां कर्मत्वादेर्नैवयथा गोदोहमिति न चेह कालत्वाविवक्षा लोके कालत्वेन प्रसिद्धस्य मासादेरेव ग्र
हणात् तेन षट्मासान् इत्यादि न भवति यत्तु प्राचोक्तं अकर्मकधातुभिर्योगे देशः कालाध्वभावेभ्यो द्विती
येति केचित् नदीमास्ते इत्यादि अत्रेदं वक्तव्यं कर्मसंज्ञाया अत्र कालत्वात्कर्मणि लादयो न स्युः आस्यते
मासः इति यथा केचिदित्यप्यसङ्गतं द्वितीयायाभाष्यसंमतत्वात् नदीमास्ते इति प्रदेशमात्रे तेन ग्रामंस्व
पितीति प्रसंगात् अत एवाकारे प्रधागतत्वत्वेन विशेषितः गन्तव्यत्वेन प्रसिद्धो नियतपरिमाणः क्रोशादि
रिति च व्याख्याने गतिबुद्धि प्रत्यवसानेभक्षणे शब्दकर्मकाणामिति शब्दः कर्मकारकं येषामित्यर्थः नलि
हकर्तेविकर्मव्यतिहारे इति वल्लभे शब्दः क्रियापरः स्रांत्रिमेकाये समन्वयात् कर्मग्रहणसामर्थ्याच्च
अन्यथा हि गतिबुद्धिप्रत्यवसानशब्दार्थाकर्मकाणामित्येवावक्ष्यत् नियमार्थं चैतत्सूत्रमिति प्राञ्चः ॥

नभवतीत्याकरात्
ग्रध्येतिवन्मूतं ग्रध्यानं
स्वपितीति ४

इत्युदाहरणमस
त्रंतं ग्रामसमूहः
कुर्वादिरेवदेशग्रह ६
तेषा ५

म॰
२॰
७५
75

जर्थेण[illegible] मा न्न स्य यदि भवति नहि गत्याद्यर्थानामेव कर्तुरिति नेन पाचयति देवदत्तो यज्ञदत्तेनेत्यत्र
प्रयोज्य प्रकृत्यर्थं प्रति कर्तृत्वस्यैव निरपवादत्वेनावस्थानात् तृतीयासिध्यति उक्तं च गुणक्रियायोः
स्वातन्त्र्यात्प्रेषणे कर्मतां गतः नियमात्कर्मसंज्ञायाः स्वधर्मेणाभिधीयते इति कर्तुः स्वधर्मेण तृतीया ये
त्यर्थः नन्वणिजर्थं प्रति कर्मत्वं बाधित्वा प्रकृत्यर्थं प्रति कर्तृत्वं परत्वादेव सिद्धं अन्तरङ्गत्वाच्च स्वकार
कविशिष्टा हि क्रिया णिजर्थेन सम्बध्यते हेतुमति णिज्विधानात् कर्तृप्रयोजकस्य हेतुत्वात् अत एवोप
जीव्यापि कर्तृसंज्ञा एवं च परत्वादन्तरङ्गत्वादुपजीव्यतयापि च प्रयोज्यस्य तत्कर्तृत्वं गत्यादेर्विधितो
चितेति चेत् अस्त्वेवं लक्ष्यस्य निर्बाधत्वात् नियमसूत्रमिदमिति ग्रन्थानां का गतिरिति चेत् शृणु णि
जर्थस्य शाब्दं प्राधान्यं प्रकृत्यर्थस्य प्रधानानुरोधित्वात् कर्मसंज्ञायाः प्राबल्यात् विप्रतिषेधवचनात्तेऽत्र
रङ्गोपजीव्यत्वेऽप्रधाने प्रति न प्राबल्यं प्रयोजयन्नपवादत्वाशयेन ग्रन्थानामुक्तिसम्भवः अर्थप्राधान्यपुर
स्कारेण विधायकत्वमेवोचितमिति ध्येयं यान्तु द्विति स्वर्गं कर्मकं शत्रुनिष्ठं यद्गमनं तदनुकूलो यो विषे
व्यापारः सन्नो हरिमगतिरित्यर्थः नन्वक्षय स्वर्गस्य कर्मत्वं कृत्येऽपि तन्न मोहिकर्मस्वच्छ यात्राः कर्तारः
तेषां गत्यादिसूत्रेण कर्मत्वाद्वि चेन्न मैवं कर्मसंज्ञायां हि कर्तृग्रहणं स्वतन्त्रस्योपलक्षणं स्वातन्त्र्यं च धात्व
र्थव्यापाराश्रयत्वमेव न च प्रयोजकसन्निधौऽपि प्रयोज्यस्याप्येवं न चोपलक्षणत्वे प्रमाणाभावः
प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणां अप्रधाने दुहादीनामिति सिद्धान्ते कर्तुः स्वकर्मणा इति व

ग्रो॰
७५

नि॰ १ ने॰ २

दत्तो भाष्यकृतैव वा तत्प्रमाणत्वात् न हि लक्षणं विना णौ जन्मनो ऽद्धि कर्मकता लभ्यते येन ण्यन्तकर्तुरिति
वचनं सावकाशं स्यात् ननु स्वनन्ते संगृहीतिनस्य नन्वेवं लक्षणाकथमस्मीति चेत्संज्ञान्तरानुपादाने संगृहीतिनस्य
नञ्पादाने साधारणे स्वनं तत्र मात्रे सेत्यवधेहि नीवह्योरिति वहग्रहणं नयोः प्रापणमर्थो न गतिरिति स्थापि गति
रपि विशेषणीभूय प्रापणमध्ये प्रविष्टेत्येतावन्मात्रेण प्राप्तिमत्वात्प्रतिषेध उक्तः नियन्त्रेति नियन्ता प्र
प्रेरकः न तु सारथिरेव तेन वाहयति बलीवर्दान् यवानिति सिध्यति प्रतिषेध इति प्रयोजनः कर्मेति व
क्तव्यमिति फलितो ऽर्थः सूत इति नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः । प्रादयतीति प्रकर्त्रभि
प्राये फलेशे षात्कनेरि परस्मैपदं कर्त्रभिप्राये तु णिचश्चेत्यात्मनेपदमेव तदपवादस्य निगरणचलना
र्थेभ्यश्चेत्यस्याप्यत्रैः प्रतिषेध इति निषिद्धत्वात् सस्यामिति देवदत्तस्यानां यवानां भक्ष्यमाणानां हिंसा इष्टव्या
तस्यामवस्थायां तेषां चेतनत्वात् स्मारयतीति यत्तु णेरणाविति सूत्रे स्मारयत्येनं वनगुल्मः स्वयमेवेत्यु
दाहियते तत्र भाष्यप्रयोगादेवाकर्मकत्वं बोध्यं शाह्वायत इति शब्दं करोतीत्यर्थे शब्दवैरेत्यादिना क्यङ् न
तोह्वेतमांसिच । धात्वर्थेति यत्नेन शाह्वायति सैनिकैरित्युदाहृतिनिकर्मप्रत्ययान्तेनाः परस्मैः यद्यप्याचात्र
यङ्गान्तशाह्वाय क्रमेणानेनोक्तं तदायते क्रियास्ताविति सूत्रे लेव कान्दकोमोक्तशाह्वक्रियान्तमात्रेणप्राप्तिसं
भावना वक्तनक्तनामो सूत्रार्थस्तूक्तं यदीपक्षुग्रहणं हर्षामिति कर्मत्वमुक्तं तत्र हर्षग्रहणं प्रमाणाक
मेव सूत्रेणैतत्त्वशाह्वकर्मत्वाभिमतं यद्देवदत्तकर्मत्वं यद्यपि तथा कार्यदीनां संमतेन तथापि बहूनामसंम

म· र· ५५
26

तं अत एव अणिग्रहणं जनकोऽथस्लादिति भट्टिप्रयोगे अणिग्रहणं बोधितवानिति व्याचष्टः तथा अण्याविना
वेन हि देवदेवमहिः स्म नो ग्राहयिता शशाके इत्यत्र ग्राहयितृ शब्दस्य स्वत्वेन बोधयितुमिति फलं चेतनत्। ग्राहेर्हि
कर्मके त्वि ह जायां प्रतिग्राहितं गन्धमाल्यमित्यत्रैव प्रयोज्यायाधेनोऽभिधानं स्यात्। एवं त्वकर्मकत्वे सुकर्मणा
इत्युक्तेः तत्तस्त्र जायया गन्धमाल्ये प्रतिग्राहितामिति स्यात्। सिद्धान्ते तु प्रतिग्राहिते गन्धमाल्ये यथेति विग्र
हः जाया निष्ठं परेण विषयीभूते गन्धमाल्यक मेकं यत्प्रतिग्रहणं तत्कर्त्रीमित्यर्थः अन्यपदार्थानभावेण
व विशेषणविशेष्यभाववैपरीत्येनैवैकार्थीभावकल्पनात्। अभिवादिदृशोरिति अभिवादयतेः प्रामेदृशेल
प्राप्ते विभाषेयं अभिरिति नेरल्पान्तरत्वेन पूर्वनिपाते कर्तव्ये विपरीतं चारणमीदृशसम्प्रदायविवक्षार्थं
इत्याह संज्ञानपूर्वस्येति तेनेह न निवर्तते यदि स्मृकशिष्यापदेश इति क्वचिन्नेति पृष्ठेषेषाभिनिविष्टाना।
मिति भाष्यप्रयोगस्त्वेहमाने उपपदविभक्तिमाह उभसर्वतसोरित्यादि उभसर्वयोस्तसौ उभसर्वतसौ
न्तदत्रयोगे द्वितीयाकार्यैत्यर्थः अत्रप्राञ्चः उभशब्देनोभयशब्दो लक्ष्यते अन्यथानसोः संभवादित्याहुः
वस्तुतस्तु तद्धितविषये अयच्प्राप्तावपि उभशब्दाद्धितेनोयस्य लोकसर्वेवेति यथास्कन्दनेसाथ धिगित्यावि
भक्तिको निर्देशः गविन्यथमाहेति वर्द्धेतिप्राञ्चः नत्र तथा च सत्यः प्रत्ययेन याह्णष्टाने लोपः शाकल्य
सोत्यस्येवदाष्टीतिके जभत्वस्याप्यप्रवृत्तिप्रसङ्गात् न चायंगकारान्तएवेति भ्रमितव्यं कस्य च इति स्त्र
त्रे धकिदित्सूदाहरणस्याप्यसङ्गतिप्रसङ्गात् तस्माद्विधेनिविभक्त्यन्तमेव प्रकृतिवदनुकरणमित्युनिर्दे

न्मस्५७

गे· ५५

गात्स्यपोत्सुक उभयतः कृष्णमिति कृष्णस्य पार्श्वद्वये पीत्यर्थः आद्यादित्वात्तसिः षष्ठ्यर्थे द्वितीया एवञ्च
उपपदविभक्तौ सर्वत्रबोध्यं नाम्नो द्वितीयैव संबन्धः सर्ववाक्येष्ववस्थितः समानाधिकरणेन षष्ठ्यावा पिन्न
विन्नवेन इ निवृत्तोक्तौ षष्ठीग्रहणं तदपवादविभक्तेरप्युपलक्षणं द्वितीयोक्तेः सामानाधिकरण्यवैय
धिकरण्याभ्यां निर्वाह्या षष्ठी तदपवादयोरेककोटिन्यायावा धिक्कृष्णाभक्तमिति तस्य निन्दितेत्यर्थः
कथं धिङ्मूर्खेति सम्बोधनपदस्य क्रियान्वय इति प्रागेवोक्तत्वात् धिक्शब्दयोगाभावात् क्रियापदं च
क्वचिद्गुप्तं क्वचिदादिममित्यनुपदेनैतत् तथा च मूर्ख इति सम्बोध्यकं निषिद्धाचरणादि निन्द्यमिति वाक्यार्थः चित्र्
एतेन हा तात हा देवि धीरा भवेत्यादि व्याख्यातं यत्वाक्तः उपपदविभक्तेः कारकविभक्तिर्बलीयसीति
सम्बोधने प्रथमैव भवति सम्बोधनपदस्य कारकवाचित्वादिति तन्मन्दं सम्बोध्यस्य कर्तृकारकत्वा
क्तिसम्भवाभावात् देव प्रसीदेत्यादौ वत्स गच्छेत्यादेव एव कर्त्रेति चेत् नैतावता कारकविभक्तित्वलभ्य
ते किं च देव त्वां भजे तां भजन्तीत्यादौ सम्बोध्यस्य वास्तवमपि न कर्तृत्वमित्यलं तावत् उपर्युपरीति
कथं तस्मुपर्युपरि वृद्धीनां चरन्तीस्वरवृद्धयः उच्यते उपरि वृद्धीनां उन्नतवृद्धीनामुपरि चरन्तीत्यर्थः एवं
चाम्रेडितत्वाभावान्न द्वितीया यत्तु आप्र निपदोक्तस्योपर्यधः सामीप्य इति कृतद्वित्वस्यात्रग्रहणं तेन
वीप्सा द्विर्वचने सति नास्य प्रवृत्तिः अन्यत्रापि दृश्यत इत्युक्तं तदृष्टं यति प्रभितः परितः इति प्रतिभातीति
एषु प्रतिशब्दः क्रियाविशेषकत्वादुपसर्गः न तु कर्मप्रवचनीयः अन्तरान्त्वां मामिति नव मम च मध्ये इ

म॰
३॰
११
77

त्यर्थः सामर्थ्यादिति अत एवैतत्पर्यन्तमपि शाब्दबोधविषय इति स्वीक्रियत इति भावः नदीमन्ववसितेति
द्वितीयायाः सम्बन्धोऽर्थः स चेह साहित्यरूपः तस्याश्च नाद्योत्यत्वे लक्षणेत्थंभूतप्रतीति वृक्षसम्बन्धोऽर्थेन
नमर्थः सम्बन्धस्य लक्ष्यलक्षणभाव इति मत्वा[illegible]दद्योतनार्थेति भक्तो विष्णुं प्रतीति विष्णुर्भक्तेः स्वविष
यिविषयभावः मत्वा[illegible]दिद्योत्यः। लक्ष्मीरिति। लक्ष्मीरूपस्य भागस्य हरिणा सह स्वस्वामिभावः वृक्षं
वृक्षं इति इह वीप्सा द्विर्वचनेनैव द्योत्यते परिशब्दस्तु क्रियया सम्बध्यते कर्मणि द्वितीया कर्मप्रवचनी
यसंज्ञयोपसर्गसंज्ञाया बाधात् षत्वेन एतदर्थमेव लक्षणादयो विषयतयोपात्ताः इति व्याख्यानमाक
रे पञ्चम्यपाङ्परिभिरिति तन्न भवति वर्जनार्थेनापेत्यनेन साहचर्यात् मामभिष्यादिति मम भागः स्या
दित्यर्थः माम[illegible]भिष्यादित्यपि प्राञ्चः मत्पुदाहरन्ति तत्र मामयादित्यर्थः उपसर्गवशेनास्तेः सकर्म
कत्वान्मामिति द्वितीया अत्र च मम भाग इत्यर्थः पर्यवसानात् सुभागे इति कर्मप्रवचनीयत्वे निषि
द्धेऽनुपसर्गत्वात् प्रादुर्भूयामिति निषत्वं सृजायोचेति स्वः सृजायामिति पूर्वेह्णात्सृजाग्रहणमनुकृष्यते का
लाध्वनोः अत्रैव विरामममनिक्षाञ्जोः त्यन्तः सचासौ संयोगः निरन्तरसन्निकर्ष इत्यर्थः द्वितीया स्यादिति
अनन्वात् कालाध्वभ्यामेव मासमास्त इति ह्यावि[illegible] प्रयोगे कालेऽधिकरणे इति षष्ठी स्यादतः तत्र न
त्रशेषग्रहणानुवृत्त्या द्विरुक्तो भेजनमिति कृदन्तेन सह समासनिवृत्तेरेव फलत्वात् तस्मादिह षष्ठी
शेष इति सूत्रेणैव षष्ठीति तत्त्वे इति द्वितीया स्वतन्त्रः कर्ता प्रधानीभूतधात्वर्थं प्रति आश्रयत्वेनाते

ॐ॰
११

त्वं आह च धातुनोक्तक्रियेति त्वं कारके कर्तृत्वेनेष्यते इति साधकतमं करणं प्रकृष्टेति यद्व्यापारानन्तरं
क्रियानिष्पत्तिः तत्प्रकृष्टं उक्तं च क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरं विवक्ष्यते यदा यत्र करणं त
त्तदा स्मृतमिति विवक्षणेनस्त्व नेन स्थाल्यादीनामपि विवक्षितं करणत्वमस्तीति ध्वनयति आह च वस्तु
तस्तदनिर्देश्यं न हि वस्तु व्यवस्थितं स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यत इति अयं भावः कारकत्व
तद्व्याप्य कर्तृत्वादिषड्भेदं च वस्तु विशेषे विशेषणविशेष्यभाववत् व्यवतिष्ठते नहि गौः सर्वं प्रति गौरेव त
त्कंचित्प्रत्यगौरिति विद्विशेषणं विशेषणमेवेति स्ववचं तथा च कथा चिज्ञात व्यवस्था उपस्थापितेऽर्थे किं
कर्त्रादिकमिति प्रश्ने प्रकृत व्यक्त्युपात्त व्यापाराश्रयतया विवक्षितः कर्ता व्यापारस्याधिकरणं फलाश्रयः
कर्म कर्तृकर्मद्वारकसम्बन्धेनाश्रयोऽधिकरणं पच्यर्थो व्यापारस्त्वनेकधा एवं च पचेरधिश्रयणं तण्डु
लावपनैधोपकर्षणादिनानार्थकत्वे तदाश्रयो देवदत्तः कर्ता ज्वलननानार्थकत्वे एधाः कर्तारः तण्डुला
दिपरत्वे स्थाली कर्त्री अवयवविभागादिपरत्वे तण्डुलाः कर्तारः स्थाल्या पचतीत्यत्र तु तदीयोपात्तव्यापारा
श्रयोऽपि स्थाली करणमेव तत्र कर्त्री देवदत्तादिव्यापारस्यैव तादृशाद्दृ उपात्तत्वात् तथा श्रादित्वादिस्थाप्युपा
तेऽर्थे प्रयोज्यः कर्ता तस्मिन्नेवार्थे भक्षयतितोपात्ते कर्म अधिपूर्वैः शीङ्स्थादिभिरुपात्तेऽर्थे आधारः कर्मकेव
ले रूपात्ते अधिकरणमित्यादि परास्तं शाब्दविशेषोपाधिकस्य कर्तृत्वादेः प्रत्यक्षादौ उक्तासंभवात् एतेन ज्ञा
नस्य स्वप्रकाशत्वे कर्तृकर्मविरोध इति भावः एतेन परसमवेतक्रियाफलशालित्वं कर्मत्वं चेत्पादा

नेतिव्याप्तिरित्याशंक्याथात्वर्थतावच्छेदकफलशालित्वं तदिति परिष्कृतेनोपि प्रत्युक्ताः ग्रामंगमयति ।
देवदत्तमित्यादौ गन्तरि प्रव्याप्तेः तत्प्रतेगमनस्य प्रकृत्यर्थेपि न धात्वानवच्छेदकत्वात् तत्वेवापाचयत्या
दिप्रयक्तृप्रकर्तेर्येतिव्याप्तेः तत्रपारिभाषिकमत्रशासनोपयोगिकर्मत्वंवचनबलात् व्यवस्थितमिति चेदः
पादानेपि नहितत्रास्तीत्यवधेहि पकसंज्ञाधिकारेः नवकाशायासावकाशायाबाधात् ग्रतपवात्मनमा
त्माहन्तीत्यादौ परयाकर्तृसंज्ञयाकर्मसंज्ञाबाधमाशंक्याह हृक्रोरादिविधिप्राप्तभेदमाश्रित्य समाहि
तेभाष्ये रामेणेति यद्यपि विभक्त्युपस्थितानां कारकाणां क्रियायां प्रतिविशेषणत्वेनैव तथापि कृदुपस्थिता
नां विशेष्यत्वेनैव सत्त्वप्रधानानि नामानीत्युक्तेः धातूपस्थाप्ययोः फलव्यापारयोरपि कर्मकृत्समभिव्या
हारे विशेषणविशेष्यभावव्यत्यासः तथा च रामनिष्ठो यो व्यापारस्तद्विषयीभूतबाणव्यापारसाध्यप्राण
वियोगाश्रयो वालीति वाक्यार्थः यत्तु वाजपेयाधिकरणे मीमांसकैरुक्तं कारकैः पाककर्तृत्वापि स्यादिति त्व
धीभिराकलनीयं प्रतनभिहिते किं हरिः करोति जीवत्यनेनजीवनः शाह्निकः शाष्टदत्तुरंकारो नीतिनिष्ट
क कृतेविरूपयेनेतिकृतविरूपः विरूपकर्मकस्तत्पाश्रय इत्यर्थः प्रपक्षपूर्वबहुव्रीहौ कृत्यपन्नवरस्वीकारा
त् यथाचैतत्तथावक्ष्यते प्रकृत्यादिभ्य इति शाह्निगणोयं तेनतान्नात्मनीनात्मद्वैतेन दाक्षरत्यादिवो
ध्ये हयोर्क्षोणयोः समाहारः द्विक्षोणं पात्रादित्वान्नस्त्रीत्वाभावात् क्षोणसम्बन्धधान्यमित्यर्थः चादिति
करणप्राहात्तद्व्यापारिक्रियणे सम्प्रदानमित्युक्तत्वरस्तत्वस्यान्यतरस्यां ग्रहणापकर्षेणनवा संज्ञयोः प

र्थोयेलत्वे समावेशार्थश्चकारः तेनमनसादीव्यतीतिमनसादेवइत्यत्रकर्मण्यपि करणेतृतीयाचेत्युभयं
सिध्यति मनसः संज्ञायामित्यलुक् किंच अक्षैर्दीव्यतेयज्ञदत्तेनेत्यत्रसकर्मकत्वादणिकर्तुर्णौकर्मक
त्वेन प्राप्नोत्यकर्मकादितिपरस्मैपदं नचेतिसिद्धान्तः यद्वाप्राचाकर्मसंज्ञैवास्यादितिव्याख्याने तदाकरवि
रोधाज्ञपेक्षत्वेस्यादेतत् करणसंज्ञाया अवकाशः देवनाअक्षाः करणेल्युट् कर्मसंज्ञायाश्चदीव्यन्तेऽक्षाः १
कर्मणिलट् अक्षैर्दीव्यतीत्यत्रतुसंज्ञाद्वयप्रसक्तौ कार्यद्वयप्रसंगे परत्वात्तृतीयैवस्यात्तत्रद्वितीयेतिचे
दत्राहुः कार्यकालपक्षेकर्मणिद्वितीयेत्यत्रयस्योपस्थाने तस्यानवकाशत्वात् द्वितीयेति ननुदीव्य
न्तेऽक्षाः इत्यत्रकर्मण्यभिहितेपिकरणत्वस्यानभिधानात्तृतीयास्यात् तथादेवनाअक्षा इत्यत्रल्युटाका
रणस्याभिधानेपिकर्मणोनभिधानात् द्वितीयास्यात् मैवं एकैवसत्रशक्तिः संज्ञाद्वययोगिनी तथाच उ
भयत्रापि अभिधानमेवनत्वनभिहितत्वं सहयुक्तेऽप्रधानेति पितृत्राक्रियासम्बन्धः शाब्दः पुत्रस्यत्वार्थ
इति तस्याप्राधान्यं अप्रधानग्रहणंशक्यमकर्तुं नचैवंपितरिपितृतीयापत्तिः तत्रप्रातिपदिकमात्रेऽत्रव
क्तत्वात्प्रथमोपपत्तेः पितरागमनमित्यादौकारकविभक्तेः प्राबल्याच्च येनाङ्गविकारः अङ्गशब्दोऽत्राव
यववचनः तदाह अङ्गिनइति येनेतिसर्वनाम्नाप्रकृत्यर्थभूतोवयवएवपरामृश्यते सन्निधानात् सचार्थो
द्विकृतएव तस्यविकृतेनेनावयवेनशरीरस्याविकारः संभवति तदेतदाह येनाङ्गेनविकृतेनेति संजानी
तइति संप्रति भामनाथानेतत् हृद्योगेपरत्वात्षष्ठी पितुःसंज्ञाना यज्ञदत्तदत्तेनोक्तं प्राख्यानेपरत्वा

म॰ र॰ ७५ 79

इत्यधीगर्थेति षष्ठीमात्रः संज्ञानेति नन्वत्र शेषाधिकारात् इत्यादीति उक्तंच इत्यादिविषयो हेतुः कारके
नियतक्रियमिति अनाश्रितेतरव्यापारे निमित्तं हेतुरिष्यते इतिच फलमपीति एतच्च प्रत्ययइति हेत्वैकेऽप्य
देश्यहं एवं सत्यर्थाच्चतुर्थ्या सह हेतुतृतीया विकल्प्यते अध्ययनाय वसति अर्थेतु विशेषः अध्ययनस्य
फलेन सहाभेदः संसर्गः उपकारकत्वेन सहत्वमित्युपकनेति गम्यमानेति नन्वत्र स्तूयमानो वेत्यादयइति
भावः साधनेति साध्यमित्यत्र प्रकृतिभागस्यार्थं प्रतीतिभावः माचापलायेति गणान्त्यानेषां [illegible]
धमिति शेषः अशिष्टेति एतच्च दाणश्च सा चेच्चतुर्थ्यर्थ इत्यनेन ज्ञाप्यते । इति तृतीया । अन्वर्थसंज्ञाबले
नाहृ दानस्येति तेनाजां नयति ग्रामे इत्सत्तेनि इत्यादौ नातिप्रसङ्ग इति भावः दानेचाः पुनर्ग्रह
णाय स्वस्वत्वनिवृत्तिपूर्वकं परस्वत्वापादानं अतएव रजकस्य वस्त्रं ददातीत्यादौ न भवति नत्राहि ददातिर्भा
क्तः एतच्च वृत्तिमते भाष्यमतेतु नन्वर्थतायामाग्रहः खण्डिकोपाध्यायस्तस्मै चपेटां ददातीति भाष्य
प्रयोगात् रजकस्य ददातीति तु शेषत्वविवक्षायां बोध्यं नचैवमजां नयति ग्राममित्यत्रातिप्रसङ्गः य
मभिप्रैतीत्यत्र क्रियाग्रहणमिति निर्दिष्टस्य शेषित्वं कर्मणश्च शेषत्वं लभ्यते ग्रामस्य चाजां प्रति शेषत्वं नास्ति
दानीयइति बाहुलकात्संप्रदाने ऽनीयर् इत्यपरे रोचतइति हृञ् प्रीणयतीत्यर्थः कर्मसंज्ञायां प्राप्तायां वच
ने प्रीयमाणः किं देवदत्ताय रोचते मोदकः पथि अत्र पथ्यो माभूत् श्लाघह्नुङ् श्लाघास्तुतिः ह्नुङ्
श्लाघने ह्नु संस्तौतीत्यर्थः अन्ये त्वाहुः ह्नुङ्श्लाघायां मानये वा श्लाघां कथयतीत्यर्थ इति नत्राद्ये पक्षे

गे॰ ७५

कर्मत्वे प्राप्ते द्वितीये तु कारकशेषत्वात्षष्ठ्यां प्राप्तायां वचनं कुन इति सम्पत्तीभ्यः स्पृहेः संज्ञाविधानात् मेवा
यं स्पृहे संबोधयतीत्यर्थः प्रकाशनस्थेयाख्ययोरितिवत् । धारेरुत्तमर्णः । षष्ठ्यां प्राप्तायां वचनं स्पृहेः
रीप्सितः परत्वादितिनेन परस्यैव स्पृहणीयशोभं स्पृहणीयगुणो महात्मभिरित्यादि सिद्धं यदा तु
शेषत्वविवक्षा तदा षष्ठी तेन कुमार्या इव कान्तस्य त्रस्यन्ति स्पृहयालुचेति सिद्धं यत्तु सर्वे हरदत्तादि
भिरुक्तं वाक्यपदीये हेलाराजग्रन्थयोस्तु स्पृहयतियोगे कर्मसंज्ञायाः शेषषष्ठ्या तु बाधिके यत्सम्प
धानसंज्ञेति स्थिते तन्मते स्पृहणीयमित्यत्र दानीय इति संप्रदाने कृत्यः कुमार्यै इवेत्यत्र तु विभक्ति प
रिणामेन कान्ताय स्पृहयन्तीति व्याख्येयं । क्रुधद्रुह । क्रुध कोपे द्रुह द्रोहे ईर्ष्य ईर्ष्यायां असूयेति क
ण्ड्वादिषु गतः एषामर्थ इवार्थो येषां तेषां धातूनामित्यर्थः तत्र क्रोधो ऽमर्षः द्रोहो ऽपकारः ईर्ष्या अ
सहनं असूया तु गुणेषु दोषारोपः क्रुधद्रोहोरकर्मकत्वात्तद्योगे षष्ठी प्राप्ता ईर्ष्यासूययोः सकर्मकत्वात्
द्वितीया प्राप्ता । तादर्थ्यो. कारकमिति कर्मकारकमिति तु प्राचः प्रमादः एकसंज्ञाधिकारात् न च प्रा
प्तामिकप्राप्तिमात्राभिप्रायेण कर्मत्वव्यपदेशः स्वसम्बन्धि शुभाशुभ पर्यालोचयतीत्यर्थाभ्युपगमेन
षष्ठ्यापवप्राप्तेः । अनुप्रतिगृ । श्राव्यस्यानुकरणान्तषष्ठी होत्रे इति कर्मत्वे प्राप्ते परिक्रयणे क्रयो धनाद्य
र्पणेनात्याविक स्वीकरणं तस्य समीपं परिशब्दः प्राचष्टे तच्च नियतकाले ततो न्यूनत्वादिति व्याचष्टे नियत
नेति भृत्यावेतनादिना तादर्थ्य इति न स्मैकार्थो ये इदं न तदर्थं कारणं प्रभृति योग इति प्रभृत्यर्थयोगस्य

वन्

म० र० प० ४०

र्थः तथाचकारिकाः प्रभृतीति भाष्ये विहृत्वं कथ्यते माङ्कृतेन प्रारम्भेणेत्यर्थः वचनग्रहणादिति व
चनग्रहणसामर्थ्यात् अवधिमात्रं विवक्ष्यते तेन विनेति विशेषणं सार्थकमिति भावः यत्ता मर्यादेति शब्द
उच्यते ऽस्मिंस्तु मर्यादावचने आङ् मर्यादाभिविध्योरिति सूत्रे तत्रय आङ् सूत्रः स उक्तसंज्ञ इत्यर्थः परिह
रेति परेर्वर्जने वावचनमिति वचनात्पक्षे द्विर्वचनाभावः परिहृतेति अत्र पंचमीविधौ वर्जनार्थेनापे
न साहचर्यादिति भावः । प्रतिः प्रतिनिधौ । अस्मादेव निर्देशाद्दाभ्यां योगे पंचमीत्याह मुख्यस्याभा
वे यस्तत्सदृशस्तदुपादीयते स प्रतिनिधिः दत्तस्य प्रतिनिर्यातनं प्रतिदानं अकर्तर्यृणे पञ्चमीत्यतोऽप
वादोऽयं शतेनेति शतमिह उत्तमर्णाय यथार्थमाणत्वाद्धर्णं तत्प्रयोजको हेतुश्चेति चकारेण कर्तृसंज्ञा
च योगविभागादिति एतच्च हेतुमत्रणिच्यर्थ इति हरदत्तग्रन्थे स्पष्टं । स्त्रियां चेति बाहुलकं प्रकृत्तेऽस्तद
नुदृष्टेरिति वार्त्तिकनिर्देशोपीह ज्ञापकः पृथग्विना समुच्चयार्थमिति निपातानामनेकार्थत्वादिति भा
वः । पञ्चमीति तत्समत्रुक्तत्वात् पंचमीद्वितीयानां संनिहितैव दूरं दूरात् दूरेणवेति इह समस्य
पि विवक्ष्यते किंच दूरान्तिकार्थेभ्य इति सूत्रस्योत्तरत्र चाप्यनुवर्तनात् अधिकरणार्थेभ्यो विभक्तिचतुष्टयं बो
ध्यं तथा च प्रयुज्यते दूरादावसथान्मूत्रमिति आवसथस्य दूरे इत्यर्थः । असत्त्वेति सत्त्ववचनत्वे चेहत
द्विशेषकं [illegible] एवं च सामानाधिकरण्येन प्रातिपदिकार्थो विशेषको भवत्यतस्तदाह दूरः पन्था इति
एतेन करणे च स्तोकेति सूत्रे करणेति किं क्रियाविशेषणे कर्मणि मा भूत् स्तोकं चलतीति क्रियानइच

गो० प०

एतेन

मिति प्राचां ग्रन्थोपि व्याख्यातः यत्तु क्रियाया विशेष्यत्वेन इत्यन्यावयवं भावाद्द्वित्वमित्युक्तं नतदेव विरुद्धं
धात्ववाच्यायाः क्रियायाः असत्त्वरूपत्वस्याकरे प्रसिद्धत्वात् नच विशेष्यत्वेन तद्रूपापत्तिः कृदभिहि
तभाववल्लिङ्गसंख्यादियोगित्वमात्रेणातद्रूपापत्तेः यद्यपि हि तत्पायिकाः शय्यत्रेत्यादौ भाष्ये संख्या
न्वयः स्वीकृतः पचति भवतीत्यादौ कर्तृकर्मत्वान्वयश्च तथापि लिङ्गस्य कारकान्तरस्य वाभावो नि
र्बाध एव उक्तं च क्रिया नभ्यज्यते लिङ्गैः क्रिया नाधारकारकैः असत्त्वरूपता न स्यादयमेवं वधार्य
तामिति पञ्चमी । रात्रेः प्रकर्ष इति प्रत्ययार्थस्य प्रकृत्यर्थं प्रति प्राधान्यादप्रधानादेव षष्ठी न तदर्थे
तु प्रकर्षविशेषणे प्रधानात्तु न षष्ठी उक्तन्यायविरोधात् शेषत्वाभावाच्च प्रकर्षशब्दो हि यथायथं
प्रातिपदिकार्थमात्रवृत्तिः कारकार्थको वा यदा तु नैवं तदा प्रकर्षशब्दादपि षष्ठी भवत्येव यत्तु
अप्रधाने शेष इति तत्र प्रातिपदिकार्थमात्रे श्लक्ष्णो घट इत्यादौ विशेषणाप्रसङ्गात् नच प्रथमया
बाधः तस्याः प्राधान्ये चरितार्थत्वात् कर्मादीनामपीति यथा विशेषाविवक्षायां रूपवानिति प्रयु
ज्यते तद्विवक्षायां तु नीलः पीत इत्यादि प्रयुज्यते तथेदमपि न्यायसिद्धमिति भावः । सतामिति
एवं च नपुंसके भावे क्तस्य योगे शेषविवक्षायां चेति तत्समर्थानां षष्ठी चेति च प्राचां ग्रन्थे कथ्यमानेना
पूर्ववचनमिति भावः । सर्पिष इति ज्ञोविदर्थस्य करणे अधीगर्थदयेशां कर्मणि कृञः प्रतियत्ने
रुजार्थानां भाववचनानामज्वरेः आशिषि नाथः जासिनिप्रहणनाटक्राथपिषां हिंसायां व्यवह

म० दं० ण ३१

योः समर्थयोः कृत्वोर्थप्रयोगे कालेऽधिकरणे इत्यत्र सूत्रे तेनेह व्याख्याता तस्याः समासनिवृत्तिफ
लकत्वात् तथा हि तत्र शेषइत्यत्र वर्तते शेषत्वेन विवक्षितेन च करणादौ षष्ठी सिद्धैव तदयमर्थः इह
षष्ठ्येव नत्वनत्स्वक् तथा चलक्षणः प्रयोजकीभूतः समासप्रवर्तनेति तथा च वार्त्तिके प्रतिपदविधानाच्च
त्यादि इतिश्चाह कारके चेत्यपदिष्टे च स्तूयमाणा क्रियेत्युनः प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्त्यर्थे इ
ति तेन शेषत्वविवक्षायां कृद्योगषष्ठ्या समासो बोध्य इति न च च कारकपूर्वत्वात् कृदुत्तरपदप्रकृति
स्वरः शेषषष्ठ्या समासे त्वन्तोदात्तः स्यात् तच्चानिष्टं तथा च स्वरार्थं यमष्टसूत्रीति परमतिष्कर्षः किं
च मातुः स्मरणमित्यादौ समासाभावोपि फले न हि तत्र कारकषष्ठी लभ्यते न लोकेति निषेधात् प्रा
ह च निष्ठायां कर्मविषयायां षष्ठी च प्रतिषिध्यते शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यते इति एवं
स्थिते ब्रूम्यादिवक्ष्यमन्येष्टुदाहरणे प्रत्युदाहरणे च यद्यपि तक्रं कृहंश्यते तत्सर्वं शेषलक्षणतयाने
यमिति हरदत्तादयः । सर्वनाम्नस्तृतीया च । इह सर्वनाम्न इति षष्ठी तदाह सर्वनाम्नः प्रयोग
इति पञ्चम्यां तु हेतुशब्दात्तृतीयाषष्ठ्यौ न स्यातामिति भावः निमित्तपर्यायेति पर्यायग्रहणस्य
फलमुदाहरति एवमित्यादिना प्राचां तु किमर्थमित्युदाहृतं तत्र किमः क्लीवत्वं दुर्लभमिति बो
ध्यं सामान्ये नपुंसकतासमासवाक्यभिन्नार्थे चिह्नानेय यत्सर्वनाम्न इति निमित्तकारणहेतुषु स
र्वासां प्रायदर्शनमिति वार्त्तिकं हि हेतृतीयकारेण यद्यपीहोक्तं तथापि भाष्यकृता तादृशेनावृत्त्यत्रपाठेन

ज्ञे० ण

तेनैवसर्वनाम्नाप्रयोगेऽपिप्रवर्तते किंतृप्त्यायग्रहणात् तृतीयादयएवेत्यर्थः वर्धमानस्तुप्रथमामपी
च्छति षष्ठ्यन्तमर्थप्रत्ययेन पञ्चम्यास्तीति कथंतर्हि ततःपश्चादिति ततःपश्चात्स्रंस्यते ध्वंस्यतेचेति
भाष्यप्रयोगात् पश्चाद्योगे पंचम्यपि प्रत्ययग्रहणंविंत्यप्रयोजनं एनपा कथंतर्हि तत्रागारंधनपति
गृहाद्दक्षिणेनास्मदीयमिति उत्तरेणेतितृतीयान्तं तोरणेनेत्यनेनसामानाधिकरण्यंबोध्यं । हेत
त्रिकार्थैः । अन्यतरस्यांग्रहणं समुच्चयार्थं तेनचविप्रकृष्टापिपंचमीसमुच्चीयतेव्याख्यानात् तत्र
षष्ठी द्वितीयातृतीयाः नतेनदाहपंचमीचेति दिवस्तदर्थस्य तत्सूत्रेणव्यवहरणे पणो परास्पृष्ठेनेतो
च्यूते क्रयविक्रयव्यवहारेच तुल्यार्थौपूर्वसूत्रेऽस्तीतौ तत्त्वापाद्येनाह द्यूतेति कर्मणीति इहषो
षष्ठ्यन्तनसंबध्यते उत्तरसूत्रद्वयारंभादितिभावः अतएवेह विसूद्यां तिङन्तमुदाहरतिशतस्यदेव्यती
ति प्रेष्यब्रुवोः इच्छतेर्देवादिकस्य गत्यर्थस्य लोणमध्यमपुरुषस्यैकवचने प्रेष्येति तस्माहवयोत्
अविवक्षितथाभूतपरवसूत्रे अतएवेहशेषग्रहणंनसंबध्यते तिङन्तेनसहसमासस्याःप्रसक्त्वा
त् । कर्तृकर्मणोः कृति । गुणोतिनेनात्तं प्रधानेनियताषष्ठीगुणेत्तूभयथाभवेदिति कृतपूर्वीति
पूर्वकृतमनेनेतिविग्रहः पूर्वकृतवानित्यर्थः अविवक्षितकर्मतयाभावेक्तः सुप्सुपेतिसमासः
पूर्वादिनिः सपूर्वाच्चेतिकर्तरीनिः नहियोषाद्रमनेनेति सूत्रादनेनेत्यन्वयः अधकथं धर्येरामो
दसत्रसमितिभट्टिः अत्राहुः अनित्यमिदंतत्सर्हेमितिनिर्देशात् । लोप्रत्यययोरितिकथंतर्हि सूद

म॰
र॰
५४
84

नियोगेनेतिसूत्रेस्मृयसीषद्दोबाधानोऽनिवृत्तिः करणत्वविवक्षायांतृतीयेतिरष्टाणा। नलोका। उक्तोक
सुख्ठकौलस्त्रोर्केत्वेतिविग्रहः उकारेणाकृतोविशेषणात्त्वदन्नविधिस्तदाह हरीतिदिहत्वलंकारैस्तुवे
ति शेषषष्ठीत्वेति एतेनइक्ष्वाकूणांदुरापेर्थेमदधीनाहिसिद्धयः श्रपिवागधिपस्यदुर्वचं वचनं त
द्विदधीतविस्मयमित्यादिव्याख्याने यद्वाइक्ष्वाकूणांसिद्धयइत्यन्वयः नतुइक्ष्वाकूणांदुरापइति
तथावागधिपस्यविस्मयमित्यन्वयः नतुवागधिपस्यदुर्वचं मिति। तत्पार्थैः। कथंतर्हितत्सोयद
रोहतित्वन्नवासमेतिकालिदासः स्फुटोपमंभूतिसितेनशंभुनेतिमाघस्य उच्यते सहयुक्तेप्रधानइति
तृतीया स्ववालभारस्यतदुत्तमाङ्गजैः समंचमर्यैवतत्लाभिलाषिणा इत्यत्रयथा उक्तोहि विनेनयोगात्
तीयेति व्याख्यानादितिसूत्रेर्थग्रहः पृथग्विमित्र तथाचहेतुरूपवागनतु ग्रंथग्राहेनबहुव्रीहिरितिभा
वः। इतिषष्ठी। श्राधारस्त्रियेति एतत्त्वसंहितायामितिसूत्रेभाष्येस्पष्टं श्रत्रेतिप्रातिपदिकार्थमात्र
इति किंच हृराद्रिकेति सूत्रस्येहाण्यत्रवर्तनादधिकरणार्थताबोध्या कुत्सेतिइतित्रत्रः शाहोविष
योहित्रिभूमिर्यस्यकात्रस्येत्यर्थः हेतुतृतीयेतिनादर्ष्याचतत्वीत्यपिबोध्यम् सीमेत्यादि एतसूत्रगी
वाक्यप्रबोधे कुलचन्द्रेणोक्तं मेदिनीकारोप्याह सीमाचाहस्थितिक्षेत्रेष्वण्डकोशेषुचस्त्रियामिति
ग्रथघुष्कलकोगन्धमृगेत्वेपणकीलयोरिति च हरदत्तादयस्तु पुष्कलकःशंकुः सीम्निसीमाज्ञा
नार्थेहतोनिहतः निखानइत्यादिः यस्यचनिर्ज्ञातकालाक्रियाःनिर्ज्ञातकालायाः क्रियायाःकाल

रो॰
५४

परिच्छेदकत्वात् लक्षणं नतु संश्रययोः कर्तृकर्मणोर्बाधकादियं सप्तमी नतु ब्राह्मणेष्वधीयानेषु गत
इति कर्तर्युदाहरणं कर्मण्याह गोष्विति इहाधीयानानां ब्राह्मणेष्वधीयानेषु गत इति दुह्यमाना
नां च गवां मध्ये दुह्यमाने लक्षकत्वं विशेषणीभूतयोरध्ययनदोहनक्रिययोर्विश्राम्यतीति भेद एवेति ननु
षष्ठी प्राप्तसामान्यरूपाकाङ्क्षेति भावः मध्यादेरिति नन्वत्र गवां मध्ये इत्यादाविव सामान्यविशेषभावः
किं तु शब्दोपात्तयोर्धर्मयोर्विरोध एव निर्धारणे गतत्वं इत्यादौ समासादर्शनात् अत एव भाष्यकृता सहेति
योगविभागेनायं साधितः यथोक्तं तेषु नीनां प्रामाण्यमितिभावः सचेति एतदपि योगविभागस्येष्ट
सिद्ध्यर्थत्वाद्वैलक्षण्यमिति छन्दस्येवेति एतच्च संप्रदानसंज्ञासूत्रे पदमञ्जर्यां स्पष्टं यदिह लोकेपि स्या
त्तर्हि ग्रामेभिरेत्यादौ समासत्वात्स्वादयः स्युः एवं तिकल्पमित्यादौ नाद्विनाङ्गाद्यथा न चालिङ्गसंख्या
मत्तपंसकताभ्युपगमेन निर्वाहः यच्च कृतेत्यादौ कृत्याप्तेः मजर्वीरङ्गित्युत्तरलोपाप्तेश्च
निर्देशादिति अन्यथा हि प्रथमानिर्दिष्टत्वाविशेषेपि उपसर्जनसंज्ञायामन्वर्थत्वेन पूर्वशब्दस्येव
पूर्वनिपातः स्यादिति भावः इवेनेति प्रथमापि समासः पूर्ववत्तद्वार्त्तिकेनैव तेनज्ञीस्नूनस्येवेत्यादौ
तैत्तरीयाणां पृथक्पदत्वेन पाठः उद्वाऊ दिववामनइत्यादौ व्यस्तप्रयोगस्तु संगच्छते । गोस्त्रियोः ।
उपसर्जनस्येति यत्र प्राचा गोनस्त्रीप्रत्ययान्तयोरुपसर्जनयोरित्युक्ते न तत्र चित्रगुरित्यादौ गोशब्दस्य
उपसर्जनत्वेपि तदन्ततस्यानवयान्त्वात् गोपतिरित्यादावतिप्रसंगाच्च हृस्वाङ्गे गोऽकुलं राजकुमारीपुत्र

म० र० पत्र
83

इति चेत् शृणु उपसर्जनस्य स्वसंबन्धिकतया यस्य प्रातिपदिकस्य ह्रस्वो विधीयते तदर्थं प्रस्तुत्राभूतयोः
गोस्त्रियोर्गुणीभावस्तदैव ह्रस्वत्वात् दिशयोरिति दिशोरिति बहुलत्वेन विग्रहेप्येतदेवद्रूपं दिक्शब्दस्य
शरदादिषु पाठादिति च वचनसामर्थ्यादिति विभक्तौ न्यनेन येन अव्ययत्वेन सह समासः तद्घटकीभूतैव
विभक्तिर्गृह्यते सन्निधानात् तदर्थद्योतकत्वादिति भावः पारिशेष्येण प्रथमान्तेनायं समासः षष्ठ्
न्तेन वेत्यपि पक्षद्वयं स्थितं यत्तु प्राचोक्तं हरौ अधिकृत्येति विग्रहे हरावधि इति स्थिते इति तन्नानित्यस
मासत्वेन विग्रहायोगात् यदाहुः अविग्रहो नित्यसमास इति ननु स्वपदविग्रहोपि स्वीक्रियते कुम्भंक
रोतीति यथा तथायमप्यस्तु अधिकृत्येति ल्यबन्तस्य समासाप्रविष्टस्य सत्वादिति चेत् समासार्थलेशा
मपि अबोधयतस्तस्याविग्रहे प्रवेशस्यैवासंभवात् यत्तु व्याचख्युः विग्रहस्त्वविग्रहः अर्थकथनमा
त्रे तेनाविग्रहान्नित्यसमासत्वमः विरुद्धं अनुपदसमासप्रकृतिभूतमलौकिकवाक्यान्तरं दर्शयति हरौ
अधि इति स्थिते इति अत्रेदं वक्तव्यं विग्रहश्चेत्यसंगतं अर्थकथनवाक्यस्यैवाविग्रहत्वेन ततो भेदाभावा
त् अर्थकथनमात्रमित्यपि ल्यबन्तेन समासार्थासंस्पर्शात् हरौ अधीत्य लौकिकमित्युक्तं तदपि न त
त्र हरावितिरन्यस्यैवप्रवेशात् अन्तरङ्गानपीति न्यायात् अन्यथा समासे हरिशब्दैकारस्य ङ्लेभत्वापत्तेश्च
यदपि व्याचख्युः अलौकिके वाऽधिशब्देनाभिहितेपि सप्तमी अन्यथाऽसामानस्यात् अनभिहिताधीत्योः
कारकमिति कर्मकारकमिति तत्प्राचः प्रमादः एकसंज्ञाधिकारात् न च प्राथमिकप्रातिमात्राभिप्राये

गै०
पत्र

नाधिकारात्

णकर्मत्वव्यपदेशः स्वसंबंधित्वभावमंपर्यालोचयतीति ग्रन्थोऽस्य गमनेन संप्राप्यव ग्रामः ॥ अत्र
प्रतिष्ठ । गृणाइति श्राद्धस्याऽकरणात्षष्ठी । हृतेरिति कर्मत्वेनामे परिक्रयणे क्रयोऽधनाद्यर्पणेनान्यः
त्रिकस्वीकरणं तस्य समीपं परिगृह्य व्याचष्टे तत्रेति नियतकाल इतीन्यूनत्वादीति व्याचष्टे नियतेति भृ
त्यावेतनादिना नाटकर्मेरिति तस्मै कार्यायदत्तं तदर्थं कारणेन तस्याभावः नाट ष्ठी छान्ना उपकारकत्व
रूपः संबंधोऽभिधीयते कृन्नाडिन समासेभ्यः संबन्धाभिधानं भावप्रत्ययेनेति सिद्धान्तात् उपकारक
त्वं चानेकथा तेन ब्राह्मणाय दधीत्यादावपि भवति भक्तिर्नानाथेति ज्ञानात्मना परिणमते इत्यर्थः
प्रकृतिविकृत्योर्भेदविवक्षायां विकृतिवाचकाच्चतुर्थी अभेदविवक्षायां तु परत्वात्प्रथमैव भक्ति
५४ र्ज्ञानं कल्पत इति यदा ज्ञानिकर्तृत्वेऽपीति भक्तेरपादानत्वं विवक्ष्यते तदा ज्ञानस्याभिहितकर्तृत्वात्प्रथ
मैव भक्तेर्ज्ञानं कल्पत इति कृपीत्यर्थग्रहणमित्याशयेनाह संपद्यत इत्यादि प्राणिनां शुभाशुभ
सूचको भूतविकार उत्पातस्तेन ज्ञापितेऽर्थे वर्तमानाच्चतुर्थीत्यर्थः वातायेति वातस्य ज्ञापिकेत्यर्थः
हितेति समासविधानात् ज्ञापकादिति भावः एवं हितयोगेऽपि बोध्यं तुमर्थाच्च भाववचनादिति सू
त्रमहिम्ना क्रियार्थकमुपपदं क्रियावाच्येव फलतीत्याशयेनाह क्रियेति क्रियाफलका क्रियावा
चकप्रकृतिकमित्यर्थः तमुन इति एतुल्लोपस्त्रुपलक्षणं फलेभ्यो यातीत्यस्य फलान्याहारकत्वेऽपि
विवरणे बाधकाभावात् कर्मणीति तथा च हिंसाया एवादोषमिति भावः यत्तु प्राचा व्याख्यातं प्रथ

मः
रं
८५
85

यज्यमानस्यैव कर्मणि षष्ठी स्यात् अयज्यमानस्य मा भूदिति नियमार्थं सूत्रमिति नत्र प्राप्तस्यानियमा
योगात् न च नाटस्येत्यत्र प्राप्तिः नहि फलार्था यानक्रिया किं त्वाहरणार्था आहरणं तत्फलकर्मकमि
त्यन्यदेतत् तस्मान्नो भावएवविधानान्नटस्य भाववचनत्वे सिद्धे पुनर्भाववचनग्रहणं सूत्रविशेषण
विग्रहार्थमित्याह इति सूत्रेणेति न च नाटस्येत्यत्रैव गतार्थतेत्याशंक्य भाववचनेनैव तस्मान्नाटस्य
योनिनयामानि पदिकार्थमात्रे प्रथमाप्रसङ्गात् यत्तु पाचोक्तं भाववचनादेव षष्ठी स्यात् पाचको
व्रजतीति एवं लत्रान्मा भूदिति नियमार्थमिदं सूत्रमिति तत्र एवं लत्रे कर्तुः प्राधान्यात् कर्तारं प्रति च
नाटस्याभावात् गुणीभूतपाचकस्य च विभक्त्यर्थेनान्वयात् तत्र षष्ठ्यपीति ज्ञतः षष्ठ्येवास्य प्रले
याहूक पर्यासेन रार्थक एवं शृङ्गनामित्याशंक्याह तस्मिन्प्रभवतीति तत्त्वात्लणामित्यादि तत्र लण
दिवक्षुष्यज्ञहूतादपि पदे चतुर्थ्याभाव्यमेवं पुनाटवर्ड्ढति हि कर्मणो विशेषणं पुनाटवर्योनकं य
त्कर्मेति नाहंशाचत्लणमेवं नतु षष्ठ्यर्थः । इति चतुर्थी ॥ ध्रुवमिति ध्रुगतिस्थैर्ययोः अस्मात्कु
टादेः पचाद्यच् ध्रुव स्थैर्ये इति पाठे तु इगुपधलक्षणः कः ध्रुवो स्थिरं प्रकृतधातुपात्रगत्यनाविष्ट
त्वे सति तत्त्वविभागाश्रयः तत्त्वाथोदवधिरेवेत्याह अवधिभूतमिति धावत इति इहाक्रियाविष्ट
स्यास्य प्रकृतधातुपात्रक्रियो म निरवधित्वेनाविवक्षिते परस्परस्मान्मेषावपसरत इत्यत्र तु तथा
तत्त्वगतिरुपस्याप्युपादानात् एकानिष्टगतिप्रति इतरस्यापादानत्वेनाविवक्षिते उक्तं च अपायेय

मे

ग्रं.
८५

उदासीनं चलं वा यदि वा चलं ध्रुवमेवानदावेशात्तदपादानमुच्यते पततो ध्रुव एवाश्वो यस्मादश्वात्प
तत्यसौ तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते मेषान्तरक्रियापेक्षमवधित्वं पृथक्पृथक् मेषयोः
स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथक् । एवं तावत्पततोऽश्वात्पततीत्यत्र तु पूर्वेणावधिकल्पनेनाश्रयो
ऽश्वस्तदवधिकं देवदत्तादिनिष्ठं पतनमर्थः पञ्चम्यर्थं वा अभेदेन संसर्गेण प्रकृत्यर्थं विशेषणं
प्रत्ययार्थस्य क्रियायां स च धर्मी न च धर्ममात्रे विभक्त्यर्थो विहितस्य बहुव्रीहेर्धर्मिपरतया निर्विवा
दत्वात् उक्तं नैतदनाश्रयालीन्यत्र हि ऽतत्रकर्मकोऽवगणावधिभूतेऽन्यार्थः जुगुप्सेति भाष्यकारास्तु
जुगुप्सादीनां तत्पूर्वकत्वेन निवृत्तिलक्षणाकर्मत्वाश्रयत्वसूत्रेण सिद्धिमाहुः एवमुत्तरसूत्रेष्वपि भीत्रा ।
कथं तर्हि कस्माद्बिभ्यति देवाः संजातरोषस्य संयुगे इति रामायणे प्रयोगः कस्य संयुगेऽरातिं न चै
वं संयुगस्यैवापादानसंज्ञापत्तिः परत्वादधिकरणसंज्ञया बाधात् अधिकरणत्वाविवक्षायां
त्विष्टापत्तेरिति । जनिकर्तुः । जननं जनिः तत्याः इञ्जनादिभ्य इति जनेर्भावे इञ् जनिवसिभ्या
मिणिजत्वमादिसूत्रेणैव जनिवध्योश्चेति वृद्धिप्रतिषेधः तस्याः कर्तेति षष्ठीसमासः तथा
च यथा जनिकर्तृयोगेऽपि भवति श्रृङ्गात्संभवतीति यथा नदेनदाहू जायमानस्येति एतेन दुःखिमोधान्नि
र्देशोऽयमिति प्रतिवाद्यमहत्त्वेनापि यथालोपप्रसङ्गमर्थासङ्गतिसमासात्रपपत्तिर्वोद्भावयन्तो मी
मांसावार्तिककाराः समाहिताः इति भावः इह सूत्रे प्रकृतिग्रहणं हेतुमात्रपरमिति वृत्तिकृन्मते

शा॰वृत्तिरत्नाकर॰ १ २

पुत्रात्प्रमोदो जायत इत्युदाहरणात् उपादानमात्रपरमिति तन्माष्यकैयटमतं तत्र भवस्याधारणाद्दुदा
हरणमाह ब्रह्मण इति ब्रह्मा हिरण्यगर्भः सचेहैतरेवनहूपादानं किंचमायोपहितं चैतन्यं ब्रह्म
तद्धि सर्वकार्योपादानमिति वेदान्तसिद्धान्तः भवनं भूरिति संपदादित्वात्क्विप् भावप्रधाननिर्दे
शे कर्तृग्रहणमपीहाऽनुवर्तते स्वरितत्वादित्याह भूकर्तेति प्रभवत्यस्मादिति प्रभवः ल्यब्लो
पे इति ल्यबन्तस्य गम्यमानार्थत्वादप्रयोग इत्यर्थः यतश्चेति यद्वधित्वेनाश्रित्याध्वनः कालस्य वा
निर्माणं परिच्छेदः प्रतिपाद्यते तेनेत्यर्थः तेन पंचम्यन्तार्थेनार्थद्वारा यत्कृता निर्मीयमाणाध्वाऽध्व
नः प्रथमासप्तम्यौ स्तः। कालादिति तद्युक्तादित्यपेक्ष्यते प्रपंचार्थमितिनच इतरस्त्वन्यनीचयो
रित्यमरोक्तेः नीचार्थकस्यैव ग्रहणमिति वाच्यं अस्मादितरो मन्दो वेत्यादाविव पंचमीविभक्ते
इत्यनेनैव सिद्धत्वात् यत्त्वितर इति निर्दिश्यमानप्रतियोगिक एव प्रयुज्यते न तु यथा चैत्रः स्थूलः
इतरः कान इति अतो नायमन्यार्थ इति तन्मन्दं प्रतियोगिवाचकान्वये उभयत्र तुल्यत्वात् उदा
हृतकोशविरोधाच्च ऋतेकस्मादिति कथं नहि ऋतेषाबाधनस्ते इति प्रमादोऽयमित्येके अन्ये
तु भसर्वतमो इत्यत्र दिशिग्रहणात् चैत्रं यावदन्तरितमित्यादाविव ऋतेयोगे द्वितीयापि साधुरि
त्याहुः यान्कं चैतत् ऋते द्वितीया चेति वाङ्मस्तूत्रात् नाधिकारादिति तद्वयाणानतः अलौकिक
त्वे हि नित्यविध्यन्तरप्राप्तिविषयत्वेनापरिनिष्ठितत्वं तत्वेतावन्मात्रेणानन्वाशिष्टप्रयोगः समस्याप्त

त्रप्रवेशः सूपपादः प्रतिप्रसंगात् यत्तु नन्वौत्रेणाव्याख्यातं तिङ्कृत्त्वेदितसमासे रीतिपरिगणनाद्धि
नाविहितेऽपि समासेऽस्मिन् नञ्परिगणनस्याकरेऽप्रत्याख्यानत्वात् कर्मणि द्वितीयेति सूत्रेस्वयमपि नत्थे
वोक्तत्वात् क्रमादमुनारददृस्तत्त्वबोधिस इत्यादिप्रयोगविरोधाच्च द्वितीयापञ्चम्योरिति पतञ्जलिनाप्य
थेऽस्याङ्गं यत्तु वदन्तीति चैत्रस्य वनादागादित्यादौ सापेक्षत्वादसमासे चरितार्थत्वात् विधानसामर्थ्येना
स्तीति तच्चिन्त्यं नित्यसमासस्यान्यायत्वे सति चैत्रस्येत्यादिविशेषणप्रयोगस्यैवासंभवात् उक्तं हि भाष्ये
वृत्तस्य विशेषणायोगो नेति नञः सविशेषणानां वृत्तिर्नेत्यपि भाष्य उक्तमिति चेत्सत्यं अनित्यसमासवि
षयेऽनत्र नित्यसमासस्यापि सविशेषणेषु अप्रवृत्तेर्महतः कंभस्योपरत्यायद्येन यत्तु प्राचा कुम्भस्य उ
पेत्युक्तं यत्तु व्याचख्युः रं हे शेषाक्रियावाक्येऽपि स्यने इति तदुभयमपि प्रागुक्तरीत्या प्रामादिकमेव संप्र
तिनेति संप्रतीत्यव्ययमिदानीमित्यर्थे पर्तते हि संप्रतीदानीमधुनासाम्प्रतं तथेत्यमरः तच्चाधिकरणश
क्तिप्रधानत्वात्क्रियापदेनैवान्वयादिह निषेधोऽपि क्रियाया एव तदेतदाह क्रियत इति असंप्रतीति हि
त्रोतव्यक्रिया क्रियायोग न भवति दृष्योदनस्य त्रोपसेचनक्रियायथा यत्तु प्राचोक्तं असंप्रतीति सम्प्रत्यभाव
इत्यर्थः अनेनोपभोगपर्वत्तनाद्योवर्तमानः कालस्तस्यैव निषेधः क्रियत इति तन्न अधिकरणस्य निषेधं
प्रतिप्रतियोगित्वेनान्वयस्य सर्वतन्त्रविरुद्धत्वात् न हि भूतले घटो नास्तीत्यनेन भूतलं निषिध्यत इ
ति कश्चिदभ्युपैति न वा कालिकसंबन्धमित्यालोतावत् इति हरीतिसमुपपरेणाषष्ठ्येनह विशाहेन स

म॰
र॰
८६
86

ह्रस्वप्रका[illegible]र्थस्येति शब्दस्य समासः प्रतिशब्दस्येत्यत्राह । ग्रामस्य हूतं प्रतीत्यत्र सापेक्षत्वेन समासा
भावे द्वितीयाविधानं सावकाशमिति तन्त्यागेव दूषितं इत्यदन्तत्वात् अर्थमर्थं प्रतीति भाष्यकारप्रयोगात्
वाक्यमपि साधु यद्वा नात्राव्ययं वीप्सा द्योत्या किं तर्हि कर्मप्रवचनीयत्वात् संबन्धमवच्छिनत्ति वीप्सा तु
द्विर्वचनद्योत्येति सहपूर्वा त्तामिति साकल्येऽव्ययीभावः गुणीभूतेपीति यद्यसादृश्यपद इति नोच्यते तदा
यत्र सादृश्यं प्रधानं तत्रैव स्यात् अव्ययार्थप्राधान्यादव्ययीभावे औत्सर्गिकत्वादिति भावः अन्त इति इदानी
मेतावान्प्रदेशो ध्येन व्याप्त इति यावत् प्रदेशस्यापरिग्रहः कृतस्तदपेक्षा समासमिति हृष्टं तो विवक्षितः सचा
साकल्येऽव्ययीभावेन भवतीति साकल्यात्पृथगुच्यते साग्नीति अग्निशब्दस्तदर्थे ग्रन्थे वर्तते सप्तमीयान्तः स
मस्यते यदाध्ययनाग्निना सहेति प्रयोगादिमेवतथापि साहित्यमात्रेण तथा अन्तत्वविवक्षायां तु समासो नित्यः
अन्तपदार्थग्रन्थपर्यन्तमिति अस्वपदविग्रहो दर्शितः यत्त्वग्निग्रन्थेति प्रथमान्तेनाग्नेरन्तत्वमिति षष्ठ्य
न्तेन वा समास इति तन्न सहशब्दस्य अन्तवाचकाभावात् अन्तत्वस्यात्र स्वतन्त्रतामलाभात् तस्याध्ययनेन
न्वयाच्च सहयुक्तेऽप्रधाने तृतीयायामन्यायत्वाच्च सतृणमत्तीत्यत्र साकल्यस्येव साग्नीत्यत्रान्तत्वस्यापि साहि
त्यद्योत्यतया तृतीयान्तेन समासं स्वीकृत्य दूषणत्यागस्य निर्मूलत्वाच्च यावच्छ्लोकमिति यावदि
त्यव्ययं समस्यते विग्रहस्तु तद्भिन्नेनेति अस्वपदत्वं बोध्यं । विभाषा । पर्यादिति त्याये असिद्धेर्थे लिङ्ग
दर्शनमिदं तिष्ठद्ग्वादिसंज्ञानामिव समाससंज्ञाया अपि नित्यप्राप्तत्वादुच्यते विध्यन्तराणामिव संज्ञानाम

ता॰

जे॰
८६

पि विकल्पलाभार्थं स्यादेतत् सहसुपेत्यपि तर्हि नित्यं स्यात् न चेष्टापत्तिः अप्रसिद्धत्वात् तथा हि च
रट्सूत्रे वृत्तिकृतोक्तं पूर्वं भूतो भूतपूर्वः सहसुपेति समास इति तथा शाकलसूत्रे सिन्नित्यसमा
सयोः शाकलप्रतिषेधं इत्यत्र नित्यग्रहणेन नार्थः इष्टमपि सिद्धं भवति वाप्यामश्वो वाप्यश्व इति भाष्ये
कच्छादेर्व्याख्यात् वाप्यश्व इति सहसुपेति समासः संज्ञायामिति समासस्य नित्यत्वात् सिद्धः प्रतिषेध इ
ति तथा अनुदात्तं पदमेकवर्जमसिद्धवदत्रेत्यादि सूत्रेष्वपि कैयटे स्पष्टं अत एवाह सहसुपेति त्विति
सुपेति योगविभागेनैव सिद्धे समासे उत्तरसूत्रैः पुनर्विधानं प्राचीनस्पर्द्धिचिह्नकानां ज्ञापयति एवं
चैवेन समासस्यापि ह्वाचिह्नत्वाद् ह्वाङ्विवक्षामन इत्यादि सिद्धं इवेनेति वार्त्तिकं तद्यद्यपि ज्ञगतोऽन्य
त्र पठितं तथापि सहसुपेति अत्र नित्यमेव नित्याधिकारे स्मारितमिति कैयटः एवं स्थिते इवेन समास
स्य नित्यत्वात् समस्तं कल्पयेतः प्रसङ्गात् जीमूतस्येवेत्यत्र बहुव्रीहेः समासाभ्युपगमेऽपि तेऽव्रीयेऽव्यत्वस्ये
वपाद्यादिति दिक् । अपपरिबहिः । अत एव ज्ञापकात् बहिर्योगे पञ्चमी ज्ञापकसिद्धेन सर्वत्र
तेन करस्य करभो बहिरिति सिद्धं । आबालमिति यत्तु आपरमाणोरा च भूगोलकमिति किरणाव
ल्यां प्रयुक्तं तत्र्यामादिकं समासमर्थे च प्रयोगासंभवात् भूगोलकादिति तत्पाठः यंपदार्थमिति सू
त्रे तु यदिति सामान्ये नपुंसकं अव्ययीविभक्तीत्यनेन सिद्धे विभाषार्थं सूत्रं तेन पक्षे वनस्यान्तिस्तदाह
र्थे अवग्राममिति इहायामोलत्वाणाव चात्रनायोन्यते लत्वं तु समासार्थः अत एव च वाराणस्यासामा

नाधिकरणं एवं सत्यनेकलिङ्गमाह गंगाशोणमिति वाराणसीति एवं च नदनदस्त्ववतानः श्रेष्ठोदकं तस्याहरेभा॰
वा अहरभवत्स्वेत्याण आदिवृद्धिः पूर्वपदात्संज्ञायामिति णत्वं अणन्तत्वात् ङीप् नदीभिश्च स्वरूपस्य संज्ञा
यामेव नेह ग्रहणं बहुवचननिर्देशात् किं त्वर्थस्य न च नस्य समासः संभवति अतः तद्वाचिनामर्थे समासः
तेन च न केवलं विशेषशब्दा एव किं तु सामान्यशब्दोपि नित्यसमास इति एतच्च वृद्धौ स्पष्टं शाकल्यसूत्रे वैयाक
रणसोप्येवं नन्वेवं न्यायसाम्यात् बहुव्रीहेरपि नित्यसमासत्वं स्यादिति चेत् मैवं यस्येत्यादिपदान्तरसमभिव्या
हारेणान्यपदार्थप्रतीतेः अतएवेह संज्ञानवगमनादित्युक्तं नत्वन्यपदार्थानवगमादिति संज्ञायां किं
पीतगंगो देशः अव्ययीभावे साधारणसमासान्तानाह। अव्ययी॰। समासान्ता इति समासस्य समासा॰
र्थोत्तरपदस्य वा चरमावयव इत्यर्थः तेनोपशरदमित्यत्र नाव्ययीभावादित्यम् द्विपुरीत्यादौ द्विगोरिति
ङीप् सिध्यति जराया इति गणसूत्रे। प्रतिपर। अक्ष्णः परमिति अविषय इत्यर्थः हृत्रिविषये अक्षिशब्द
इन्द्रियमात्रपरः समक्षमिति अक्ष्णो योग्यं। नदी। इह स्वरूपस्यैव ग्रहणं न संज्ञायाः पौर्णमास्याग्रहाय
ण्योः पृथग्ग्रहणात् उपनदीति ह्रस्वभावेन नपुंसकह्रस्वः इदं त्ववधेयं नदीभिश्चेति सूत्रे विशेषणमि
व स्वरूपस्यापि ग्रहणं विशेषणमेवेत्यत्र मानाभावादित्युक्तं तेन पञ्चनदमिति सिध्यति अत्र चानित्यो
ऽयं नङुक्तं गोदावर्याश्च नद्याश्च संख्याया उत्तरे यदीति एतच्च अत्र प्रत्यन्वयत्र आजिति योगविभागात्सिद्ध
प्रज्ञार्थमिति अन्यतरस्यांग्रहणस्य प्रकृतत्वादितिभावः॥ इत्यव्ययीभावः समासः॥ ॥ श्री

ङेर्द्विगोस्तत्पुरुषत्वे फलमाह समासान्त इति पञ्चराजमिति राजाहःसखिभ्यष्टच् उत्तरपदस्थानकार्यात्रा

त्वात्स्त्रीत्वाभावः समासार्थोत्तरपदेनाः समासान्ता इति पक्षेण पात्रादित्वं बोध्यं काशिकायां पंचराजी

ति तल्लक्षावित्कः पाठः पपाठः सहेति ह्रस्वदन्त्रः श्रितादीति श्रितादीनां यद्यपि संबोधने सर्वेन त्वेऽसे

भवति तथापि अन्यत्रापि समासस्येष्टत्वात् श्रितादय तत्पुरुष इति समुदायेलाक्षणिकाः प्रायेणास

मासनाडिन प्रकरणे एवमेव खट्वादेपेगगोदिभ्यो यस् इत्यादिसामान्यापेक्षज्ञापकात् नहि खट्वे

त्यस्याद्वितीयान्तत्वं गगादीनां षष्ठ्यन्तत्वं वा संभवति येन विधिरिति सूत्रस्य भाष्यादेहत्रिग्रन्थोपीष्टमाने

नत्रकेयटहष्टदन्त्रादीनां तमझान्यमादरेति शाहूकोलभेपपंचितमिति भावः यद्वा एवदेति श्रितादीनां

कृदन्तत्वेन गतिकारकोपपदानामिति सत्युत्पत्तेः प्रागेव समासेष्टः अन्यथा काष्ठश्रितीयोन सिद्धे

त् अतएव किल प्राचा श्रितादिभिरित्येव व्याख्याने ननु सर्वैरेवेति नीतिनत्र प्रधानस्तोमन्यये नदोदि

निषमाभावेन काष्ठश्रितीयस्य निबाधात् यद्यपि श्रिताशब्दादपि कदाचित्स्यादिति नदोपनमापेक्ष

त्वेनासामर्थ्यात् गतिकारकेत्यादेस्तु नायं विषयः कर्तृकरणे कृता साधनेत्युक्तेनिवर्त्त् द्वितीयाः

श्रितेतिसूत्रे कारकन्त्वविशेषयोरपादानादिनिदिक्षूत्समिति इहश्रितादिषु गत्यर्थत्वात्कर्त्तरि

क्तः अथ एणामासि रापत्तिस्वेह गतिरेव न फले ग्रत्यास्तित्वव्यतिक्रमः सोपि गतेर्विशेषणमेवेति प्राप्यक्तः

यद्वा श्रितनरत्यादौ श्रादिकर्मणि क्तः ग्रामगमीति गामिति नित्योणादिकइतिः सचभविष्यत्काले।

म॰
र॰
७७
88

भविष्यतीत्यस्मादयमन्यत्रोक्तः अकेनोरिति कृद्योगलक्षणषष्ठीनिषेधात्कर्मणि द्वितीया यद्गत्यर्थकर्म
णीति सूत्रे द्वितीयाग्रहणस्य कृद्योगलक्षणषष्ठीबाधनार्थत्वमाह । तद्भाष्यविरुद्धं भाष्ये तत्सूत्रं प्रत्या
ख्याय कृद्योगे षष्ठ्या एव स्वीकारादित्यत्र विस्तरः खट्वारूढ इति जाल्मोऽसमीक्ष्यकारी स्यादित्यमरः वे
दं व्रतानि च परिसमाप्य समावृत्ते न हि खट्वारूढत्वा ब्रह्मचर्य एव भूमिशयनादिर्नियमः खट्वामारोह
ति स जाल्मः रूढशब्दार्थे तेन खट्वामारोहत मा वा निषिद्धाचरणपरः सर्वोऽपि खट्वारूढ उच्यते न एव वाद
नित्येति । मासप्रमितमिति मासं प्रमाने प्रतिकर्मणि ... इह प्रतिपच्चन्द्रेणानात्यन्तसंयोगः मुहूर्तमि
ति मुहूर्तं व्याप्येत्यर्थः कालाध्वनोरत्यन्तसंयोग इति द्वितीया । तृतीया तत्कृतार्थे । तत्कृतेनेत तृतीया
न्तपरामर्शिना तदर्थो लक्ष्यते तदर्थकृतत्वं च गुणवचनस्यार्थद्वारकं विशेषणं एवं स्थिते फलित
मर्थमाह तृतीयान्तार्थेत्यादि कृतो योगगुणः तद्वचनेनेत्यर्थः धान्येनेति करणे तृतीया अर्थ इत्य
र्थः प्रयोजनमनेकार्थमर्थः अभिलाषो वा अर्थशब्दस्य रूढत्वात् धान्येनेति हेतौ तृतीया । पूर्वसदृश ।
इह समसदृशाभ्यां योगे तुल्यार्थैरिति तृतीया अन्येष्वेव योगे तु हेतावेति अत एव वचनात् इह सदृशग्र
हणं व्यर्थं षष्ठीसमासेन गतार्थत्वात् न च न तत्पक्षेण तुल्यार्थैस्तृतीयेति पूर्वपदप्रकृतिस्वरार्थमिदमिति
वाच्यं सदृशप्रतिरूपयोः सादृश्य इति सूत्रेण तत्सिद्धेः ऊनार्थेति पूर्वसूत्रे ग्रहणाद्व्येन समासस्य साधि
तत्वादिह ग्रहणमभिधेयपरं तच्चोनशब्देनैव संबध्यते न तु पूर्वादिभिः समसदृशयोः पृथग्ग्रहणात्

गे॰
७७

न्नास्तीति भावः । भक्ष्येणामिश्रीकरणं । खरविशदमभ्यवहार्यं भक्ष्यं खरं कठिनं विशदं विविक्तावयवं य
त्पन्नयोनस्य गौजेनस्य च भक्ष्यत्वेन तत्रैव प्रयोगात् गुणेनेत्येतेन एतच्च वार्त्तिकं सर्वं गुणकात्स्न्र्य इति सू
त्रे पठितं न्तामिति गुत्रह्निजशब्देन समासप्रसंगः नदयेत्वाहि षष्ठीप्रेषुत्वे च द्विजेतरमनुष्येभ्यः तेषां
सामान्यशब्देनोपस्थितत्वात् तथा नान्यैर्हायात्रपास्थीनकल्पनाया ग्रन्थायत्वात् पृथकथ्य प्रकृषोत्तम इति य
स्मान्निर्धार्यते यस्यैकदेशो निर्धार्यते यस्तु निर्धारणहेतुः एतत्त्रितयसन्निधौ सत्येवायं निषेध इति द्विवचन
विभज्योति स्वरेकयचः यद्वा प्रकृषेषूत्तम इति निर्धारणसप्तम्याः संज्ञायामिति समासः नचैवं न निर्धारण
इति व्यर्थं स्वरभेदात् सप्तमीसमासे हि पूर्वपदप्रकृतिस्वरः षष्ठीसमासे त्वन्तोदात्तत्वं स्यात् । पूरणगुणे
ति सूत्रप्राचोक्तं एतदर्थैः षष्ठी न समस्यते इति तन्न एवं हि सहितानामेव ग्रहणं स्यात् तावतामेवा
र्थशब्देन समस्तत्वात् इति निधनयत्राह सदादिभिस्तु इति सूत्रव्याचख्युः पूरणार्थशब्दः प्रत्यय एव पूरणे
हाविमकार्यं सप्रत्ययादिति तन्मन्दम् नहि प्रत्ययविशेषणं पूरणार्थत्वं किं भाद्धितनंशता हूत्वे लक्षमः
स्ति येनोक्तपरिभाषावकाशमासादयेत् कुतः नहि पूरणप्रत्ययान्ताः षष्ठ्यादयः एवं हि सूत्रे नत्र पूरणे
भ्यनादिशब्दा इति चेत् लोपस्त्वेत्याद पूरणामिति निर्देशादित्यवेहि तेन जेभ पूरणाभवः पङ्क्तस्त्रे विंशत्यादिसे
दे कथं तर्हि तान्नुत्क्षुषष्ठो कि तमेकतानीति प्रमादएवायमित्येके वस्तुतस्तु उत्क्षेपषष्ठः उत्क्षान्तमकः
षष्ठ इति वा व्याख्येयं यत्तु पूरणेन स्वर्यते नाधिकतरगतिं ग्रन्थे तद्भागार्थे कान्दत्ययाद् इति तत्र ग्रन्थत्ययो

म. ३. ५५
८१

तेनापि निषेधस्य द्वितीयतृतीयेति सूत्रे भाष्य एव स्पष्टत्वात् अत एव भित्वा द्वितीयमित्यादौ अन्यतरस्यां
ग्रहणसामर्थ्यात् समास इति तत्रोक्तं तत्र ब्राह्मणस्य शुक्ला इत्यत्र समासप्रसंग एव नास्ति ब्राह्मणाद्यस्य
दंतैरेवान्वयात् ब्राह्मणस्य ये दंतास्ते शुक्ला इत्यर्थात् अत आह यदेति शुक्लाशब्द एवेह विशेषणसमर्पक इ
ति भावः यत्तु भावप्रत्ययान्तो गुणवाच्यत्र निषिध्यत इति प्राचोक्तं तन्न उक्तोदाहरणस्य भाष्यानुक्तस्या
संगतिप्रसंगात् यद्यपि सदा गुणवाचिनो न निषेध इति तदापि न भावप्रत्ययान्तस्य गुणवाचितया सूत्रे
ण विरोधात् यत्तु व्याचष्टे तेन भावेत्यादेः भावप्रत्ययान्त एव निषिध्यत इति नार्थः किंतु भावप्रत्ययान्त
एवमन्यो गुणमाह तदभावे तु गुणे गुणिनि च सप्तम्यादिरेव निषिध्यते सदेति अन्तरेणापि भावप्रत्य
ये यो गुणमेवाभिधत्ते गंधादिशब्दः तस्य न निषेध इत्यर्थ इति तदपि क्लिष्टं अनभिज्ञत्वे च काकस्य
कार्ष्ण्यमित्यादौ व्याख्याने च उक्तव्याख्यया हि शुक्लादीनामेव निषेधो लभ्यते न तु शौक्ल्यादीनां न
हि शौक्ल्यादिशब्दा भावप्रत्यये लब्धा निष्कृष्टं गुणमाहुः न वा न तद्भावे गुणे गुणिनि च किंत्वंतरेणापि
भावप्रत्ययं गुणमात्रपरत्वात् रूपरसगंधादिशब्दतुल्या एव न च शौक्ल्यमिति कार्ष्ण्यमिति च भावप्रत्य
योत्पत्त्यैवेति वाच्यं तस्य शुक्लरूपादिशब्दैर्लब्धत्वेपि शौक्ल्यादिशब्दैर्लब्धत्वात् अन्यथा तद्भावे त्वित्या
दिस्वग्रन्थेनैव सह विरोधापत्तेरिति स्ववहितैराकलनीयमेतत् यदिति प्राचोक्तोपि योज्य इत्याह
तर्हीत्थं योज्यतां सदेत्यादिना वयं अव्याख्याते चंदनगंध इत्युदाहरणं च अस्याप्यवादं प्रथममाह भावेति

ऊं. ५५

नन्वस्तु नामैवं योजना प्राकारग्रन्थात्तु कथमेतावान्सिद्धान्तो लब्ध इति चेत् शृणु सूत्रे गुणार्थं इत्यनेन के
वलगुणस्य गुणोपसर्जनद्रव्यस्य च प्रतिपादको गृह्यते व्याप्तिन्यायात् काकस्य काष्र्यं ब्राह्मणस्य शुक्ला
इति द्विधा भाष्य उदाहरणाच्च तन्निषेधे प्राप्ते नन्वेवमपि गुणैरित्यादिना समासः प्रतिषिध्यते गंधत्वेन प्रतीय
मानो हि गंधो न कदापि गुणसमानाधिकरणः किन्तु प्रधानः इदमेव नास्त्येव नन्वनुवहति जलमित्यादि
नहि गंधानिति प्रयोगदर्शनाद्धर्मिदं इति चेन्न नवहि गंधानितिन गुणवाचकः मालतीकुसुमादिषु
दर्शनात् किन्तु चेदनत्वादिजातिनिमित्तकोऽन्यपदार्थः तस्माच्चन्दनगंधस्त्वत्र तत्त्वत्वस्यैव प
वेच्छदरूपमित्यादावपि सुरभिशुक्लादयः शब्दास्तेन तत्र गुणप्रतिपादकाः एवमपि पोऽस्य सो द्रभा
दिभिः शब्दैः सह समासोऽस्त्वेवेति चेत् मैवं नैते हि शुक्लत्वादिप्रकारकतया गुणबोधः नन्वेवमपि ज्ञानो
च द्रव्यसामानाधिकरण्यमस्त्येव शुक्लाः सुरभिरित्यादावेव दिक् फलानामिति करणस्य शेषविवक्षा
यां षष्ठी ब्राह्मणस्य कृत्वेति नात्र ब्राह्मणसंबंधस्य सामान्यरूपेण विवक्षायां षष्ठी ब्राह्मणसंबन्धिनी या
क्रिया नन्तरमित्यर्थः इत्यादीनि नयाचभाहिः यत्कृते गौरिष्टलोमः प्रादेयाः किंकृते भोगाः कुमक
र्णीत्वयावि नेति अनेकमन्यपदार्थे इति सूत्रे सर्वपदाद्यदितिभाष्यप्रयोगोऽपीहानुकूलः । रविन इ
ति कैयटहरदत्तौ तु प्रत्ययप्रतिषेधे तृतस्यापरीत्युदाहरन्तो प्रकृतद्वयेनापि प्रतिषेधं मन्येते स्व
रे भेद इति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तस्यैवावस्थानात् अन्तस्वरित इष्टः तथ्येन तमध्योदात्तत्वं

स्यादिति भावः । तत्त्वकस्येत्यादि । यत्तु प्राचा प्रत्युदाहरणे राज्ञो न लस्येत्यादि यत्तु समर्थेनेति समासे
सुर्वेनिपातानियमः स्याद्विशेषणसमासस्तु स्यादेवेति अत्रेदं वक्तव्यं विशेषणविशेष्यभावे कामचाराद्
व्यवस्थायां मानाभावात् अप्रधानमुपसर्जनमित्यन्वर्थनामाश्रित्य इत्याश्रितत्वेन गुणादीनामप्रधान्यात् इ
ष्यापेक्षया गुणादीनां विशेषणत्वेनेति व्यवस्थाध्याने न तु षष्ठीसमासोपि स्ववचनमिति किं तन्निषेधेन । ज्ञेन
च पूजायां । पूजाग्रहणमुपलक्षणं इति व्याचष्टे मतिबुद्धीति भूत इति न च तत्क्तको ऽन्यन्यायेन मत्या
दिभ्यः क्तस्य वर्तमानकालो भूतकालेन बाध्यत इति वाच्यं तेनेत्यधिकारे उपज्ञात इति निर्देशेन बाधक्ला
पनात् न च ज्ञानार्थेष्वेव ज्ञापके सूजितो यः स्वराहवैरित्यादिप्रयोगान्तरोधेन सामान्यविशेषकत्वस्येव
न्यायत्वादित्यन्यत्र न्यासकारः अन्येन कारकषष्ठ्याएव समासनिषेधोयं शेषषष्ठ्यास्तु समास इत्याहुः
एतेन कलहं सरामममहितः कृतवानिति भट्टिप्रयोगो व्याख्यातः इदमेषामिति क्तोधिकरणे चेति क्तः
अधिकरणवाचिनश्चेति कर्तरि षष्ठी अधिकरणे चेत्येव सिद्धे सूत्रद्वयेपि वाचिग्रहणस्य ष्ठार्थे कथं तर्हि
किंवृत्तं यद्वृत्तमिति नायमधिकरणेक्तः किन्तु कर्तरि किमावृत्तं निष्पन्नमित्यर्थः । कर्मणिच यद्युभया
काचनकर्मणि षष्ठी दृश्यते न हि तृजकाभ्यां निषेधो व्यर्थः स्यात् तस्मादव्ययानां अनेकार्थत्वादिनीत्य
र्थे च शाहोयं तदाह कर्मणीतिया षष्ठीति समम्येकवचनान्तं पदं अत्रद्वार्ध्येया षष्ठी विहिता परिशोषिता
चेत्यर्थः नियमस्तु त्राणो विधिरूपेण निषेधरूपेणेवेति द्वेधाप्रवृत्तेः स्वीकृतत्वात् । तृजकाभ्यां ।

इह कर्तरीत्यकस्यैव विशेषणं न तु तृचः व्यभिचारात् तथापि चोपरंजकत्वमात्रमभिप्रेत्याह
कर्तृग्रहणेति जयादित्यस्तु कर्तरि षष्ठीति व्याचष्ट तन्मते तृजकावर्थ इति कर्तृत्वात् किंच कर्तृग्रह
णं तृजकयोरेव विशेषणमिति निष्फलं तयोः कृत्त्वात् तत्र षष्ठ्या इति भावः शेषषष्ठीति केचित्तु
जनिकर्तुः प्रकृतिः तत्प्रयोजको हेतुश्चेति निर्देशाद् नित्योयं निषेध इत्याहुः न्यासकारस्त्वाह
तृजंतमेतत् न लोकेति षष्ठीनिषेधस्त्वनित्यः तृन्नकाभ्यामिति वक्तव्ये तृचः सानुबंधकस्य ग्रहणं
तु ज्ञापकादिति । पूर्वापरा । एकदेशशब्दोऽवयववृत्तिः अत एव तस्य कर्मधारयत्वेऽपि तत्रोत्तरत्व
र्थोऽपि कृत्स्नसर्पवान् वल्मीक इतिवत् यद्यपीह एकशब्दः पूर्वादिवत् ग्रामस्तथापि अत एव निर्देशा
दित्युक्तं तेन दाह अवयविनेति तत्र किमनेन सूत्रेण कर्मधारयेणैव पूर्वकाय इति सेत्स्यति इत्यर्धका
यवत् समासार्थे सूत्रं शब्दा अवयवेष्वपि वर्तन्ते इति न्यायात् अत आह षष्ठीत्यादि तथा च कायपूर्व
इत्यादिप्रयोगव्यावृत्तये सूत्रमिति भावः नन्विह षष्ठी न लभ्या अन्यारादितिपंचमीप्रसंगात् तत्राह दि
शि दृष्टः शब्दो दिक्शब्द इति व्याख्यानेन संप्रति दिगवृत्तिनापि योगे पंचमी स्वीकृतेनेति चेत्तत्र अवयव
वृत्तिभिर्योगे षष्ठ्येवेष्यते तस्य परमाम्रेडितमिति लिंगात् पूर्वं नाभेरिति नाभेर्यः पूर्वो भागः स कायस्या
वयव इत्यर्थः नाभेरिति दिग्योगलक्षणा पंचमी अत्र पूर्वस्य भागस्य नाभिरवधिः नन्वेकदेशिनः अतो
नाभ्या सह समासो नेत्यर्थः कायेन तस्मादेव पूर्वकायो नाभेरिति पूर्वशब्दस्यानित्यं सापेक्षत्वात् आधार

मं॰
र॰
५१

91

त्वाच्च पूर्वं छात्राणामिति समुदायसंबंधे षष्ठी बहुवचनं तद्भूतावयवभेदसमुदायविवक्षायां यथा छात्रा
णां पंचम इति तत्र छात्राणामेकदेशत्वेसत्यपि एकत्वसंख्याविशेषाभावान्न समासः सर्वोपीति पूर्वादि
भिन्नोपीत्यर्थः ज्ञापकादिति नह्यन्यथा मासपूर्वत्वमह्नस्योपपद्यते नचोर्ध्वकायवत् सामानाधिकरण्येन
निर्वाहः शंक्यः अह्नः सर्वैकदेशेत्यादिना विहितस्य समासान्तस्य अह्नोह्न एतेभ्य इति अह्नादेशस्य चैकदे
शसमासं विनानुपपत्तेरितिभावः इत्याहुरिति नचैवं दिनमध्यो रात्रिमध्य इति चैवमादि न सिध्येदिति वा
च्यं ज्ञापकसिद्धस्यासार्वत्रिकत्वात् यत्तु माधवोक्तं सर्वैणैकदेशेनाह्नः समास इति तत्र एकदेशस्यात्
तीया निर्दिष्टतया परनिमित्तापत्तेर्धर्मिग्राहकमानविरोधात् यदपि पादान्तरे सर्वैणैकदेशेनाह्न इति
तदपि न अह्नः सर्वैकदेशेन च तेनैव तस्य समास इति संभवति । अर्धं नपुंसकं । नित्यं क्लीवे इति अर्ध
मिति निर्देशादेव क्लीवत्वे लब्धे नपुंसकग्रहणं नित्यनपुंसकार्थमित्यर्थः खंडमात्रवाचीतु त्रिलिङ्गः
भिन्नः शकलखंडे वा पुंस्यर्धोर्धं समेंशक इत्यमरः अर्धं वा पुंसीति पूर्वोत्तराभ्यां संबध्यते वचनात् पुंस्त्ववि
कल्पः स्त्रियामिति फलितं नच खंडे इति स्त्रीलिंगमेव किं न स्यादिति वाच्यं भिन्नलिंगानां न द्वंद्व इति ते
नपरिभाषितत्वात् शकलखंडस्त्रीति निर्देशेनैव तन्निर्णयात् अर्ध इति रूपभेदात्तु खंडावगतौ सत्यामपि
वा पुंसीति न हि कल्पनाः विशेषात् स्त्रीनपुंसके लभ्येते मागवदिति अवयविना समस्यते इत्यादीत्यर्थः
अर्धं पिप्पलीनामिति इहार्धपिप्पलीति समासे परवल्लिंगातिदेशोपि वचनातिदेशाभावात् विशेषैकयाद्वेति

गं॰
५१

तेनतत्समासः एत
त्सूत्रं परवल्लिङ्गमि
त्यत्र भाष्ये प्रत्याख्या
तं तथाहि अर्धपि
प्पलीति ४२

भावः कथं तर्हि अर्धं पिप्पल्या इति अर्धपिप्पलीनामिति विग्रहे मा भूत् एकदेशसमुदायेन भविष्यति अर्ध
पिप्पली चार्धपिप्पली चेत्यादिविग्रहात् एकदेशिनेति किं अर्धं पशोः देवदत्तस्य देवदत्तः स्वामी न त्व
वयवीति कर्मधारयेण सिद्धं समुदाये दृष्टाः प्रवृत्ता अवयवेऽपि वर्त्तन्ते इति न्यायात् समप्रविभागादन्यत्र हि
न वाक्येष्वेव गतिः अर्धहारः अर्धजरतीयं अर्धवैशसं अर्धाङ्गं अर्धविलोकितमित्यादिदर्शनात् न च स
मप्रविभागे षष्ठीसमासं वदितुमिदं सूत्रमिति वाच्यं षष्ठीसमासस्यापि इष्टत्वादिति तथा च कालिदासः
प्राप कर्मणा शरीरार्धहरां हरस्येति द्वितीयतृतीयेति निषेधं बाधित्वेति भाष्यकारास्तु परवल्लिङ्गमिति सू
त्रे तत्पुरुषग्रहणं द्विगुप्राप्तमिति वार्त्तिकं पूर्वापरेत्यादिसूत्रे च प्रत्याचख्युः तन्मते भित्ता द्वितीयादेः
सिद्धये पूरणेत्यादिनिषेधस्यानित्यत्वमाश्रयणीयं संज्ञाप्रमाणत्वादित्यादिनिर्देशानां सामान्यापेक्षया ज्ञा
पकत्वाच्च एवं सति नानुपपन्नं षष्ठीत्यपि सिद्धं। प्राप्तापन्ने च। अत्र चकारेण विधेयसमुच्चयार्थेन अकारप्र
श्लेषात् अन्यत्प्राप्तापन्ने समस्येते अत्वं च तयोः स्यादिति भाष्ये स्थितं न त्र चकारात्पूर्वमेव अकारं छित्वा
मात्रत्वात्प्रकृतिभावो नेति प्राञ्चः इमं श्लेषं परिहरन्नाह द्वितीययेति। प्राप्तापन्नेति एकदेशस्य
पूर्वनिपातत्वेन ग्रहणात् लिङ्गविशिष्टपरिभाषया वा प्राप्तापन्नयोः स्त्रीलिङ्गयोरपि समासः। कालाः परिमाणिना। प
रिमीयते परिच्छिद्यते अनेन तत्परिमाणं परिच्छेदकं तद्वान् परिमाणी तदाह परिच्छेद्यवाचिनेति कालाइति
कालविशेषवाचकाः इत्यर्थः कालसामान्यस्यापरिच्छेदकत्वात् मासो जातस्येति षष्ठीसमासे प्राप्ते वचनं

म० र०
५१
९२

तत्र ज्ञानः पुरुषस्तस्य च हस्तत्वेन तस्यादिकं परिच्छेदकं न तु कालस्तस्य क्रियामात्रपरिच्छेदकत्वादिति चेन्म
त्वे मासात्मिकयापरिच्छिन्नत्वेऽपि कालः न तु द्वारादेवदत्ते परिच्छिन्नेति यस्य हि जननानन्तरं मासो गतः समास
ज्ञानः इति व्यवच्छिद्यते तत्र व्यवहारकालजननलक्षणयोरेकतरकालभावी मासो जननद्वारा ज्ञानमपि परिच्छिन
त्त्येव इह विग्रहे षष्ठी निर्दिष्टस्यापि वृत्तौ प्राधान्यं बोधयितुं यस्य सहस्त्रं उक्तं अलौकिके तत्प्रक्रियावाक्ये न
स्य प्रवेशः एवं बहुव्रीहावपि एतावान्परो विशेषः इह ज्ञानयोर्द्वाभ्यां षष्ठी चित्रगुरित्यादौ तु द्वाभ्यामपि प्र
थमाभ्यां प्रथमैव समानाधिकरणानां बहुव्रीहिरिति वक्ष्यमाणत्वात् विशेषणविशेष्यभावव्यत्यासेनैका
र्थीभाव इति तत्त्वं यत्तु मीमांसकाः चित्राणां गवामयमिति विग्रहेऽपीति न चेदं वक्तव्यं उक्तरीत्या वृत्तिवा
क्ययोः क्वचित्प्रधानार्थसाम्यलाभेऽपि अन्यपदार्थबहुव्रीहौ पंचविधेऽपि कर्मकरणादिप्राधान्यस्याभिमत
स्योक्तविग्रहादलाभात् वृत्तिवाक्ययोः महान्विप्रकर्षः स्यात् कृतविश्वः प्राप्तोदको ग्रामः इत्यादौ कर्तृ
कर्मणोः समासेनाभिहितत्वात् न कारकविभक्तिरित्यादि सिद्धान्तस्य निर्विवादत्वात् किंचालौकिके
प्रविष्टानामेव पदानामेव परिनिष्ठितानां लौकिकेऽपि प्रवेशसंभवे उपस्थितपरित्यागेनानुपस्थितकल्प
न्या०
नमयुक्तं साम्प्रदायिकं च न तत्र गुणानयैव पदानामन्ते गौरवं तु फलमुखत्वान्न दोषावहं अत एव वा
क्यार्थे न तत्पदेनांताप्रायं विषयेऽपि न लौकिके वाक्यभेदेन विग्रहोऽपि इष्ट इति समन्तः अथवा मास्तु तत्र वृत्तः
प्रधानार्थसाम्यमपि औत्सर्गिकमिष्टत्वज्ञातो न त्थाहि विना क्वचित् गुणप्रधानत्वमर्थानामाविवेकिन

गो०
५१

मित्युपक्रम्य व्याख्यानेन द्विनार्थस्य यत्किंचित्पदार्थे गुणप्रधानभावस्यानवच्छेदो विपर्ययस्तूक्तो न हि न
ग्रहणं हृत्तामस्युपलक्षणं तेन शाब्दिकः वैयाकरणः पाचकः इत्यश्वस्तनस्त्यादीनां विग्रहवाक्यानीत्यु
दाहरणं स्यादेतत् चित्रगुर्देवदत्त इति समासे न हि न ह्यपौरलौकिके प्रक्रियावाक्येपि च चित्रागोर्गः एतेषां
त्वाः षष्ठ्यन्ता एवेति मीमांसकाशय इति चेत् मैवम् शेषो बहुव्रीहिः त्रिकत्तः शेषः अस्ति सामानाधिक
रण्ये सत्यप् समर्थानां प्रथमाद्वेत्यादिसूत्रभाष्यविरोधेन द्वन्द्वेरेव नत्र कुलेभवत्वादितिदिक् प्रकृतमनु
सराम उत्तरपदेनेति परमाणुत्तरपदद्वैतं केन द्विगुसिद्धये बहूनां तत्पुरुषे वक्तव्य इत्यर्थः स्वरूपे त्वेक
त्वस्य विवक्षितत्वात्प्रामेवचनं गर्जादेशा इति विपदत्तत्पुरुषाणेन तर उत्तरपदे परतो वानद्विगौ सती
तिभावः। सप्तमी शौण्डैः। बहुवचननिर्देशात् गणपाठसामर्थ्यात् चायर्थोवगतीनित्यभिप्रेत्याह
शौण्डादिभिरिति शौण्डः प्रवीणः इह सप्तमीत्युपात्तक्रियायाः ह्यत्रावनभवति नतत्त्वाधकं च सामर्थ्यं यथा दध्यो
दनगृहस्थानार्थो नेन कारकाणां क्रियायैव संबंध इति नियमस्य भंगोनेति बोध्यं अधिशब्द इति आधेयप्र
धान इति शेषः अधिकरणप्रधानस्य तु अव्ययीभावप्रवाधिहरीति यथा अंतः शाक्याव्ययनुने सचाधि
करणप्रधानः मध्य इत्यर्थात् नयोगे अव्ययं वनः आधारत्वविवक्षायां सप्तमी यथा वृक्षे शाखेति वनेन्तः
वनान्तर्वसति यत्तु अधिकरणमात्रवृत्तिः अंतः शब्दस्य विभक्त्यर्थ इति अव्ययीभावो नित्यसमासः
प्रतिवंतर्हितिणत्वं अंतर्वणा यत्तु हरदत्तेनोक्तं तत्पुरुषस्य वैकल्पिकत्वात् पक्षे अव्ययीभाव इति तन्नि

त्वे तत्पुरुषस्यैवैकल्पिकत्वेऽपि अव्ययीभावस्यानित्यत्वात् वने अन्तरिति त्वङ्क्वाविग्रहस्यैवाऽसंगतेः किंच वि
भक्तिमात्रवृत्तेः अव्ययीभावः वचनग्रहणसामर्थ्यात् अन्यथाहृत्तस्योपरीत्यादावतिप्रसंगाच्चेत्यत्कथं मध्यवा
चिनः प्रसंगः किंच प्रक्रियावाक्यानुगतेन विभक्त्यर्थवृत्तेरेवाव्ययस्य समासः सन्निधानात् तत्सामर्थ्यादेव निपा
तेनाभिहितेऽपि सप्तमीति स्थिते नचैतदिहास्ति अवयविनं प्राधान्यविवक्षायां सप्तमीति त्वयैवोक्तत्वात् इति
दिक् यदप्याहुः अन्तःशब्दोऽधिकरणप्रधानः तत्समानाधिकरणाद्वनात्सप्तमी वनस्य मध्ये इत्यर्थात् वनेः
त्रवं नान्तर्वसति पूर्वपदार्थप्राधान्येऽव्ययीभावः वनस्यान्तरन्तर्वणमिति अत्रैतदवक्तव्यं सामानाधिकरण्ये स
प्तमीत्यसंगतं व्यधिकरणसमासप्रकरणात् विशेषणविशेष्यत्वे नैकार्थत्वात् किंच मध्यवाचिना
व्ययीभावो दुर्लभं लक्षणाभावात् अथाव्ययमिति योगविभागेन कथंचिदुपपत्तिरूपे अपदिशमिति यथा
तर्हि तथैवेहापि नित्यसमसत्वादविग्रहत्वं स्यात् तथाच वनस्यान्तरिति त्वङ्गाद्यो विरुध्यते दिक्सङ्ख्ये संज्ञा
यां नियमार्थमिति कथं तर्हि त्रिलोकनाथेन सता मखद्विष इति कालिदासः त्रिलोकशब्दस्याऽसंज्ञात्वा
न्नेव समाहारे द्विगुः द्विगोरिति ङीप्प्रसंगात् नचपात्रादित्वं कल्प्यं यदि त्रिलोकीगणनापरास्यादित्या
दिप्रयोगविरोधात् नचोत्तरपदे इति समासः त्रिपदतत्पुरुषस्येहदुर्लभत्वात् अतोऽत्यन्ते लोकशब्दो त्रैलो
क्यसमुदायपरः अवयवो लोकास्त्रिलोकः शाकपार्थिवादिः एतच्च द्विगोर्लुगनपत्ये इति सूत्रे भाष्ये एवस्प
ष्टं एतेनेनवरसकांचिरामित्यादिव्याख्यातं । तद्धितार्थे । एकापि सप्तमी विषयभेदेन भिद्यते इत्याशयेनाह

तद्धितविषयेऽपीति सर्वनाम्न इत्येतच्च पूर्वापरोदाहरणान्यपि यद्यपि स्त्रियाः पुंवदिति अनेनापि यत्कृतनिवे
धः सिद्धः तथापि दक्षिणपूर्वस्यादित्यर्थं सर्वनाम्न इत्यावश्यकं प्रतिपदोक्तत्वादित्यपि न्यायमिति भा
वः। षाण्मातुर इति। मातृकृतस्योक्तं अतएव परस्य के हीं गोत्रोत्तीर्ति लुप् विकल्पप्राप्ते इति प्राचांग्र
हणमत्र स्पष्टार्थं वस्तुतस्तु त्रयाणां समासे कृते नैषु पदार्थोपसंक्रमेण परस्परसंबंधाभावात् द्वंद्वेन तत्पुरुषयो
रप्राप्तौ सत्यां वचनमिति बोध्यं तत्र तद्धितार्थेति सूत्रेणोत्तरपदे परे तत्पुरुषो वचनसामर्थ्यात् सिद्धः एकार्थी
भावसत्त्वादेव नित्यत्वात्तथापि सिद्धः नहि महाविभाषापि सत्येकार्थीभावे संज्ञाया विकल्पिका न च संज्ञाया
भावाभावविषये नेति भाष्यविरोधात् किंतु वैकल्पिके एकार्थीभावविषये नित्यैव तत्संज्ञा इह तु वैकल्पि
कत्वांशो बोधिता एवं च वार्तिके तत्पुरुष इत्यंशो ज्ञापकसिद्धार्थानुवादमात्रं अतएव वादिरेव शार्म्यमिति क
र्मधारयोत्तरपदो बहुव्रीहिः न त्रिपदो बहुव्रीहिरिति समर्थसूत्रशेषे कैयटोक्तं संगच्छते एवं चावपूर्वेति
पानयोः सिद्धये हि नयोक्तं अतएव चित्राजरद्गुरिति संगच्छते पूर्वकाले केत्यादेर्जरद्गवादौ कृतार्थत्वं तथा भू
तपूर्वगत्यादि सूत्रे रथोगादिति दिक् द्वंद्वस्योदाहरणं तु वाक्त्वचं षच्छामिये स्रस्य वागृषत्स्त्रियः छत्रोपानह न
स्त्रियः इह त्रिपदे बहुव्रीहौ कृते पूर्वयोर्नित्यं द्वंद्वः तेन समासान्तष्टजपि नित्यमेव यत्तु पूर्वतंत्रे वा लक्षण
पूर्वस्य कृतापद्विधेरेकार्थत्वं हि सामर्थ्यमित्यधिकरणोपष्टः षट्होहद्वयत्र समासकार्येऽस्मदाद्यन्य
द्वंद्वं कृत्वा बहुव्रीहिरिति पूर्वपक्षं रचयित्वा तत्रोपष्टम्भकतया कात्यायनवचनमिदमुपन्यस्तं यत्तु नेह द्वंद्व

म. र. २४
९५

इति सिद्धान्तयित्वा कात्यायनवचनेन समासान्तकृतविशेषमात्रविषयमित्युक्तं तदुभयमपि चिन्त्यं उत्तरपद
इत्युक्तेः द्वंद्वे कृत्वेत्यस्यासंगतेः स्वरेविशेषस्यस्पष्टतया समासान्तपर्यन्तस्याग्रहे बीजाभावाच्च नित्यसमास
वचनमिति वार्त्तिकस्य संकोचे प्रमाणाभावाच्च । संख्यापूर्वो द्विगुः । प्रत्येकमिति प्रत्येभावः पूर्वसूत्रविष
यएवेयं संज्ञाः तेनतस्येति न्यायात् एतदर्थमेव हि तत्र योगविभागः कृतः अन्यथा दिक्संख्ये संज्ञानहिनार्थो
त्तरपदसमाहारइत्येव ब्रूयात् तेनसप्तऋषयइत्यत्र इगन्तकालेति पूर्वपदप्रकृतिस्वरो न भवति किंतु
समासान्तोदात्तएव तथा च लक्ष्यं सप्तऋषयस्तपसे ये निषेदुः सप्तर्षीणां सुकृतां यत्र लोकः इत्यादि स
प्तकमिति एतच्च स्थलएव कथयिष्यति कृत्यतुल्याख्याअजात्या । कृत्यप्रत्ययान्ते भव्यादिसूत्रे वक्ता
रस्यात्रक्तसमस्तत्वादर्थत्वात् वर्तमाने क्त इत्यादेनाह कृत्यमानानीति तदर्थकानीत्यर्थः वैयाकरण
खसूचिरिति सूचयतेरचइः यः पृष्टः सन्शास्त्रं विस्मारयितुं खं सूचयति अद्योनिर्मलंगगनमिति सपवस्र
च्यते इदं तु टइति इलउत्स्येपेन्नूर्वः गौणादिकत्वात् प्रत्ययः अनिलमन्यत्रापीति गौलक् रलयोरैक
विषयत्वस्मरणाद्वः विशेष्यस्य पूर्वनिपातार्थं सूत्रं प्रायेण गौणमेव शाहप्रवृत्तिनिमित्तकृत्स्यायामेवा
येसन्निधानात् तेनेहतन मीमांसकोदादिः पूर्वसूत्रेति पापाणक पाह्नो कृत्सनाभिधायित्वेनोतयोः पूर्वसूत्रे
ण समासे परनिपातः स्यात् तस्मात्पूर्वनिपातार्थमिदं सूत्रमिति भावः स्नातकमिति मुतपवसमा
नाधिकरणान्तरगौवचमला मृगचपलेत्यादौ पूर्वस्थावः उत्तरपदार्थप्रधानत्वचापलादिद्वारकमे

ग्रं.
२४

वेह सादृश्यं दृश्यते संनिधानात् वागर्थाविवेत्यादावपि हि सादृश्यहेतुसंपर्कादिद्वारकमेव सादृश्यं प्रतीय
ते कथं तर्हि उपमानपदत्वमिति चेत् भूतपूर्वगत्या शब्दार्थमादायेत्यवेहि सामान्यवचनत्वं चोपमानोपमे
यसाधारणधर्मविशिष्टोपमेयपरत्वं बोध्यं । उपमितं । कथं तर्हि भाष्याब्धिः क्वातिगंभीर इति कैयटः
सामान्यप्रयोगसत्त्वेनास्याप्राप्तेः उच्यते इह गांभीर्येण सादृश्यं न विवक्षितं किंतु विनतद्गः खावगाहत्वा
दिना तस्य चाप्रयोगोऽस्त्येवेति निर्बाधः समासः । विशेषणं । ननु विशेषणविशेष्यभावे कामचारात् पा
चकपाठकादावपि नीलोत्पलादावप्यव्यवस्थितः पूर्वनिपातः स्यादिति चेत् अत्राहुः जातिशब्दगुण
क्रियाशब्दयोः समभिव्याहारे विशेष्यसमर्पकत्वेनैव तेन नीलोत्पले पाचकब्राह्मण इति व्यवस्थितएव प्र
योगः गुणशब्दयोः क्रियाशब्दयोश्चानियमएव खञ्जकुब्जः कुब्जखञ्जः पाचकपाठकः खञ्जपाचकः
पाचकखञ्ज इति अत्र च मूलमुपसर्जनमिति महासंज्ञा अप्रधानं ह्युपसर्जनं गुणक्रिययोस्तु द्वयोरप्य
प्राधान्यं स्पष्टमेवेति यद्वा विशेषणविशेष्ययोः संबंधिकतयान्यतरोपादानमात्रेण तदपेक्षासंभव उ
भयोपादानं निवृत्तविशेषणपरिग्रहार्थं निवृत्तिश्च प्रागुक्ता भाष्यकारादिव्यवहारादवसीयते । पूर्वा
परः । अपरस्येति यतत्त्वपश्चार्धमिति सूत्रे भाष्योक्त्येति बाहुलकादिति एकेऽत्र अग्रत्वोऽप्यवयवे पराक्रमते
इति वा बोध्यं । श्रेणीकृता इति एके न शिल्पेन पण्येन वा ये जीवंति तेषां समूहः श्रेणिः । कृताकृत॰
मिति एकदेशाकरणात् कृतमेकदेशान्तरस्याकरणात् न तदेव कृतम् सन्महत् गुणक्रियाशब्दैः स

मासे सति सप्तम्याः पूर्वनिपातनियमार्थं सूत्रं । तत्पुरुषः । समानाधिकरण इत्यार्षीं यञ्जेनः औपचारिकं वाते
न समानाधिकरणपदक इत्यर्थः । भाषितपुंस्कादित्यादि । पतञ्जलिश्रियाः पुंवदिति सूत्रे स्फुटीकरिष्यते
तत्रैनेनैव कर्मधारये सिद्धं जातीयदेशीययोस्तु तसिलादिषु सिद्धं तत्किमनेन सूत्रेणेत्याह पूरणी ।
त्यादि । तथेत्यादि च । स्त्रीपुंसलक्षणेति तत्र यमस्यादिष्यन्तः स्त्रीपोटेत्यमरव्याख्याता हरदत्तस्तत्र
स्तकं पोटामाह तत्र मूलं मृग्यं अमरेण नपुंसकपर्यायेभ्यः पृथगेवास्य पठितत्वात् कटधूर्तेति नाः
रकटत्वं जात्यन्तरं जातिनानिजातस्वैरितिगतार्थं तानपेक्ष्य प्रवृत्तिनिमित्तजात्यायामेव तस्य प्रवृ
त्तेः कथं तर्हि जनयति जम्बूदम्भोति धूर्तठको बालमत्स्यानामिति बकधूर्त इति यत्रं सत्यं प्रमादएवा
यमिति प्रामाणिकाः । प्रशंसावचनैश्च । वचनग्रहणं रूढिपरिग्रहार्थं येत्तयोगिकाः प्रशस्तशो
भनरमणीयादयः येच विशेषवचनाः श्रविमृष्टादयः येच गौणा हस्त्यादयः परांसोगमयंति सिद्धो मा एव
कइत्यादयः तेसर्वेऽत्र दस्यंते । उमारः । पतेदेवेति पूर्वकारः स्फुटासिद्धत्वयोगेनार्थः ज्ञापकोत्तरस्या
पि संभवात् तथाहि यवाजरतीति सूत्रे जरतीग्रहणं लिंगं नहि यवनूपा हस्य पुंस्त्वे जरती सामाना
धिकरण्यं त्वायें यत्नः स्वादिभ्यः फक्विधौ पुंसि जानन्ती इति गणसूत्रे पुंसो स्त्रीज्ञिरयी ह ज्ञापिकेति तत्र
पकादेशस्य पूर्वोत्तरग्रहणेन ज्ञापकस्य सूत्रलक्षितत्वात् । चतुष्पाद्गर्भिणा । मण्डूकस्तत्त्वा
जातिनित्यत्रवर्तते इत्याह जातिवाचिन इति तेनेह न कालाक्षीगर्भिणी चतुष्पाद्गर्भिणी

मन्युहरणो विशेषणमिति समासः स्यादेव पूर्वनिपाते विशेषः । मयूरव्यंसकादयश्च । चकारोऽव-
धारणार्थः समासान्तरं व्यावर्तयति धूर्तश्चतिनश्चाच गुणवचनत्वात्पूर्वनिपाते प्राप्तमिदं वचनमिति भा-
वः अन्ये त्वाहुः मयूरश्च व्यंसकश्च मयूरव्यंसकः इत्युपमानानि सामान्यवचनैरिति सिद्धे पुनर्वचन-
मेतस्याः प्रवादत्वार्थं तेन समासस्यैतत्वः ऽन्योः दाढ्यत्वमिह सिध्यति तत्पुरुषतत्वार्थ इति स्वरो माभू-
दिति सत्युपमानसंज्ञार्हेन विहितसमासे प्रवर्तते अष्टीनपि वनेति इह ह्रीयाह्रूपस्यान्यपदार्थप्राधा-
न्यात् स्त्रीत्वात्तदाप् एवमग्रेऽपि राज्ञां नरमिति अंतरशब्दोऽभिन्नवाची चिन्मात्रमिति मात्रं कार्त्स्न्येऽवधारणे
अंतरमात्रशब्दाभ्यां सह नित्यसमासः । नञ् । उत्तरपदार्थप्रधानोऽयं समासः तथा ह्यारोपितत्वं नञा
द्योत्यते आरोपमात्रं वा विषयत्वेन संसर्गः तथा च अब्राह्मणशब्दादारोपितो ब्राह्मण इति बोधे अ-
थोत ब्राह्मणाभिन्न इति पर्यवसानं अतएव उपसर्जनत्वादन्यस्मिन्नित्यादौ सर्वनामकार्यं सिध्यति न
तु तत्पुरुषस्य औत्सर्गिकमपि चोत्तरपदप्राधान्यमेवं सति निर्बाधं पततद्दोषेति सूत्रे नञ्समासग्रहणं
चेह लिंगे समासवादिन तु ब्राह्मणाभिन्न इत्यादिशाब्दबोधपर्यवसायाहुः तन्मते असत इत्यादेः अन्तिस-
र्व इत्यादि समत्वात्सर्वनामसंज्ञाकार्यं अन्तरेण कार्यं च न स्यात् यत्तु तत्त्वाद्वयमभावश्च तत्त्वाज्ञात्व
तदल्पता अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिता इति मत्वा अब्राह्मणः अपापं अनश्वः अनु-
दरा कन्या अपापा वा अन्ये गोऽश्वेभ्यः अधर्म इत्युदाहरंति तदयथार्थं आर्थिकार्थाभिप्रायेण कथं

चिन्त्यं सर्वथापि नञ्समासस्योत्तरपदप्राधान्यं भाष्योक्तं नान्यथयितव्यं अनपत्यो नेकं अन्यपदार्थे इत्यत्रा
नेकशब्दादेकवचनं प्रयुक्तं माभूदपि सव्यानेनेकधा समानाधिकरण्ये इति कथं नो हि यदन्यनेके जलधेरिवोर्मय
इत्यत्र नेच्याने प्रथाशोपि नेकत्वानां प्रकृत्यर्थतया तत्र वास्तवबहुत्वाभिप्रायं बहुवचनं यत्तु समुदायबहुत्वे
बहुवचनं यथा सो गजा इत्यु प्रत्येकमनेकः ततो नेकस्यानेकस्त्वेनैकशेषात् यत्तु प्राचीनप्रक्रियोव्याच
ख्यानग्रहः नञ्विशिष्टेनोत्तरपदेन सामानाधिकरण्याद्योलत्वं ने इत्यादिनत्वकीयग्रन्थसन्दर्भविरुद्धमाकर
विरुद्धं च यदपि विचारचिन्तामणौ उक्तं प्रभूक्तं समासेत्तरपदप्राधान्यं मासज्ञानवत् नञर्थमिति तत्र
सामानाधिकरण्यादेव लक्षयेदिति तन्न भाष्यविरुद्धमिति स्पष्टमेव यदि तस्यानन्यमेवावलंबने तर्हि कः
थं चित्समर्थयितुं शक्यो तथा हि प्रकृतलक्षणे एव तथापि नञ्समासे उत्तरपदप्राधान्यप्रयुक्तकार्योल
त्वं ने अनञ्समास इति ज्ञापकात् उपेत्य प्रतिपत्त्यर्थो उपायाः प्रत्ययाः स्नातानित्यायात् समासेत्विति
वदन्वाक्ये नञो समस्ततया क्रियायैवान्वय इति ध्वनयति संबोधनान्तं त्वोर्थाः कारकं प्रथमोवानिः
धात्तसंबंधाधिकारनिषिद्धमसमस्तनञ् तथा यस्य च भावेन षष्ठी चेत्यादिनत्त्वं साधुत्वमप्येकस्यास्यक्रि
ययैवावधारितं युक्तं चैतत् त्वं पचसि युवां पचथ इत्यादौ नञ्समभिव्याहारे क्रियाया एव निषेधप्रतीते
रत्र भावसिद्धत्वात् भवति प्रयोगोपि नञ्येवन्यायत्वात् घटो नास्ति घटो न सन् अहं तत्र नास्मीत्यादौ वच
न पुरुषव्यवस्थादर्शनाच्च अन्यथार्थाभावे व्ययीभावस्य नत्वाच्च यत्तु भूतलाधेयत्वाभाववानिति इ

न्यर्थवर्णने तत्र क्रियानन्वये कारकविभक्तेरसंभवात् तस्मात्कारकविशिष्टक्रियायामनत्यर्थान्वयः

शाट्टस्त्येव तत्त्वं भाष्यवार्त्तिके प्रपञ्चलनाम् साम्प्रदायिकरीत्या पूर्वपदार्थप्राधान्येऽव्ययीभावः उत्तरप

दार्थप्राधान्ये तत्पुरुष इति विषयविवेकस्य सुलभत्वात् यत्तु वदन्ति यदाभावसामान्ये तदुक्तेनेन दाव्य

यीभावः अभावविशेषविवक्षायां तत्पुरुष एव तस्य नञर्थत्वाभावेन पूर्वपदार्थप्राधान्यसंभवा ।

दिति तत्र पापाभावो पापमिति स्वोक्ततत्पुरुषोदाहरणेऽपि अभावत्वेनैवाभावाभावेनाव्ययीभावस्य दु

र्वारत्वात् यद्विशेषस्य नञर्थत्वेनास्तीति तदपि न निर्विशेषस्य सामान्यस्याभावात् विशेषरूपेणाभा

वात्वे नास्तीति चेत्तर्हि अविघ्नमित्यादिरव्ययीभावो दत्तजलाञ्जलिरेव स्यात् इतिना किं विहितं तत् नञो

नलोपः इति निर्द्दे तेन समासाभावादप्राप्तौ वचनं अपचसीति त्वमपचसीत्यर्थः तणाहेनेति नञा

समासेत्वनेकर्थत्वे वभवतीतिभावः ॥ इत्यादिदिनिग्रचस्त्र । चिरादोक्तकपालियोगेविहिता हृयौदयो

पि स्वभावात्तत्रैव प्रयुज्यन्ते तत्राविः प्रादुःशब्दौ अकृत्तान्यैषां करोतिनैव योग इति माधवादिग्रन्थेस्यित

तथैवोदाहरन्ति ऊरीकृत्येति आविः शब्दस्य तु सान्तात्वात्त्रिभूर्निष्पादान्तस्य योगे गतिसंज्ञाविकल्पः

भ्वादिभ्य एव योगेनेन नित्यमितिभावः तथैतर्हि वारुणीमदविशोकमथाविष्कृत्वषो भवदसाविवरा

ग इति माघः अभवद्गणपञ्चिलोलजिह्वाकगलीरो भवतद्भिभागमाविनिच निरङ्कुशाः कवयः इ

तिहृदयत्वः वस्तुतस्तु ते प्रागधात्मोरिति सूत्रस्य प्रयोगानियमार्थत्वमस्तु तेन प्रयत्नावपि सत्तानियमार्थ

म· र· ५७

97

त्वपक्षे दोषलेशोऽपि नास्ति इति प्रपंचितं शब्दकौस्तुभे एतेन प्रयोगमस्य जहृवांचकार ज्वलनेव प्रदीपेति
भट्टिव्याख्यानं । हस्तेपरिगृह्येति हस्तागमनं स्थिता हस्तेन्यस्ता परिगृह्य चेति प्राय उदाहरणं द्विती
ये प्रत्युदाहरणं अपरिग्रह इतिच प्रयोगोपाधिनेत्र वाच्यो भेदो निर्विषयमितिभावः । कणेहत्येति । प्र
तिघातेनाभिलषणं तद्विषयं ते पिबतीत्यर्थः तथाच श्रद्धाया प्रतिगमात्तत्त्वनीत्यातो गम्यते प्रत्युदाह
रणे तु कणेहत्यागतः सूक्ष्मतण्डुलावयवः कणः तस्मिन् हत्वेत्यर्थः पुरस्कृत्येति नमस्पुरसोरि
ति सत्वे कथं तर्हि पुरः पुनः पश्यामि देवदारुमिति स्थितमित्यर्थात् द्वारेण इहैव प्रत्यग्गतित्वात् एतेन न
स्य स्थित्वा कथमपि पुरः केन काधानहेतोरिति व्याख्याने । अस्तंच अव्ययमिति किं अस्तं काण्डं हि
तमित्यर्थः अदःकृत्येति यदा स्वयमेव पर्यालोचयति तदेदमुदाहरणं । तिरोऽन्तर्धौ । अन्तर्धौ किं
तिरो भूत्वा स्थितः पांसुनो भूतेत्यर्थः । विभाषा कृञि तिरःकृत्वेति गतित्वाभावपक्षे सत्वमपि नेति
सोन्यतरस्यामिति सत्वविधौ गतिग्रहणानुवृत्तेः केचित्तु पराभावे तिरस्कारशब्दप्रयोगमत्र समन्वधा
नाः सत्वविरोधी गतिग्रहणं निवर्तयंतीति माधवः वाचं नियम्येति निर्वचने द्विवचनाभावः अर्थाभा
वेऽव्ययीभावः इत्यादिविशेषेण पदेन तानि प्राप्यन्ते नञ्समासे तत्संनियोगेन अगतत्वाचार्यैरिति अनेन गताः
थेह त्रिमस्य पदस्य विग्रहणानित्यसमासतां च दर्शयति अतिमालइति एवमभिगतोऽभ्रवसमभिद्रवः
उद्गतो वेलामुद्वेलः अवगतोऽस्तमस्तंगतः उपपदमतिङ् । अतिङिति नोपपदस्य विशेषणं किं तर्हि स

गै· ५७

मासस्य एतच्च अनव्ययस्य समर्थयोरिति सूत्रे भाष्ये स्पष्टं नचैवं किं सूत्रस्यानधिकारात् किं ग्रहणमनर्थ
कमित्युक्ता उपपदसंज्ञार्थं तदित्याशंक्यातिङिति समासप्रतिषेधात् तत्रानर्थकमिति सिद्धान्तितेन न
डेनटभिप्रेत्याह अतिङन्तस्यैति तत्र स्येनाधिकारात्तिङन्तेन न भविष्यतीति अत्राह अतिग्रहणमिति ।
पूर्वसूत्रे इति कुगतिप्रादयः सुबन्ताः सुबन्तेन समस्यन्ते ततः गतिः सुबन्तो तिङन्तेन समस्यत इति व्याख्येय
मित्यर्थः तथा चेति यद्यप्युक्तरीत्या गत्युपपदयोरेव लाभस्तथापि त्रितयविषयिणी भाष्योक्ता परिभा
षा एकदेशानुमतिद्वारेह्याविष्टा इति भावः षष्ठाकारकोपो कर्तृकरणे कृता इति सूत्रस्य बहुलग्र
हणं अकार्थसाधकं बोध्यं । मागीति हृदन्तादन्तत्पदान्सुबुत्पत्तेः मागीत्यर्थः प्रथमाश्रेतस्य ग्रहणं
इष्टान्तर्वर्तनेन इति अतएव राजदर्शीत्यादौ पूर्वपदेन लोपादिपदकार्यं सिध्यति परिभाषायाः फलं दर्शि
यन्नाति उदाहरति व्याघ्रीति व्याजिघ्रतीति व्याघ्री आतश्चोपसर्गे इति कः पाघ्राध्मेति शप्रत्ययस्तु संज्ञा
यामिति वक्तव्यात् व्याङोर्घ्राशब्देन गतिसमासः सुपदि अशब्दस्य सुबन्तत्वमपेक्षते न हि सुबुत्पत्तेः सर्वं
यपेक्षा ततः प्रागेव लिङ्गयोः लिङ्गनिमित्तस्य प्रत्ययस्याभावस्यानन्तरङीप् आशब्दमात्रस्य जातिवाचित्वा
भावात् ततो व्याघ्रशब्देन समासे सत्यदन्तत्वाभावात् जातिलक्षणो ङीष् तस्मात् इति भावः उपपदमुदा
हरति । कच्छपीति कच्छेन पिबतीति कच्छपी व्याघ्रीवत् सुपीति योगविभागात्कः एवमाचा उपप
दमतिङिति व्याख्याने तत्र तथा सति प्रथमान्ते सुब्ग्रहणानिर्देशा पत्याबहुविस्तवापत्तेः तथाहि नि

म० र० ४७

98

गेनइत्यत्रानिसोऽस्त्वं मर्थेनेत्यत्रनसोऽत्रभावः राजदन्तीत्यादौनलोपश्चनस्यात् प्राज्ञिनेत्यादावनोग्र
णाइतिपरहूपत्वंचस्यादिति । एतेनातिङ्क्षि । एथानाहूरकोव्रजनीनिप्रत्युदाहरणमपिप्रत्युक्तं
यदपिङ्गगानिसूत्रेउक्तं त्वादरस्याभिधानेन्वाख्यमेव प्रकृतेर्लिङ्गानुशासनस्यकेवलार्थाप्रकृतौ
उपक्षीणस्यत्वमनाङ्गितायामप्रवृत्तेर्लोपिकाङ्गवदितिलिङ्गातिदेशोऽयत्रप्रमाणे प्रकृतिलिंगानु
शासनानात्वमप्रत्ययेषुप्रवृत्तेनेतद्वयर्थ्यापत्तेः अतएवलवणःसूपः लवणायवागूरित्यादौन
क्लीवत्वं अतएवकुमारीब्राह्मणइत्यादिषुगृः चारकिबन्प्रकृतिकर्तृकबन्धपिविशेष्यानिघ्नत्वे
वाकेरस्यह्रस्वाद्ज्ञोनिर्देशेएवंवन्ताप्राचामपिस्वीकृतमेवेत्यलंबहुना यदिसमर्थेनीयमेवेत्याग्रहस्तर्हि
धाराधेयभावव्यभ्यासेनसमर्थत्वेनो ज्ञेयहणीयस्यामितादिनद्वयाधारभूतेत्यर्थलाभात् । उपान्त्य
स्यापीति । यथाप्रथमयोरितिप्रथमाद्वितीययोर्ग्रहणाद्विवचननिर्देशात् नयेहाप्युत्तमयहण
सामर्थ्यादेतयोर्ग्रहणं उत्तमोचएवासूत्रेनिर्विग्रहमेत्रद्विवचमितितेषामाशयः । द्वाण्डः प्राचा
ग्। द्विगोरिति । द्वारीशब्दात्रातद्विगोरित्यर्थः । अञ्जलमिति समाहारेद्विगुः ग्रामसहनः । प
दाधिकारेनदन्तस्यापि ग्रहणात्महत्त्वहृतात्रस्यापि कथंनहि परमसहृत्यादिमाणमिति । परमस
हृतोऽस्यास्य परिमाणमितिषष्ठीतत्पुरुषः इतिवृद्धाः यत्तुवर्धमानेनोक्तं इष्टकेषीकामालानां
मित्यत्र नदन्तविध्युपसंख्यानसामर्थ्याज्ज्ञरपदाधिकारेनदन्तविधिनास्तीति तन्नाभ्यकेय्यटविरुद्धं

औ० ४७

तथाहि । पदाधिकारे प्रयोजनं दृषत्काचित्रं पञ्चेन्द्रकीमित्यादि भाष्ये उदाहृतं कैयटेन च पदस्य
हेतोरुत्तरपदे इष्यते इति व्याख्याने एतदेवार्थेन: काशिकायांतु प्रतिबद्धं नतु ... कोशिकेत्यत्र स्वतन्त्र
मुपसंख्यानमस्ति । महतीशब्दस्येति । यत्तु प्राचोक्तं जातीयत्रासादौ तीयशब्दस्याप्यात्त्वं वक्तव्यमि
ति तत्र जातीयेतिनावक्तव्यं । पुंवत्कर्मधारयेति । आन्महत इति सूत्राभ्यामेव सिद्धेः तीयशब्दस्याप्य
प्राप्तेस्तीयत्वाद्युपेक्ष्यं । अष्टनइति । कपाले उत्तरपदे हविर्विषयवाच्यष्टन आत्वं वक्तव्यमित्यर्थः । अष्टा
कपाल इति संस्कृतं भक्ष्या इत्यणः तस्यार्थे पूर्वैतिलुगिति व्याचक्षते तदसमात् द्विगोर्लुगनपत्य
इति बोध्यं । ऊर्ध्वधिकार इति । एतच्च वार्तिककृद्भ्यामिसङ्क्ते यत्विह हृदयपदप्रकृतिः सिद्धये विस्पष्टादेरा
कृतिगणत्वं शरणाः स्वीचक्रुः तच्चिन्त्यं उपलभ्यमानस्य तादृशस्वरस्य हृदयेनानिर्वाहात् स्वरानेरे
पोष्टापत्त्राबाधकाभावादित्यादिक । एकादेः । अथ कि अकारोच्चारणसामर्थ्यादन्यतरस्यां न केचित्तु
स्पष्टार्थे मात्रकोदीर्घादिनामाहुः । राज्ञाश्चाहाः पुंसि । परत्वादिति यत्तु प्राचा एकवद्भावाल्लोव
तेस्तरुका अहोरात्रमित्युदाहृतं तत्रेत्यवोचाम यत्तु वदति रात्रादीनामेव षः नेन पुंस्त्वं विधीयते तदत्र
स्यात् परवल्लिंगमित्येव सिद्ध्यति अनपवादभिन्नविषयत्वात्तन्नावयतिषेधशंका एवं च समाहारेन प्रस
कमित्येव भवति परवल्लिंगापवादत्वादिति तत्र उत्तरोत्तरपाद्धहस्त्यहरदयपादावापि क्लीबत्वस्यापत्ते
षापत्तेः प्राचापि ह्यहस्त्यहरत्युदाहृतं तदाकारविरोधात्तु अमरोप्याह तेन त्रिंशदहोरात्र इति मा

म. र. मम

99

सेनस्यादहोरात्रइतिच तस्मादहर्देवसंबन्धेत्वाविधिः। दृष्टंतस्यपक्षयोरितिप्रकरणादितिनिश्चितं से
व्यास्मृतौवैमिति। तथाचलिंगानुशासनसूत्रे अपथपुण्याहौ नपुंसकौ संख्यापूर्वरात्रिरिति। अत्रवो
णाह रात्रेराकांस्यायान्विनामिति गणरात्रं निशाबाहुल्ये इतिच पुंस्त्वाधिकारेपि सपवाद गणरात्राः
प्राचल अहानेस्यात्स्त्रा अदन्तत्वनिर्देशादितिवदतो व्याख्यातः स्पष्टएव कालादर्शे इति एतच्च से
व्यावसायेति सूत्रेण्य समपदमस्त्यर्थो गेहाद् धातो माधवग्रन्थेचस्पष्टं यत्तुनसंख्यादेः समाहारइ
ति सूत्रेणावश्यत्रपणोर्त्वोगातिपूर्वित्रपूर्वत्रिकारादिभिस्तत्रं तदधिकत्रामितिभावः प्रसंगादाहुर्स्त्रियामि
ति दीक्षितः यत्तुप्राचाकालनिर्णयदीपिकायां पूर्वस्यात्रवमीत्रभाषदशमीकालासूत्रगाद्योथसाद्य
त्रीकालधगादिसोत्रवचनात्वाथोत्रैकादशीतिस्त्रोकेदृष्टीतिपधकत्रं सादमी हयोभीवाद्वत्री
त्यादिचलनहिवर्णोव्याख्याने तत्सर्वप्रमादिकमितिभावः तथाहि इहाद्वैतिद्वेष हिगोरिति
वा ग्राह्यपर्जनत्वाद्वन्द्वनत्वाद्वन्द्वनत्वाद्वा नाद्यः हतिकाराद्वन्नस्याऽ इहप्रमादिकत्वाह्लका
लमत्वाच्च नचपत्ययलक्षणं अणयोकारइतिव्याख्यानात् नापिद्वितीयः द्वन्द्वोयोकारस्तदन्ता
दितिव्याख्यानात् अतएवहिनिषेत्यत्रत्रीनाथेभागवतीयस्यद्वन्द्वोल्लकिदाबेवाकरे उदाहृतः हिव
हेत्यादावप्येवं नापितृतीयः द्वन्द्वः समासान्तनयानदन्तस्यतद्धितार्थे प्रसङ्गप्रसर्जनत्वात् अतएवस्या
पिशालिनामोक्तं अर्थाद्यानां ग्रामणी ग्रामिपत्यलेस्वदाहृतं भाष्यमते अप्रमाद्रजौवाधाच्च नापिचतुर्थः जे. मम

अपरिमाणेत्यादिना ङीपो निषेधात् तस्माद्द्विगावेवयकत्रः स्यादेतत् टाबप्यत्राः स्त्रीत्वस्यैव उक्तत्वे भवा
त् तथाच अह्नोह्न एतेभ्य इति सूत्रे कैयटेन टजभावात् राजाहःसखिभ्यष्टजिति वचनात्तद्योग्यत्व
भावात् ऊर्ज्जचो नास्तीह विशेष इति भेदं भावानवबोधात् इत्युक्तं कैयटाशयः सर्वविधिवद्काद्
वीजापवादो न्यायहितः न च संख्यापूर्वस्य तद्धितार्थे द्विगोर्विशेष्यलिङ्गत्वेन स्त्रीत्वसंभवेपि ऊर्जन
स्य तद्धितेनास्य उपसर्जनत्वात् अनुपसर्जनाधिकारोक्तस्याङीप्प्रतिषेधः प्राप्तिरेव नास्तीति न च ऊर्ज
चोर्विशेषः स्यादेव प्रमाणाद्यन्यत्र उक्तमेकाभ्यां चेत्यचो निषेधः अह्नादेशस्यैवेति मतभेदेन व्यव
स्थिते इतरेषां च ... राजाहःसखिभ्यष्टजिति वचनात्तद्योगे ... नास्तीति स्यादेतत् भवेयुरह्नानामाशयः
यद्यत्र द्विगोर्विशेष्यलिङ्गत्वं प्रमाणं स्यात् तदेवाक्रमिति चेत् उच्यते अमरसिंहेन पुंस्त्वे सभेदाउ
त्यात्: सपर्यायाः ... इत्यत्राधिकारे अह्नाह्नाः ... राजाह्नाः प्राक्संख्यैकादस्त
के अर्थेनाः ... तद्धितार्थे द्विगुः संख्याः सर्वनामतदेन्तकारिति वचनतः
परत्वं एवं चेह अह्नाह्नाः इत्यनेन पुंस्त्वप्राप्ते तद्धितार्थे द्विगुरिति परोपगत्वेन परत्वादेव बाध्यते
तथाचेतेनैव परिभाषितं परविप्रतिषेधे शेषत्वं ज्ञेयं शिष्टप्रयोगगतः इति तस्मादमरग्रन्थ उक्तार्थे प्रमाणं
किंच परवल्लिङ्गमित्यस्य राजाह्नाहारत्यपवादः यत्र तु द्विगुप्राप्ते इत्यादिनोत्सर्गो निषिद्धः तत्र तद
वादस्याप्रवृत्तिः स्पष्टमेव पतञ्जलि माधवेनापि धनेनामित्यत्र ... भवाम्यर्थं तद्धितान्ते

पयोपगमितिनिर्विवादे नङिनलोपेनपथः शोध्यते सत्वप्रमाणार्थं भिधायीति न्याय्येन भावाद्यर्थवत्त्व
वादेरप्यभिधानं न्याय्यमेव ॥ १ ॥ राजाहःसखिभ्यष्टजिति पथोस्यनेह्रिराजे त्रिरात्रइति द्वित्रिकं
रहस्यदन्नादिभिरुक्तं प्रेक्षप्रामादिकमेवेत्यवधेयं । अर्धर्चाःपुंसि च । इहकेषांचिदर्थभेदेन व्यवस्थं
तथाच शाश्वतः मकरन्दस्तु मद्यस्य माक्षिकस्यापि वाचकः अर्धर्चादिगणपाठात्पुंनपुंसकयोर्मथ
रिति भ्रमरस्तु । माधीके मधुनस्तु योरित्याह पात्रपथेनस्यनेति स्त्रीत्वमिति शेषः ह्लादिनाह्नमिति
ह्लादिनशब्दः प्रशस्तपर्यायः तथाचप्रयोगः ह्लादिनस्वसभास्वकार्यमेतन्न्यावेचिन्त्वेति विशेषणं
स्वयं चेति पथः कथं तर्हि व्यधोऽध्वधो विपथः कदध्वः कापथः समाइत्यमरः व्यधो विपथकापथा
वितिरभसकोशाच्च अव्ययः प्रमादएवायं वस्तुतस्तु पथोगतानाविनस्मात्यचाप्यचि पथानित्याप्नोति
पथः प्रकारान्तेरं तथाच त्रिकाण्डशेषः वाटः पथश्च मार्गःस्यादिति तेनसमासेप्रत्ययेनचैवं विपथ
सिद्धावपि कापथोनस्यात्कादेशस्यपुंल्लिङ्गत्वादिनिवाच्यं ईषदर्थेचेतितत्संभवात् उत्तायामर्थतः
पर्यवसानात् स्वतन्त्रबुद्धेयं परवल्लिङ्गतापवादत्वप्रसत्त्वाचस्यरूपएवेदं प्रवर्तनेनान्यत्र विषयपथान
गरी बहुव्रीहिरयं पथानमितिकान्ताअतिपथाइस्त्रापि न द्विगुप्राप्तेत्यादिना परवल्लिङ्गतायाः प्रतिषे
धादिति भावः एवंच न्याय्यसामान्येनग्रहणेऽन्यत्रापि राजाहाह्ना इत्यस्य प्रवृत्तिर्नेति माधवेनोक्तं प्रायम्
हृद्गपचतीति क्रियाविशेषणत्वात् द्वितीयान्ते धातूपात्तभावनाप्रतिद्विफलान्वयः कर्मोस्तुतत्तया

चफलसमानाधिकरणे द्वितीया प्रत्ययस्य प्रकृत्यर्थेन्यादौ कारकपूर्वत्वाद्यण् यत्तत्र भावनां प्रति
करणं तथाधात्वर्थे विशेषोऽस्त्येवेति नत्वनतिशेषणानोऽल्हीयाननैवज्योतिष्टोमेन स्वर्गकामो यजेते
ति यथा एतच्चकारेणोयजइति स्हृत्तेद्वितीयपदमज्योतिष्टु नचैवंज्योतिष्टोमेन भक्तिं पूर्वं यजेतेति
नोसंज्ञोदीनवाच्यं भावनाविशेषणत्वेनउपपत्तेः तत्रापि मन्दर्पणेन प्रार्थनाभिव्यज्यमानत्वात्क्रि
यायाः कृत्रिमकर्मत्वाविवक्षायां नद्विशेषणात् द्वितीया प्रत्ययात्प्रथमैवेति विवेकः सामान्ये
नपुंसकमिति चानियतलिङ्गविषयकं तेन ग्रामादि पचति पानवादिरिति प्रथमैव विस्तरस्तु कोस्त
भेवोध्यः पर्यायस्येवेति कथं तर्हि नृपतिसभामगामत्रवेपमान इति कीचकवधे राजशेखरवद्भ
त्वविशेषत्वादिति नित्वतिः विभाषाभेनास्वनिषामिति । कुम्भवनदेशोत्याङः नस्योकिलकोवि
ज्ञानउपसति तथा च निर्णयाधिकरणे शावरभाष्यमिति अतस्त्वत्रदेष्णाक्षुपवासतः पक्षणामइ
ति । इतितत्त्वकृपः । यस्यात्रिकस्येति यद्यपि प्राग्योगत्वाद्यर्थे प्रथमयोक्तं तथापि द्वितीयाश्रि
तादिभिरिति वक्ष्यमाणेन चित्सङ्गसमस्यत इति नोक्तमित्यर्थः वार्तिककृता प्रथमयेत्युक्तावपि
हृत्तकृता नोक्तमिति वा प्रत्ययस्यपदस्येति पदेनाह प्रकृत्यर्थोपसर्जनः प्रत्ययार्थोऽभिधीयते तथा
च द्वितीयार्थे इति फलितं नन्दादि प्रथमेति समानेति एतच्छेषपदोल्लङ्घ ग्रामीमित्यादि ग्राम
कर्मक ग्रामिकाद्दे उदक विग्रहार्थः उदककर्तृक ग्रामिकर्मेति समासार्थः विग्रहे सदृति प्रयोगः

म॰
टी॰
१०१
101

तस्याप्ययमेवार्थः यद्यपि क्रमप्रयोगार्थस्य कृत्ले बोत्तर्थे प्रतिविशेषणोऽविना तथापि व्यपेक्षावादेऽभि
धानात्समासेऽभिन्नैकस्युत्पत्तिः स्योकार्थो किंचवाक्येविशेषणात्मः पदार्थत्वेनस्य वचनामार्थेनयोदक
स्य नदभेदो वाच्यः स च बाधितः नो हि कार्यविशेष्या प्रामित्पत्कामित संभवति अपि च व्यासे समीची
नमुदकमितिवत्समस्तेऽपि उदकविशेषणप्रयोगः प्रामः स च दृष्टस्य विशेषणायोगेनेति वचनेन वा
रणीयः सिद्धान्ते तु बहूनामपि धर्माणां वचनैरेव लाधानेस्यान्महद्गौरवं तस्मादेकार्थीभावग्रा।
हिणः चकारादितिनिर्देशोऽपि बहूनामप्यविभाजनेकर्तव्येन्यायसिद्धं त्वस्माकं त्वविदितिसियत
गृहेत्यादि यत्र द्रुहकार्येकोऽहूनकर्मणो यथा यथ कर्मकोऽहूनकर्तातु समासार्थः तत्र सम्प्र
दानकोपहरणकर्मपशुः पशुकर्मकोपहरणस्य संप्रदानः स्थाल्यवधिकोऽहूनकर्म गौः तः गोद
नकर्मकोद्धरणावधिस्थाली यथेः इह कर्मादीनां समासेनाभिहितत्वात्प्रथमा । प्रथमान्तेष्विति ।
बहुषु वेऽन्ययोर्न समासः शेषत्वादित्यत्र तात्पर्यं । अधिकरणानामिति । एवं अकृपदहेतुः इत्य
शेषग्रहणफलं प्रतिबद्ध नचोन्मत्तगङ्गमित्यादिष्वाह्वाद्वित्वतत्फले एकसंख्याधिकारेणैवतत्सि
द्धेरिति भावः अनेकोक्तिं बहूनामपि यथा स्यात् तदुदाहरणं तु स्थूलेपवस्फुटीभविष्यति एवं चात्र
हाविन्युवाच वचनेन नत्रसपोति यत्र सप्तपत्यत्र हृद्यानेकं स्वबन्तं स्वपा सह हीनि व्याख्याने तत्र द्विप
दवस्त्रीयासमिद्धिप्रसंगात् प्रादिभ्य इति प्रादिभ्यः परं यज्जातं तस्य पदान्तरेण सह समासो व्याख्येयः

गो॰
१०१

स्त्रत्वसिद्ध्यर्थोऽत्रवादोयं वाचेति इदंतत्ववाचनिकं सर्वपदांतर्गतस्योत्तरपदस्य धात्वजस्येति या
वल्लोपोवाच्यः एतच्चमहोपानामेव वृत्तौविशेषार्थत्वान्नित्वामाश्रित्यसूत्यते । स्त्रियः पुंवत् ।
कुङोभावइति यदित्वकुङः न्योत्तुङिति पत्कृदासस्यान्नहिंसाबाधंतमेवसूत्रयेन ततः किमिति
चेत् इडविडोरपत्यं जनपदशब्दात्क्षत्रियादञ् । पेडविडःस्मः । दरदोपत्यं ... शब्देनयण
दारदः तयोःस्त्रियामनद्योतिलुक इडविड् दरन्साचासौहेदारिकाच पेडविड्दारिका दा
रदहृदारिकेति नसिद्धेत् नह्यत्रस्त्रीप्रत्ययःकश्चिदस्तीतिभावः निपातनादेति । एतच्चसूर्वं
त्रापियोज्यं वैय्यधिकरण्येनस्वरसंतोबहुव्रीहिर्दुर्लभत्वात् । लोगाति । इहभाषितपुंस्कात्पुंस्कात्त
त्तीतिभाषितपुंस्कादनतंविशे एवंचसमानाधिकरणाबहुव्रीहिः ग्रलगर्थेचयत्नोमास्त्विति
घट्टापिस्त्ववचे तथापिप्राचामत्रत्रोधेनलिंहव्याख्यानमित्यवधेयं । षष्ठ्याश्चेति । एवंचकेषा
चित्षष्ठ्यांतपाठोनाऽकारः इत्युक्त्वादिग्रस्याविरोधादितिभावः तल्पेइत्यादि ग्रयंभावः भाषितः
पुमान्यास्मिन्नर्थे तद्भाषितपुंस्कं प्रवृत्तिनिमित्तं तदस्यास्तीति ग्रर्चाद्यच् तेनतुल्येप्रवृत्तिनिमित्त
उक्तपुंस्कात्सरूपं लभ्यतइति स्त्रीवाचकेति । एतेनस्त्रियाइत्यस्यस्त्रीप्रत्ययपरतावारणीत
तथाहिसति इस्यसूत्रार्थःस्यात् ग्रतूङःस्त्रीप्रत्ययस्यपुंवत्प्रवृत्तिनिमित्तइत्यर्थः यथाप्रमत्तभूमिवत्
स्त्रिनमे जलमित्युक्तेःभावोतिदिमपनेनहन् नन्वयमेववाक्यार्थोस्तु यथोक्तंप्राचा उक्तपुंस्कं

म॰
र॰
१०१
102

न्यस्मात्तूरुः स्त्रीप्रत्ययस्यैवत्स्यात् एवञ्चावान्तरीप्रत्ययलोपइतिचेन्नैवं अस्यार्थपञ्चभार्यप्रवाः ने
कथाहूषितत्वात् तथाहि अस्मिन्पक्षेपञ्चभार्यइत्यत्रोत्तरपदेनिमित्तयाऊीषोनिवृत्तेः अचःपरस्मि
न्निति स्थानिवत्वेसतिगुणस्स्यात् किंच वतंडस्यापत्यं वातण्डोवतण्डाच्चेतियञ् तस्यस्त्रियामिति
ल्लुप्तेसतिलुकि शार्ङ्गरवादित्वात् ङीन्वतंडीचासौवृन्दारिकाचवातंडवृन्दारिकेति इष्यते अत्रङीनो
निवृत्तावपि अयंयञन्तस्त्रीत्वस्थानेनिवृत्तत्वाल्लुकि स्त्रियामपिप्रवर्तते अपिचैवं पञ्चवृन्दारि
केत्यादिप्रयोगोनसिध्येत् किंच गार्ग्यस्यनात्वृन्दारिकाच गार्गीवृन्दारिका ङीपितिवृत्तेपियञ्जोरि
तिलुकस्यात्स्त्रियामितिनिषेधात् तस्माद्यथाक्रममेवग्राह्यं । लौकिकेति । यद्यपिविग्रहायगवा
मयामिति मीमांसकैर्विगृह्यते तल्लौकिकालौकिकविग्रहवृत्तत्वादप्रयोज्यमितिभावः पञ्चसुमास
जातमितित्यत्रप्रयोज्यते । विग्राग्रामिति । अन्तरेणापीतिन्यायादिहपूर्वंसमासोपदेशोनप्रवर्तते
अन्तरेणापिकार्यस्यपरादित्वेन स्वपोल्लाके विग्रहवित्यत्राकारेणलभ्यतेतिभावः । नेहेति । इष्
सिद्धेनतोषेन पूर्वपदंस्वविदातिष्ठते नतुसर्वत्र तथाचोक्तःसहाभ्यसद्दतिसूत्रे इत्यत्रेनेत्यमेः
वोक्तमितिभावः । प्रातङिति । तथाचसमर्थसूत्रेभाष्ये ङ्योतिपाल्लनेपङ्क्तारइत्यत्र चत्वारोऽर्थे
ल्लोपस्य प्रातङ्लोप्तः पूर्वपदापेक्षेणनासिध्यत् तस्यचतेषांपूर्वपदत्वापितदन्त ङ्गस्वपू
र्वपदत्वादितिभावः अन्तपदेति पूर्वपदानाक्षेपादेवेत्यर्थः । विग्राजरादीति । नवेडहृद्धात्मक

ओं॰
१०१

स्य पूर्वपदस्य पुंवद्भावोक्तं तथाचदाक्षिणात्येनैवेति वाच्यं द्वंद्वांतर्गतयोः स्त्रीप्रत्ययप्रकृत्योः
प्रत्येकं भाषितपुंस्कत्वेपि उदाहृतं द्वंद्वस्यानर्थान्तरत्वात् पट्वीमृद्व्यौ भार्ये यस्येति विगृह्य पट्वीमृदुभार्य
इत्युदाहरणं भाष्यकारेण सर्वमिदं ध्वनितमिति भावः । द्वयोरपीति । पूर्वपदांतर्गतशब्दद्वयस्या
श्रितप्रथमस्यापि पुंवद्भाव इति भावः । जरत्यश्चेति । पूर्वकालैकेति सूत्रेण जरच्छब्दस्य प्रथमानि
र्दिष्टत्वेनोपसर्जनत्वमिति लिङ्गविशिष्टपरिभाषया जरत्याः पूर्वनिपातः । कर्मधारयोत्तरेति । एतेनाः
दृष्टमहच्छब्दपजमिति प्रयोगो व्याख्यातः इह पक्षद्वके बहूनां बहुव्रीहौ पूर्वपदेन पुंवदित्यस्य ज्याद्
यविशेष उक्तः श्रोतिप्रियेत्यादौ विशेषांतरवत्येति यत्र प्राचा नीलोज्ज्वलवपुरित्युदाहृतं तत्र ब
हुविशेषो बोध्यः तथाहि बहुपदे बहुव्रीहौ नीलशब्दस्य प्रकृतिस्वरः कर्मधारयपूर्वपदे तु कर्मधार
यस्यांत उदात्त इति महान्भेदः स्त्रीप्रमाणीयस्येति कल्याण्यादिस्वरूपत्वात्प्रमाणीशब्दे विशेषलिंगः
दित्यात्रु स्पश्च कथं तर्हि प्रमाणीयो सूत्रनावित्ति भावः भाष्ये भावे ल्युडंतात्कर्तरीनीति णीवि पचाद्यवि
टाश्च भाष्ये प्रमाणमयनेयानस्थूलसूक्ताङ्कानियतः स्त्रीबंतादयतेस्म स्मात्प्रमाणस्थूलनिरूच्च
ते इत्यादिग्रन्थेनायतेः स्त्रिबंतस्येदं रूपमित्याहुः तत्र छंदस्यपीनीतिनक्क उर्वीः श्यामशास्त्र
मनित्यं श्यानिकामिति इहलोके ग्रन्थमेव यदण्याहुः आर्वलीति यलोपोहि वलादिप्रत्ययाश्र
यस्येति तदप्राप्तानतः तत्र प्रत्ययग्रहणस्याप्रकृतत्वात् गोधेरः पचेते इत्युदाहरणविरोधाच्चेति ।

ते ५

भिनितु

यद्वाप्रमाणमितिवावरत्नीत्यावाः स्त्रिबन्तात्पचाद्यच्यु ५

म॰
र॰
१०३ तत्र॰
103
रिति॰

प्रसंगेनावतु परिगणितात् अनसार्द्धं तद्योदशक्रमेणोदाहरति बहुष्विति । यद्यपि बह्वादिभ्यो
वैकल्पिकत्वात् अदभावे बहुत्वेत्यादि सिध्यति तथापि पाक्षिकानिष्टनिवारणायेदं यत्नप्राचाननः तदेत
दाहृतं सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः त्वनेनग नार्थत्वाद्यपेक्षितं । दृशीनीनरेति । यत्नप्राचापदतरापकृत
मेतदुदाहृतं तत्वामातिकमिति ध्वनयन्नाह । यद्यपेति । बहुष्वेति प्रकारवचनेथाल् तचाहि किंस
र्वनाम बहुभ्यस्त्वाधिकृते स्वकतिः स्वकजेयप्राभ्योतिल् तानि लोकोच्छेदसीनिल प्रजाश्चेति प्रजाविर
भ्यापत्त्यान् पासीति बहुल्याद्यादित्यप्रमपिशास्त्रमिलादिप्रजप्रदत्ताद्यर्थः त्वतलोरिति प्रत्रवदंति
जातिसंज्ञाव्यतिरिक्तं धर्ममात्रेगुणइति एवंचक्रियाशब्दानां प्रयत्नेन पुंवद्भावइतिभावः अतएवप्रा
चानकोपधायाइति सूत्रे पाचिकात्वमित्युदाहृतं तत्वोत्रेणचत्वतलोरिति मामिरितिव्याख्याते तदे
तत्सर्वंभाष्यविरोधादुपेक्ष्यं तथाहि एकतद्धितेचेति सूत्रे एकतापकत्वमित्युदाहृत्य पुंवद्भावेनसि
द्धमित्याशंक्यभगवानाह उक्तमेतत् त्वतलोर्गुणवचनस्येति अत्रकैयटः एकशब्दस्यसंख्यावचित्वं
यो गुणवचनत्वेपि असहायवाचिनो तथात्वादितिभावः एवंहिवदता शुक्लादयएवेह गुणाइति
ध्वनितं अतएवोदाहरति शुक्लात्वं शुक्लतेति अतएवचमयदाहरति कर्त्र्याइति कर्त्रीत्वमिति तथा
वक्ष्ययामिति सूत्रेव्यापिनीत्वात्यदृत्तिरितिकैयटेनोक्तं तथाप्रयोगादृतिसूत्रेतोस्ययाः संविधाचोत्वा
द्विति तेनैवप्रफक्तं प्रश्नस्यसंज्ञाकरणेपि [illegible] दितस्तक्तं स्यादेतत् निरीच्यमे

गे॰
१०३

कार्तृत्व

नेशब्दः कृतार्थेनां स्त्रीवतामुपगतास्वनुवेलं प्रहृतारहसि भर्तृभिः सा तु मोचयति नेडः स्वशीलता
मित्यादिप्रयोगा[illegible]णां का गतिरित्यत आह शब्द इति सामान्ये इति तथाच पत्युर्नो यज्ञसंयोगे इति ।
सूत्रे पत्याः फलग्रहीतृत्वादिति हि त्रियन्य उपादाय मात्रे विवादिनेनत्वस्त्रीत्वमिति निर्देशकृत इति हरदत्तो
व्याख्यानात् परः संनिकर्ष इति सूत्रे एकैकवर्णावर्तित्वाद्वाच इति भाष्ये कैयटोप्येवमाह एतेन नेष्टंप्रो
हावनीत्व मासीदिति माघो व्याख्यातः । गोहृतो य इति । गोह्नि शब्दाद्गुणे दत्तदासादिनिर्देशमका
गो पुंवद्भावेत्र सति तयोर्निहृत्वा गोहृनेय इति स्यादिति भावः । शृगुत इति व्याख्यानमेवात्र शरणं श
त्रुपर्यायादिति अत्र च व्यन्सपत्ने इति निर्देशो लिंगं विपोवैरिसपत्नारीद्विषत्रद्वेषणदुर्हृदस्त्यमरः ।
विवाहनिबन्धनमिति तज्जन्यसंस्कारविशेषवत्त्वमित्यर्थः । सापत्न्य इति भाषितपुंस्कत्वात्पुंवद्भा
वे कृते नेयस्येति लोपः एतच्च स्वजात्यहृत्वे स्पष्टं यत्तु पारहणे इति धातो माधवेनोक्तं भावकर्मणोः
पत्यन्तलक्षणो यक् सापत्न्यं अभाषितपुंस्कत्वात्पुंवद्भावो नेति तत्त्वद्वितीयं सपत्नीशब्दमाश्रित्येत्यः
विरोधः यत्तु नित्यं सपत्न्यादिष्विति सूत्रे न्यासकृतोक्तं समुदायोच्चारणं पुंवद्भावबाधनार्थमिति तत्र
समानस्यभावोधकृत्वार्थं च निपातनाश्रयणेन समुदायोच्चारणस्य तावत्यैवोपपत्त्यात् अन्यथा संबु
धिकस्वादीनां अपि बाधापत्तेः किंच नसिलादिष्विति सूत्रे भाष्यकारेण सपत्नीशब्दाश्चिवादेनो
भस्यान्त इति पुंवद्भावेन सापत्न इति प्राप्य आशिवादिषु केवलयौगिकस्य ग्रहणान्नेत्याशयेन सापत्न

३

इति प्रयोगो वारितः । निपातनस्य पुंवद्भावनिवृत्त्यर्थत्वे तन्मते विरुध्येतेति दिक् । भावत्क इति । आ
वश्यकत्वमेवाः भवतोपि पुंवद्भावो विधीयते अन्यथा हि कृते ह्रस्वादेशे भवत्यां पुंवद्भावे सति विधानपरिष
या कादेशो न स्यान्माथितिकवत् । भाष्यकारेष्टेति । अनेन सूत्रवार्तिकयो [illegible] सङ्ग
संभवोपि ध्वनितः उत्तरे हि ह्यार्पूर्वस्याप्रवृत्तत्वात् निष्कर्षे तु वैयर्थ्यं स्पष्टमेवेति भावः इष्टोदाहरण
न्याह सर्वमय इत्यादिना मयप्रत्ययादीनां परिगणितानां तसिलादिबहिर्भावात् न सूत्रेण गतार्थता अ
तएव सर्वतः सर्वत्रेत्यादिनोदाहृते सर्वकाम्यतीति न च स्त्रियाः पुंवदिति सूत्रेण गतार्थता न कोप
धाया इति निषेधात् न चास्यापि तेन निषेधः शक्यः स्त्रियाः पुंवदित्यादिप्रकरणाङ्गस्यैव तेन निषेधात्
अस्य त्वङ्गत्वेनास्मिन्प्रकरणे असमा[illegible]विष्टत्वात् सर्वाम्यय इति अन्तरेणमियादिष्विति पर्युदासात्
ग्रामे सर्वस्येति वृत्तिग्रन्थकानेकभागमध्ये किंचिदपेक्षया सर्वस्येत्यर्थः अत एव तदितरेत्यादावप
रस्य न पुंवद्भावः । लिंगादिति । अन्यथा पश्चाद्भावनयोः कार्यसर्वस्य आपि विधीयमानमित्वं निर्विष
यं स्यात् इति भावः यत्तु प्राचोक्तं सर्वनाम्नः समासे पूर्वपदं वत् यत्तु व्याचष्टे गौणिकार्थमत्र वदति
सर्वनाम्न इत्यादिना सर्वनामग्रहणेन संज्ञोपसर्जनभिन्नमेव गणपठितम् उपलक्ष्यते तेन सर्वनामका
चित्रस्याः पुत्रः सर्वापुत्रः अतिसर्वापुत्र इत्यत्र नातिप्रसंग इति तदेतत्सर्वं मायानरमणीय तथा हि
समासे इत्यनाकारे वृत्तिमात्र इति भाष्यात् मध्ये नैव्यासंच तथा च श्रीहर्षः प्रायः निर्ग्राम

मपिपावनीमयंभवन्मयोध्यायतिनावनीपातीति किंच ब्राह्मणीपूर्वइत्यादावतिव्याप्तिः नच
जातिस्त्रीतिनिषेधः सौत्रप्राप्तिविषयकः सद्गतिसिद्धान्तात् रूपवतीपूर्वइत्यादौ जातिवाचक।
त्वाभावेनातिव्याप्तिदोषोद्धवार्त्तिकार्थमित्यपिस्यवीयः वार्त्तिकग्रन्थेपतदभावात् नचात्रविवादे
तवां टकच्छसोरित्यस्यानिरालंबनतापत्तेः सर्वनामशब्देनत्याद्यापिन साधूक्तोदाहरणयोःल
क्षणांविनापिसम्भवत्वात् दक्षिणपूर्वाये इत्यादावुपसर्जनतया ऽव्याप्त्यापत्तेश्च नञ्समासयह
णसामर्थ्यात् सर्वनामनाउपलक्षणे नञ्विशेषणे तेनसूत्रेःप्राकृतसर्वनाम्नः सम्बन्धिनांसर्वनाम
त्वेपि पूर्वइत्यादौ वालभ्यते इत्याकरोस्थितं मयापिस्वग्रन्थे उक्तमितिचेन्न उपसर्जनभिन्नालक्ष्यते
इतित्वदुक्त्यात्वदुक्तैवपराहतेत्यवधेयम् नचैवमतिसर्वाद्युपज्ञेतिव्याप्तिः प्रतिसर्वशब्दस्य
कदाप्यसर्वनामत्वेन तत्रातिव्याप्तेः प्रसक्तिसंभवाभावात् इत्यालोचनावन्तः स्वभिन्नामिति यत्त्वान्मान
मेवदर्शनीयां मन्यन्ते तत्रास्त्रियाः पूर्वादित्येवसिद्धे एकस्यापि द्रूपभेदेन कर्मत्वकर्तृत्वयोः सत्वेपि
वास्तवाभेदेन सामानाधिकरण्याविरोधात्तानादिति भावः। मद्रिकायतनइति। मद्रेषुभवा माद्रिका म
द्रवृज्योः कन् पाकाभार्येति अर्भकपृथुकपाकावयसीति कप्रत्ययान्तोयं उणादिषु निपातितः
नत्विहतादृशः नापितुक्त वयसि [illegible] प्रथमइति ङीप्बाधित्वाजादित्वात्टाप्। वृद्धिनिमित्तस्य।
वृद्धिशब्देनेति किं तावतीभार्यस्यतावद्भार्यः प्रासर्वनाम्न इत्याकारविधौ वृद्धिशब्देनास्ति यत्ता

म. र. १०५

105

यथानेतिनिमित्तशब्दः फलोपहि[illegible] तपरः स्वरूपयोगपरत्वेन वैयाकरणभार्येनासिद्धेति भा
वः स्व[illegible]केशीति । सहनञ्विद्यमानवाच्ये तिङ्गीबभावः । जातेश्च । जातेः परइति जातिवाच
कात्पुंस्त्वमात्रमिह विवक्षितं न तु जातेरित्येवविधानपर्यन्तमाग्रहः भाष्येऽस्तिकमित्युदाहरणे
गोपसंख्यानिकस्य नापि निषेधः स्त्र्यङ्गेः नेन हास्तिनीभार्य इत्यादौ नान्तलक्षणस्यापि निषेधः सिद्ध
नीति भावः यद्यपन्यपद इति टाबादि :प्राचान्नि विशिष्टेऽङीबेवापातः नात्रि मूले सूक्ष्मभार्येत्यादावव्या
मेश्चेतिभावः । ब्राह्मणीति । शार्ङ्गरवादित्वान्ङीष् यत्तु प्राचा ङीष् प्रवृत्तिरिति व्याख्याय ब्राह्मणीभार्ये
त्युदाहृतं तन्मूलविरोधादुपेक्ष्यं । सोऽत्रस्येवेति । व्याख्यानमेवात्र शरणं संख्यया समानाधिक
रणस्यान्यपदार्थेष्ठेत्त्व विहायानुवेणाप्रासेवचने उपदेशादिति उपशब्दः समीपे न समीपे वर्तते
प्राप्तैरव्ययीभावः द्वितीयत्वबहुव्रीहिरिति विवेकः । निविष्टनेतीति । सूक्त्रेनीति लक्षणषष्ठीकमि
त्याहृतिशब्दस्येति अन्येषामपि दृश्यते अत्र प्राचोक्तं दृशिग्रहणात्कमेव्यातिहारबहुव्रीहेः सर्वेप

त्व

दोनस्य दीर्घमात्वं वा इ[illegible]चीति उचीति किं अस्यासि मञ्जुत्वे त्यपाणिनीय अत एव मृगाक्षिवा
ह्याबाहुवेस्त्वदाहरणमपि अप्रामाणिकमेव भाष्यादिसंविवादात् अत एव दृशिग्रहणस्य दृश्यार्थे
नान्यर्थे न कल्प्यमिति प्रामाणिकाः पन्थाः अर्वाचीनत्वात्समाहुः तथा च पाणिन्यकाया विलो
चनदासेनोक्तं नाम्येन सर्वेपदस्यात्व दृश्यते इति एवं च प्राचोक्ते विंदितिवत्क्षुभितं पाणिनीय

ओं. १०५

त्व४

सूत्राशयमर्थोनिर्देशपरत्वत्रचिनप्वेनिर्दिष्टः । गोस्त्रियोः । नह्यनेकंपदंद्वी गुणोक्तिरिति यद्यपिगो
णोदीति सूत्रे निषिध्य नह्यनेकमिति सूत्राद्बहुपूर्वकमस्त्येव तथापि विधेयसमर्थकंपद यत्र सूत्रा
पि मृषवसूत्रापूर्वकोविधिरितिभावः नेनसूत्रेनित्यत्वाद्योगो नन्वयोगोक्ति सूत्रेवदशभिःप्रत्रभि
रेवह[illegible] नित्यादेशी विद्यमानतावाचीसहशब्दः दशसुप्रत्रेषुविद्यमानेष्वित्यर्थः । वोपसर्जनस्य
उपसर्जनस्येतिनसहस्यविशेषणमसंभ[illegible]वारात् किंतूत्तरपदेनसन्निधापितस्य समासस्य तच्चा
वयवद्वारकं उपसर्जनसहावयवकस्य समासस्य बहुव्रीहेरितियावत् व्यधिकरणेचषष्ठ्यौ तदे
तदाह बहुव्रीहेरवयवस्येति तेनेहनसहकृत्वासहप[illegible]प्रायिकमिति सहयोगायाः प्रथमायाः
उदाहरणं सकर्मकात् इत्यादिनिर्देशादितिभावः स्वरेविशेषइति उचमानोचितइत्येतोदात्तस्या
त् प्रसक्तितत्पूर्वपदप्रकृतिस्वरइत्यर्थः । संख्यायाइति । संख्यानस्य तत्तत्पदस्यान्यावयवोऽन्त्या
चइत्यर्थः एकविंशतिरित्यादावत्र ग्रन्थाधिक्लोपात् इतिवार्तिककारोक्तेः स्थूलादेतियत्
प्राचामन्नदाहृतं स्थूलादिचवेति नत्र ग्रहणोदर्शनादित्यत्रसमासात् यत्तु व्याचख्युः समासो
तविधेरनित्यत्वान्सन्निति नदातानतः एवंहिषष्ठीपितथैवनभविष्यतीति प्रत्युदाहरणस्यास
गतिप्रसंगात् । नेतनत्वइति । नत्वेत्रयोनेत्रशब्दः नदन्ताद्बहुव्रीहेरित्यर्थः नेतानायकः
नत्वस्थूलपूर्वादिति स्थूलपूर्वाद्बहुव्रीहेरजेत्यर्थः । खुरखराभ्यामिति नासिकायाइत्यपेक्ष्यते

जी
यद्यपि ङेदित्रितपर
त्वात्कालस्य संज्ञैवन
प्राप्नीह नकारउच्चार
णार्थः ङेरेरत्येव
वास्तुस्वरूपंशब्दस्य
निग्रहत्याख्यानमिति
भावः ५

त्रयं २

त्व ६

ज्वा ४

म. र.
१०६
106

केवलादेशवचनं प्रत्ययनिवृत्त्यर्थं । उपसर्गाच्च । उपसर्गग्रहणं प्रादीनामुपलक्षणं नासिकाशब्दस्य
क्रियार्थत्वेन तेषामुपसर्गत्वायोगात् नन्वाहुर्पादेरिति तद्वक्तेति प्राणोन वयस्यो अक्षः प्रक्षः सुधाद्त्वा
दौ अव्याप्त्यतिव्याप्तिप्रसंगादिति भावः शोभनं प्रानं यस्येति प्रानःशब्देन प्रानलक्षणं कर्म लक्षयति अन्य
था प्रानःशब्दस्याधिकरणप्रधानतया सामानाधिकरण्यासंभवात् इत्याहुः एणीपदादिष्विष्विति
पातनान्यज्ञावः धर्मादनिच् केवलात् इह बहुव्रीहिणा पूर्वपदमाक्षिप्यते इत्यन्यपदमेवव्यपैति
नन्वकेवलादित्यनेन विशेष्यतामित्याह केवलादिति यत्तु प्राचा केवलादित्युभयविशेषणतयाव्या
ख्यातं तन्नोपेक्षणाकेवलादिति धर्मशब्दस्य पूर्वपदस्य च विशेषणमित्युक्तं पाणिनीयमतदर्पणे
च केवलादिति केवलं धर्मपाकरदयो मतमित्युक्तं तन्नसर्वमायाततः धर्मपदविशेषणे प्रयोज
नाभावात् धर्मशब्दात्ते यत्नोत्तरपदेन ह्याद्यतिः फलमिति चेन्न धर्मशब्दस्य बहुव्रीह्यवयवोऽन्तस्य
वं मं
वं[illegible]पदान्तरस्याभावात् । त्रिपदेबहुव्रीहावपीति । इह सर्वनामसंख्ययोरुपसंख्यानमिति स्वयाह
सुहृदेति पातो न भवति आहिताग्न्यादेराकृतिगणत्वादिति हरदत्तमाधवौ आपत्तिकामिति तन्न
तपवकेवलग्रहणं व्यर्थं पूर्वपदशब्दस्य समासप्रथमावयवे रूढत्वेनैव मध्यमपदस्याद्यतेः संभवा
दिति चेन्मैवं पूर्वपदापेक्षेनान्यार्थग्राहकत्वेनैव केवलपदस्य सार्थकत्वात् येत्वाहुः साध्योधर्मो
यस्येति साध्यधर्मा सान्दिग्धस्त्रासौ सचेति विग्रहः सचसदेहः साध्यधर्मद्वारकपरवर्पयवसतीति सो

जे.
१०६

यंत्वृषाक्षेशः उत्तरीत्यैव साध्यस्य साक्षात्संदिग्धत्वलाभात् तत्र कर्मधारयप्रवृत्तौ निवृत्तलेभः
केवलादित्यस्य समासस्ता तत्काद्विन्यष्ठोदितिचेन्मैवं त्वदुक्तेहितार्थस्याकरग्रंथानारूढत्वात् अ
स्मदुक्तार्थस्य हादियोग्यत्वधारणेऽन्नतिधाती माधवग्रन्थेस्पष्टः निष्ठाविधमोहि स्यानीतिमाचांय
योगोपि अस्माकमत्र कल्पदृतिनिष्ठिदृं दंतेचेति तथाचदृश्यते इमजम्भस्तनोपि वति । दंतिमो ।
लक्षेत्राव्याधः प्रतपदवाह्व्याधेनेति कवयस्तुहि सामान्यप्रयुज्यते बालोह्य माकामालीयणानिधि
विग्रहणानि मिनोदावि णामेति यथा केशाकेशीति तत्रतेनेति बहुव्रीहिः तत्रोद्ग्रहणप्रहरणकड
नेव कर्मव्यतिहारोपीति शब्दाल्लभ्यते इच्कर्मस्य निष्ठक्षुप्रभृतिषु पाठात्तदन्तस्याव्ययीभावत्वे तत्वे
वमव्ययीभावसंज्ञा बहुव्रीहिसंज्ञाया बाधात् समासस्वरेणान्तोदात्तत्वं सिद्धं तल्किमितिचेत्तन्न
न प्रत्राः विशेषणार्थेनत्व निष्ठक्षुप्रभृतिषु इकारमात्रपाठेहि सर्वोधिरित्यादौ वनिव्याप्तिः स्यात्
यद्वादंडादंडीत्यादौ संज्ञयोः समावेशाय उपजीव्यविरोधस्यान्याय्यत्वात् एवंच स्वरार्थमपि चित्र
हि दंडीति । द्विदण्डि ग्रामात्यत्र तत्र च न समुदायनिपातनस्याविषय विशेषणेरग्रहणार्थत्वात् उभा
हस्तीति निपातनादेवायं विनापि प्रयोगः उभयाहस्तीति पन्तयत्र उभयाहस्ताभर प्रसंगात्
जात शब्दस्यैकत्वेपि प्रथगतस्प्रणप्रतिबन्धनं वाद्वित्वमाश्रित्य जातेनोतीति द्विवचननिर्देशः न
त्फलं तु स्यानपष्ठीत्वस्फुर्धीकरणं जातेनरत्न केहि पञ्चमीयं मन्यथाधिकारांच्च त्राणि प्रत्ययः

म॰
२॰
१०
107

निसंभाव्येत नदेतन्नुनयन्नाह उगादेशइति ह्युंदसीतिस्वनेत्रोपिद्रष्यते उपस्तुवाधोनसमासदेस धत्र
षत्त्र धनुरंतस्येति धनुरंतादितिन्प्राचः प्रमादः प्रथकाय स्वलावर्णणांसमानधनुरममकोपयत्तणव
दितिग्रुश्छदेनः समासांतविधेरनित्यत्वादितिनित्यत्वेप्रमाणंतु यत्वादिगणेराजन्शब्दस्यपाठः सोहस्रा
नेरत्नादयस्तस्मात्त्वेत्यंनोदात्ततार्थः राजाहः सखीतिङ्चोनित्यत्वेनांकिनेनतिदिक्कु यविभागेनेति।
एवंचगुणवाचिनएवेयग्रहणंनतद्र्व्यवाचिनइतिफलितोर्थः । इच्छाणीति अतिचगंधगगुहैद्रव्यवच
नः वहुनिजलंमिथ पिनोष्ठगंधानियामियप्रयुज्यते स्वजोविचित्राइतिदर्शनात् गंधस्तेसोरभेन्दत्वे
गंधकोगवलेशयोः सएवद्रव्यवचनोबहुत्वेप्रोसिवसहृतदतिरभसकोशाच्च एतेनमहाभूतःप्रश्याह
गंधिरादेदे भग्नवालसहकारस्तगंधा इत्यादि व्याख्यातं एनच्चसर्वेहृदयद्रग्रन्थेस्पष्टं केचित्तुनदेका
नशाहुस्वाभाविकत्वस्यविवक्षितत्वात् आगंतुकस्यनेत्याहुः तथाचभट्टिः आज्ञायिवानास्थवहः
सुगंधइति व्याख्यानंचजयमंगलयो । गंधस्येदुत्पूतिसुसुरभिभ्य इति इकारसमासांतोत गंधस्यत्वे
नदेकांतग्रहणमितिवचनात्सुगंधआपणिक इतिपठ्येति अतएवभग्नवालसहकारसुगंधोत्विन्यादौ
नो प्रमादित्वदुर्योद्धविद्धतोक्तं अल्पाख्यायां सूपस्येति व्यधिकरणपदोबहुव्रीहीति अतएवसा
पकात् यद्वास्तूपोगंधोस्मिन्नित्येवविग्रहः गंधशब्दस्यविशेषणत्वेप्यस्मादेवज्ञापकान्त्यइतिपातःइति
विग्रहेति एतेनाल्पकायोगंधशब्द इतिव्याख्योस्त्योव्याख्यातः अल्पाख्यायामिति सूत्रस्यापीदृवस

उं॰
१०

यमः यच्च वदंति गंधस्याह्येव लक्षणा याल्पत्वं गमयतीति तच्चिंत्यं प्राक्क्रियाइक्कस्योक्तत्वात् पादस्य
यदयंलोपः समासांतो न स्यादादेः परस्येत्यादेः स्यात् शैषिकः कपसमज्येन समासांतापेक्षस्य शेष
स्याश्रयणात् अतएवाह अयंसमासांत इति कथं पुनभावोभावस्यावयवः स्यादित्याह स्यानिष्ठारेण
ति औपचारिकमवयवत्वं चवचवलादिति भावः । वयसि । कथं तर्हि सादत्तरोषा हदतो समज्ञोत्ते
नस्यत्रवयोगम्यते अतः हदंतीति भावः अत्राह शोभदंता अस्याः समस्ता जाताः नत्तु सूनाः इति क
यं चिदिहापि वयोगम्यत एवेति उरःप्रभृतिभ्यः कप् । लक्ष्मीरिति । नद्यृतश्चेति सिद्धे नियमार्थमि
हापि पाठः एकवचनान्तस्यैवेति नित्यो यथा स्यात् अन्यत्र शेषाद्विभाषेति विकल्प एव तेन बहुश्यामबहुशालक्ष्मी
केन समासे योनेन इति सिद्धं बहुशालक्ष्म्या यस्येति विग्रहः यत्तु प्राचोक्तं न धूनश्चेति कप् । बहु
लक्ष्मीक इति तत्सामासिकमिति व्याख्यातारः नियमशास्त्रस्य निषेधरूपत्वेन प्रवृत्तिरिति एवं माः
श्रित्य वा योज्यं अनर्थकेनापीति । कथं तर्हि सुपर्थीनगरीति प्राचा उदाहरणं स्वयमप्यत्र हृतं को
पद्धीवरत्वात् नच रजनादिति निषेधः अतः प्राचीनानामेव स्मरति विवक्षमाणत्वात् सत्यं समासांतवि
धिरनित्य इति कथंचित्समाधेयं सुपथीति यत्वोरनानाकस्तृतीयभाष्याद्वेदसिद्धं । नेत्राद्विनेति । एतः
चेमंकृत नृत्व स्वाङ्गाद्यादिश्च स्यानां बहुव्रीहिप्रकरणे कप्भावार्थं चेति अतः अतः भाष्यकारोक्तेश्व
र्यालोचनया लभ्यते यच्च वदंति प्रातिपदोक्ताः समासांताः स्वविषये बाधका भवंतीति तत्किमत्रोक्ताः स्व

म.
र.
१७
108

मासांतपरेणशेषग्रहणेनेति तत्र ऋक्पूरित्यादीनांसमासांतरेचरितार्थेनयापरेणकपाबाधापत्तेः
बहुनाऽस्तीति उपसर्जनह्रस्वः समसौविशेषणे कंठेकालइति यदाकंठेकिंचिद्दस्तीतिनिज्ञो
नेकालइतिविशेषणेनतदेवबोध्यं अन्यादावसमसोग्रहणेविनापिविशेषणत्वादेवसिद्धं चित्रगु
रिति। यद्यपिह्युपसर्जनंपूर्वमितिनासिद्धंतथापिबहुव्रीहौसमसोत्युक्ते तत्रकोऽपिन्यायेनउप
सर्जनंपूर्वंबाध्यते अतोविशेषणग्रहणं सर्वनामेति कथंतर्हिनः परोऽयंसमासउपरइति कथंत
र्हिजहत्स्वार्थावृत्तिरितीहजहत्स्वपदेजहत्स्वः सोऽर्थोयस्येतिबहुव्रीहिगर्भोबहुव्रीहिः तथाच
स्वपरमायूयोः सर्वनामत्वात्पूर्वनिपातेनभाव्यंसत्यं सूत्रभाष्यादिप्रयोगात् राजदंतादित्वात्
वासिद्धं। सारंगजग्धीति। यत्त्वागमस्वंपदाह्वेतिदीप कथंचाऽस्मितमिति प्रनप्रसकेभावेक्तइ
त्यस्यनपूर्वनिपातः निष्ठायाःपूर्वनिविहितस्यैवग्रहणादित्याहुः। इतिबहुव्रीहिः चार्थेद्वंद्वः चार्थाः
इति चशब्दद्योत्याइत्यर्थः प्रत्यासत्त्यादिति एकार्थीभावभावादित्यर्थः तथाहि बहुव्रीहिवदेकप
दानांकर्माद्युत्तभावेनैवद्वंद्वेऽपिएकपदानांचार्थेनभावेनैवकार्थीभावः अवरूपकः समर्थःपदविधि
रितिपरिभाषितत्वात् चार्थेद्वंद्वइत्यत्रोक्तं नचैकशक्तिविषयाणांसमस्तप्रधानानांपरस्परंविज्ञायइ
तरान्वयःसंभवतियेनसमुच्चयान्वाचययोःस्यातां किंतुमिलितानामेवान्वयोवाच्यः मिलनंचसमुदायः
सचधर्मिपदार्थेसतिविशेषणंविशेष्यंचेतिद्वैधं तत्राद्येइतरेतरयोगद्वंद्वः द्वितीयेसमाहारद्वंद्वः

ग.
१७

उभयथापि सम्प्रदायस्य द्वंद्वेनोक्तत्वाच्च शब्दाप्रयोगः नचैवं नीलोत्पलमित्यादावपि चशब्दान्तर्भा
वेन विग्रहः दर्शनादेकार्थीभावसत्त्वाच्च द्वंद्वोऽस्त्विति वाच्यं समानाधिकरण्ये विशेषविहितेन
याविशेषणं विशेष्येणेति तत्पुरुषसंज्ञया द्वंद्वसंज्ञाया बाधात् यत्तु केचित्कर्मधारयसंज्ञया बाध
इत्याहुः तन्नच्छं तस्या पकसंज्ञाधिकारबहिर्भूतत्वात्संज्ञानां च ह्याल्हान्यप्रत्ययादिषु समावेशस्य
प्रसिद्धत्वात् न्याय्यत्वाच्च समानाधिकरणाविवक्षायां तु द्वंद्वे इष्टापत्तिरेवेति दिक् होतापो
त्रेति अनयोरुत्तरपदपरत्वाभावादानङ् अत्राद्यं तं कथं तर्हि समोऽहं वौदार्यविशेषणालिनो
लोचनाथस्कन्ताह्वनरागेति भारविः अत्राहुः अनित्यमिदं प्रकरणं समग्राभ्यद्व इत्यादिनिर्देशात्
द्वंद्वश्च प्राणितूर्ये समाहारएवेति विपरीतस्तु नियमो न भवतीति समाहारे प्राण्यङ्गादीनामेवे
ति तिष्यपुनर्वस्वोरिति सूत्रे बहुवचनग्रहणाज्ज्ञापकं समाहारस्यैकवचनस्य माभूदिति कृते ति
ष्यपुनर्वसू इति यथा उदगादिति इह यथा कठेषु कालापेषु चाऽऽदितेषु प्रतिष्ठितेषु चावाभ्यां
त्वागंतव्यमिति संवादं कृत्वा तं च विस्मृत्य कश्चिदास्ते तं प्रतीदमुच्यते कठेन प्रोक्तमधीते कठाः
वैशंपायनान्तेवासित्वाणिनिः कठचरकाल्लुक् अथोत्रणल्प्रोक्तात्लुक् कलापिनोऽण् सब्र
ह्मचारीत्यादावुपसंख्यानाट्टिलोपः अध्वर्युशाखाध्याययज्ञवेदं लक्षयति नचाह यज्ञांशिति पदान्यधीते
पदकः क्रमादिभ्यो वुन् पदक्रमकः पदान्यधीत्य क्रमोऽध्येतव्य इति स्थापत्यान्तः सित्वः अध्ययनः

किंपितापुत्रौ अविवक्षितेति किं याज्ञिकवैयाकरणौ जातिरूपाणां कथंतर्हि रंजितात्रविविधा
स्तम्यैत्वाद्दत्तिभावः नत्संज्ञिताः शैलाद्रिक्यालयं विशिष्टलिंगानदी ह्रदे चत्वारोपिशब्दाः
अवयवधर्मेणावयविनिर्देशबोध्याः नदीग्रहणमदेशत्वात् जनपदो हि देशः अतएवपर्वतानां
नकैलासश्च गंधमादनंचकैलासगंधमादने चकारेणबाध्यते चकारः पुनर्विधानार्थ इतिभावः ।
ग्राम्येति । येभुंक्ते भस्मनाश्च ध्यानेकाश्यामित्यादि स्मृत्युक्त संस्कारेणापि पात्रेन शुध्यति तेषामित्य
र्थः अनिरवसितानामिति निषेधबलादेव शूद्रग्रहणं तेत्र वैवर्णिकेतरपरः नतुशूद्रत्वजातिपरः ग
वाश्वमिति । इह पशुद्वंद्वविभाषायाम् । दासीदासमिति । अत्र पुमान्स्त्रियेत्येकशेषो बाध्यते अत्र
वार्तिके गवाश्वप्रभृतिषु यथोच्चारितं द्वंद्ववृत्तमिति गणपाठेरूपमेषां विवक्षितं नतु पूर्वोत्तरपद
निर्देशमात्रतात्पर्यमित्यर्थः तेनावजादेशाभावापत्ते न भवति अपशवो वा अन्ये गोअश्वेभ्यः पशवो
गोअश्वाः । पशुग्रहणमिति विकल्पार्थमित्यत्र षड्जपते नपुंसकत्वार्थमिति अयंभावः पशुद्वंद्वद
त्येव सिद्धे अश्ववडवग्रहणं प्रतिपदविधानार्थं तेन अश्ववडवाविमित्येकवद्भावपक्षे पूर्ववदश्ववडवा
वित्यत्र तद्धितत्वाभावान्नपुंसकमित्येतदेव भवति नत्वनेनैकवद्भावश्च जेपराश्च पविधीयमानं न
पुंसकत्वमेकवद्भाववदेव प्रतिपदविहितं भवतीति अन्यश्चेति नच पूर्ववदश्ववडवावित्यस्य निरव
काशत्वंशक्यं एकवद्भावविरहपक्षे सावकाशत्वात् विप्रतिषिद्धं च भवत्येवेति विप्रतिषिद्धग्रहणं

भावेन समनस्यात् अन्यवाचिनामेवेति नियमादिति भावः यत्तु वृत्तिकृता कामक्रोधाविति प्रत्यु
दाहृतं तत्र तत्रापि शीतोष्णं सुखदुःखमित्यादौ द्रव्यपातिकस्यैकवद्भावस्य दुर्वारत्वात् नियमा
र्थं ह्येतदिति निश्चीयते न चान्यवाचिना बहुवति तर्हि विप्रतिषिद्धानामेवेति तदाशयः कल्पणः शी
तोष्णे उदके इत्यत्र पातिकैकवद्भावापत्तेः न चेष्टापत्तिः अनधिकरणवाचेतिकिं शीतोष्णे उद
के इति स्वोक्त्या सह विरोधापत्तेरिति दिक् दधिपयसीति व्यंजनाद्यकल्पः ग्रामः अधिकरणेता
वत्वेच समासार्थस्याधिकरणमाश्रयो वेति पदार्थः तस्यैव वर्त्तपरिणामनियमः तस्मिन्नाम्यमाने
इति व्याचष्टे द्रव्यस्येति अन्ये व्याचक्षते समाहारद्वन्द्वस्यैवायं निषेधो न त्वनियमस्य तथाहि सति
नियमे प्रतिषिद्धेऽपि चार्थे द्वन्द्व इति समाहारे द्वन्द्वः स्यादिति तत्रेति धनयन्याचष्टे नियमो न स्या
दिति अयं भावः प्राचां पक्षे दधिपयसी नो इति त्वदुदाहृतमेव न सिध्येत् प्राणिणागानां समाहारप
वैकल्पेन इतरेतरयोगस्य द्वन्द्वस्यानिषिद्धत्वात् ननु समाहारद्वन्द्वेऽपि प्रकृतसूत्रेण निषिध्यते इति चे
न्नहि वाक्यमेव स्यात् द्वन्द्वद्वयस्यापि निषिद्धत्वात् पंचपंचाशिद्धस्यादित्रिकवर्षभिन्ना भिन्नाधना
साधकतासहत्वी त्यादीनामसाधुत्वं स्यात् किंच समाहारद्वन्द्वनिषेधोऽयमर्थः न्यायबलेनैव न
द्वरणात् तथाहि वतिपदार्थस्य साम्यविशेषबोधनाय समाहारद्वन्द्वस्य प्रामिरेव नास्ति सावि
शेषणं हि नैर्निवचनास्यापेक्षत्वेना समर्थत्वाद्वा कथं तर्हि दधिपयस्व मूलादि इति समाहारे द्व

म॰ वं॰ ११॰

110

गुरिति चेत्प्रधानस्थूले समाहारेऽव्ययीभावेऽस्यान्वयादिति यद्बाणा नचोक्तन्यायेनेतरयोगद्वन्द्वोपि न
स्यादिति वाच्यं तत्र प्रधानस्य सापेक्षत्वात् उक्तं हि भाष्ये भवति वै प्रधानस्य सापेक्षस्य वृत्तिरिति न्याय्यं
चैतत् प्रधानस्यैकदेशत्वाभावात्सामान्यप्रयोगे इति लिङ्गादिति दिक् विभाषा समीपे यद्यपीह समा
हारद्वन्द्वो वेति व्याख्यानेपि नास्तीति तथापि प्रक्रममनुसृत्याह नियमो वा स्यादिति उपदेशमिति
पक्षवद्वावपत्तेः अव्ययीभावस्यैवात्र प्रयोगः यदित्वबहुव्रीहिर्नत्राप्युपदेशस्य पाणिपादस्येति षष्ठी
स्यात् उपदेशो पाणिपादस्येत्येवेष्यते इत्याकारः । ग्रामन्तूनौ द्वेद्वे । इहोत्तरपदेन पूर्वपदेनाक्षिप्य
ते तेन मध्यमस्याक्षिनङ् नदाह । होतृपोतृनेष्टोद्गातार इति । एतच्च समर्थसूत्रे भाष्यकैयटयोः
स्पष्टं गोजः सहोभिः स्तमसहृतीयाया इति सूत्रे पदमञ्जर्यां तस्य स्फुटतरं यत्तु प्राचोक्तं पूर्वपदस्यं
नङ् स्यादिति यत्तु व्याख्यातं सिद्धं इह सर्वपदकार्य विशेषमाहेत्यवनादिति यच्चाधिकृतेनोत्तरपदेन
पूर्वपदमाक्षिप्यत इत्युक्तं तत्पूर्वमाकरविरोधादुपेक्ष्यं प्रसिद्धमाह वर्षस्येति द्वंद्वेहरस्य समर्थादाव
चनमुक्त्वामणा यत्तपात्रप्रयोगाभिव्यक्तिषष्ठीति सूत्रेऽभिव्यक्तिग्रहणे नान्यत्र सह चौरेत घटाले द्वन्द्व
ति निपातनादिति भावः । ईदग्नेः । देवताद्वन्द्वे चेति काशिकानुरोधनात्रवर्तितं आश्वलायनसूत्रे
तिलं तयोर्देवताद्वन्द्वप्रयुक्तेः अग्नीषोमौ प्रणेष्यामीति अग्निद्धादिति अग्निसूद्यतस्मिन्सकारो विशेषः
संपदादित्वादधिकरणे क्विप् । षत्वमा भूदिति । आकारे सति सकारस्य श्रवणं भवति तत्र प्रयोगो वि

जो॰ ११॰

कारााभावोऽत्र मीयतेऽत्रेतिभावः । विसर्गमिति । तथाचष्टाचिह्निकारोनेत्येवात्रमेयं लक्षणान्तरोधादिति
भावः मातरापितरौ । मातृशब्दस्यानङादेशोऽपि निपात्यते वाछन्दसीति बहुलादिहेतवः स्वकृ
तत्वं इंद्रगर्भेण्डेन वाक्त्वजत्वचं । इतिवृन्दः । विरूपणामपीति । पतन्त्वसहत्राव्दरेवस्तुलभं तू
ष्यते रतिवृत्त्याज्ञा सोऽत्रस्यत्रूपशब्दस्याः घेपरतयापि व्याख्यानात् । वृद्धो यूना । अपत्यमतोऽत्रेतह्व
ह्निमिति पूर्वाचार्यैः परिभाषितस्येह ग्रहणं सूत्राकृतिमेणसाह चर्यात्तदाह गोत्रं शिष्यतेऽत्रेति
भागवद्वीति भागवतिशब्दाद्रोत्राद्विकाद्विजेताद्यूनिचूडाम्बाकोषीरेष बहुलमिति ज्ञत्वाद्वाद्वक
ऽहुज्ञत्वा सोवीरत्वं चापिकमपीष्यते नतयावत्यमात्रवृत्तवङ्त्यु । गार्ग्यवात्स्यायणाविति । इह
प्रवृत्तयो वहुष्वत्रगोत्राद्विकृत प्रवङ्गावमयाङ्कं वेलक्षणस्कृदोकतोद्विवचनाते नविग्रहमाह
गार्ग्यायणाविति प्रमान्विया । नत्रहसच्छवराटाचेत्यत्र प्रसंगाः हंसस्यजातिसाम्योपि शाहृवेलन्ना
एणस्यत्रीत्वप्रत्वमात्र प्रयत्नत्वादिति चेन्मैवं सरूपग्रहणात्त्रहन्नेः यत्रवृत्तेस्लापकेतत्स्मात्स्मृत्राव
ति सूत्रे नन्वेवमपि गोत्रयं गोस्त्र्यायनयोः सहोक्तावेतो गवाविति नियमतो न स्यात् तल्ल्लक्षणविशेषा
भावादिति चेन्मैवं नदितरकृतविशेषविरहरूपविशिष्टाभावेनात्पर्यान्तच्चेदृविशेषाभावादस्त्येव
इदंलक्षणापाविन्यादितस्नैकशेषः प्रयोगकृतविशेषात् । पिता मात्रा । श्वशुरः श्वश्र्वा । नन्वेतत्तद्व
द्वयवयं तथाह यः शिष्यते स लुप्यमानार्थाभिधायीति न्यायेन्यासम्भिद्विधेयोपि त्यशब्दमेव मातरमपि

म० र० १११ III

वोक्ति स्वरूपशब्दस्वरूपं । न च शक्तिरेव नित्यं फलं तत्त्वावेत्यन्यदेतत् न च सूत्रं विनापि फलं भेनच सूत्रेस्य
त्र समूहवत् इदमपि स्यात्तद्द्वये नित्यग्रहणं सिनिवार्य इह हेतु स्यादपि परेण शब्दत्वादिति चेत्सेव पिदस्व
रूपाणामेयोरिव मातृस्वसृ शब्दयोस्तत्र विशेषः केवलयोः प्रयोगं वाख्येति सूत्रारंभात् अनभिधानस्मा
स्त्वित्य प्रत्याख्यानेन तत्फलं भेदमितीतिदिक् । त्यदादीनि सर्वैः । सर्वैः किमन्यासत्यां त्यदादिभिरेव सहशे
षो इत्यर्थं मा भूत् । यत्परमिति । शब्दपरविप्रतिषेधादिति भावः । त्यदादिन इति प्राग्ग्रहणादित्वात्र
सिः । त्यदादीनां शेषसहविवक्षितेऽर्थः प्रमान्यच्च न केवलं नपुंसकेन लिंगप्रतिपादकानि भवंति
शब्दोऽयं त्यदादीन्येव । सहदेति । हेत्वादिविशेषणानां माग्रहणेन किन्तु विशेषणनिरपेक्षेणैवेति भावः नत्वे
ति पिप्पल्याः प्रयोजनमित्यर्थः साचेति प्रजोपिप्पलोत्यर्थः इह सर्वत्रेति एतेन हेतूनां हेतूनां एकशे
षः इति भ्रमस्यावचनेः इति नतु नपुंसकेनस्यादिति चेत् एकशेषस्यानंगत्वात् न चैतत्वागृह्यमात्र ।
किंतु फलेपि विशेषो पीत्येके नेनेति यत्तु हेत्वापवादमेकशेष इति केचिद्विज्ञापितः तत्रापवादशब्दो
बाधकमात्रपरतयाऽन्वेयः इकोगुणवृद्धीति सूत्रेण तत्त्वेष्वत्तदपवादो वेत्यत्र यथा इत्येकशेषः । प्रसंगा
दाह एतावता अभिधानमिति कारणात् अनेनेनेह शेषयति न केवलयामासमन्तयाश्च पञ्चवशाक्या
सर्वत्र निवाहः किन्तु विशिष्टार्थविषयकशाक्रानामेव स्वीकर्तव्यो अतएव हेतुं ज्ञो विशेषणपदार्थैकदे
शतात्रविशेषणासंबन्धः हेहे च शब्दस्याप्रयोगः बहुव्रीह्यादावप्यादेः वाक्येन सर्वमिदं भवतीति वल

त्वाणं । किंच प्रवयवशात्रैवानिर्वाहइत्याग्रहे मीमांसकानांबहुव्रीहे बहुव्रीहेरन्यपदार्थेशास्त्रा
न्नसिध्येत् योगरूढिस्तुनद्यादिनांडलेभास्यात् स्तुमशास्त्रयात्रसारिण्यानेरूढिलक्षणायैवानिर्वा
ह्रात् नचेष्टापत्तिः प्रपसिद्धान्तादितिभावः प्रविग्रहइति लौकिकविग्रहशून्यइत्यर्थः । कटप्रूः ।
प्रजस्त्रामिति इहकस्मान्नयथाविधो कटप्रप्रजस्त्रइतिसमस्तात्प्रवादसामर्थ्यात् धातुनासमास
प्राप्तिर्यते नत्वैवक्वानिपात्यते इहइवदत्तादिग्रन्थस्पष्टं तिङन्तार्थकृतेन सहेतियोगविभागेना
प्येतत्सिध्यः ॥ इतिसर्वनामसमासः । कटकृत्र । नटेनसहेति नहावकाशः शाखानसहेत्यर्थः य
दित्र प्रत्तेसमासार्थेसतिनेतिव्याख्यायेन नहिहेरूपप्रत्रनरत्यत्रैवस्यात् नातश्रुतित्यत्र यदिवा
त्वेपूर्वपदेनेतिव्याख्यायेन ननोत्तश्रुतित्यत्रैवस्यात् नत्रहेरूपप्रत्रनरत्यत्रनस्माद्यामित्यायः
चोक्तमेवन्यायः ह्रान्तसमासान्तस्येति येनाविधिस्तदन्तस्येति सूत्रेप्रयोजनमहइदसहितनसूर्णा
दीर्घेविधाविनिवार्तिके प्राप्तेलिङ्गेतिस्वापइतिभाष्यंचात्रप्रमाणमित्येवार्थेयं । प्रतीपसमीपमि
ति प्रतिकूलाःसगनास्य प्रापोस्मिन्तितिविग्रहः समापोदेवयजनमिति देवाइज्यतेस्मिन्नितिव्यु
त्पत्त्यायहस्मिः समापशब्दस्यपंस्त्वलोकादित्याङ्गः भाष्येतस्त्रीवद्गदाक्रियते प्रवर्णान्ताद
ति द्वेनानितिसूत्रेणपरप्राह पैसमनवर्णादितिवाच्य इहमाभूत् प्रापेपरापामितिभाष्योक्तेः गति
रितिसूत्रेवाद्धिधिनवं भावार्थात्स्वाङ्गाधिस्वरणात्वप्रदोषइत्सपक्रमा प्रवीत्वे प्रेपं परेपामितिभा

म०
र०
११
118

ष्योक्तेस्तेनेतिभावः इत्यनोद्देशो । दीर्घोत्तराणामवग्रहार्थमित्याकरः बह्रुचत्र प्रभूतगोमान्
गोभिरित्यादौ प्रभूतशब्देनावरुद्धेति अनुगतास्सर्वापोस्मिन्निति तूपोदेशः जलप्रायमनूपंस्या
दित्यमरः प्रतिसामामिति अव्ययीभावः प्रादिसमासः बहुव्रीहिर्वा कुम्भभूतत्वादयो बहु
व्रीहयः । पद्मनाभ इति पद्माकारानाभिर्यस्येति गौणेन पद्मशब्देन समानाधिकरण्याद्बहुव्री
हि यद्वागत्यादित्वात्समासः परनिपातः एतेनोर्णनाभो व्याख्यातः नत्रजपाणासज्ञाच्छदसोरि
तिकस्तेविशेषः गवाक्षः गावः किरणाः अत्र चक्षुः निपात्यते इति निपातनफलन्तु समासविशेष
नियमः द्विलोपादिकंच नदाहृ आद्याः इति बहुव्रीहयः इति बहुव्रीहय एवेत्यर्थः तेननञ्जस्त्र
क्षस्य प्रचलत्वात्एवेतिभावः द्वित्रा इति त्रयश्चत्वारोवा इति विग्रहः संख्यायाव्ययेन बहु
व्रीहिः बहुव्रीहौ संख्येति डच् वोपचादेत्वच् प्रतिसंमुखमिति प्राणिगात्रेकवत् इत्येकत्वमिति
सक्थ्यक्ष्णोर्वैमात्रत्सहित्यमरः जानूरूपर्वा अष्ठीवदस्थियामितिच सरजः पंचकामिति नष्वतोहि
सरजसमपहाय केनकोनाप्रसवमित्यादि सरजसमकरन्दनिर्भरासु प्रसवविभूतिषु वीरुधांवि
भक्तः इति प्रमादप्रवायमिति बहूवः गोष्ठश्वेति एतेनसमस्मीनत्सुक्ष्णप्रवेतिनियमं दर्शयति
षष्ठीनत्सुक्ष्णेन गोष्ठस्येत्येव वयश्चर्चसमित्यादि षष्ठीतत्पुरुषो वर्चोदीप्तिः पलंमांसमदन्तीति
पल्वः मांसभोजिनि दीर्घवचः पल्ववर्चसम् । अवतमसमित्यादि अवहीनंततंचतमः इति विग्र

श्रे०
११

हः ग्रंथमिति गाढमितिफलितोर्थः अतएव ध्वांतेगाढेंधतमसंक्षीणेवतमसंतमः विश्वक्संत
मसंइत्यमरः स्वासोः वहशब्दइति इत्तेनाश्वः सशब्दादियकृनीअवसीयइतिव्याचक्षाणा आका
रविरोधादुपेक्ष्या इतिध्वनयति वसीयइति तथाचश्रूयते यःकामयेतवसीयान्स्यामितिवस
मानाग्नेवसीयान्भूयासमितिच । स्वःशब्दइति । यद्यप्ययमनव्ययकालविशेषेवर्त्तते तथापी
हसमासे उत्तरपदार्थभूतोप्रशंसामात्रोविषयमाह आशीर्विषयतायाद्योतकोयमितिया
वत् एतत्सूत्रविरोधाद्योक्तं स्वःशब्दस्यकालार्थएववनास्तीत्यपि त्वचःउत्तरपदार्थमात्रसत्विनिर्वचारूक
उक्तंचपाणिनीयमतदर्पणे ग्रंथेपरपदस्येह स्वःशब्दःकालवाच्यपि अभिधत्तेस्वभावेनसौमंग
लार्थकाविति अन्वयइत्यप्रकाशउच्यते अत्रगतमवहीनंचाहइतिप्रादिसमासः अत्राग
तेरोहोस्मिन्नित्यादिबहुव्रीहिर्वा तमसमिवतमस परेणानधिगम्यंहिद्युइहोवाक्तिनमवत् तसंच
तदह्नश्चेति तत्वमाहसोविद्भः तत्पञ्जनादित्यतः पारिणति प्रागबहुव्रीहियद्युग्रणे कर्तव्यमितिवाति
ककारोक्तेरितिभावः प्राचाभवबहुव्रीहौ सत्व्यवाणौ निषेधस्संक्तत्वाच्चेन इत्यादावित्यप्राप्तौ
एवायोज्य तेनसत्रपूर्वौ यवसूत्रोइत्यादिसिद्धं नाप्तगतशवात् नत्व इतिषष्ठी ॥ ॥ इतिसकल
समाससाधारणाः समासान्ताः ॥ लोकात्मकइति । समासप्रयोजनेन लोकात्मकस्यापत्ये
लोकात्मकिः लोकात्मकायाः लोकात्मकेयः इहलोकात्मिकइत्यर्थकृत्वणेतिसमासशाहे

म॰
वं॰
११३
113

पठितान्येवश्लोकादयोऽन्त्येने इत्याशयेनाह । एवमिति । गोजः सहोभः कथंतर्हि सन्तनतैशानमो
हनमन्यन्तइतिभावः प्रत्यन्यैर्बहुव्रीहिकृत उत्तरपदाधिकारेनैवंतग्रहणेनास्ति किंतु केवलप
दाधिकारइतितत्र भाष्येपदाङ्गाधिकारे इत्यत्रष्षष्टकेशीकेत्यादेः प्रयोजनत्वेनोदाहरणात् यद
पिइहवदन्नाल्पग्राह्यः उत्तरपदाक्षेमेनापूर्वपदेनेह गोजः सहः प्रभृतयोः विशेष्यन्ते पूर्वपदप्रभृ
तेभ्यः गोजः प्रभृतोऽइति नचात्रनमः शब्दः पूर्वपदार्के नहि सन्तनतैषनमः शब्दः यत्रत्वनंदतवि
धीयते मयोपाङ्गेनाक्षिमेविशेष्यते यथाऽष्टकेशीकादाविति नदपूर्वित्वं भाष्यवार्त्तिकवि
रोधाद्विशेषणविशेष्यभावव्यवस्थार्थमेवपदाङ्गाधिकार इत्यादीनामपूर्विकयत्नवदेव स्वयमपि
व्याख्यातत्वात् भागविप्रयोगात्वस्यसमाधयः हनहनिः नैशाननतमसोऽहन इति षष्ठीतत्पुरु
षः नपुंसके भावेक्तस्ययोगेशेषविवक्षायांषष्ठी ततः सन्तनतैशानमोऽहनंयस्मादिति बहुव्रीहिः
यद्वाहन्त्रवर्तते हन्त्रर्थेकविधानमिति भावेकः शेषंप्राग्वत् । प्राणइति वक्ष्यामीति इहग्राम
नस्त्वंपशोपिवार्त्तिकान्तर्गतः ततसूत्रमिति केचिद्ग्रन्थंतन्नज्ञात्वेनव्यामिति भावः तथाहि सति
उत्तरसूत्रेग्रामनइतितल्लभ्यते परस्यचेति तदुत्तरसूत्रंचव्यर्थमेवस्यात् इतिस्पष्टमेवविवेकि
नां बहुव्रीहित्वोधम इति एकस्यापिवस्तुभेदपरिकल्प्यवर्त्तिपदार्थत्वंचविवक्षणीयमितिभा
वः वैयाकरणाख्यायां व्याकरणेभावः वैयाकरणीप्राण इत्यागत्यनादिभ्य इत्यणः सचासोऽग्रा

उ॰
११३

ल्याचेतिकर्मधारयः । आत्मनेभाषा इति । यद्यपीयं व्याख्या भाष्यादौ न दृष्टा तथापि वैयाकर
णो भवत्येव धातुसूत्रगणोणादिवाक्यलिंगात्मकं पंचप्रस्थानं व्याकरणमिति स्वीकारात् अस्या
श्च धातुपाठे दृष्टत्वात् ननु प्रकृतिविकृतिभावविरहाद्रन्धनाय स्थालीतिवत्समासो न स्यादत
आह योगविभागादिति एतच्च हरिन्यासादावुक्तत्वादुक्तं अश्वघासादिसमर्थ्यादित्यपीह हव च
हृद्युभ्यां च हृदिस्पृगिति हृदयं दिवं च स्पृशतीति विग्रहः कर्मणोधिकरणविवक्षायां सप्तमी
भावे तु कर्मण्येव समासोऽस्तु अश्वघासादिर्विधेर्ज्ञापकत्वं न तदाबाधः । अस्मयुरिति लिंगादित्वाद्य
त् ङेर्यणः वेतोपि भाषायामपस्थाने जलं दृष्टपाठत्वात् अप्सुजन्मन्द्राहत्तं नत्वाकारविरोधाद्वेत्व
अप्सुज इतीत्त हलन्तादित्येव सिद्धं अप्सुमन्त्राविनिकारेत्यादि आज्यभागयोः अप्स्वग्ने सधिष्टव
अप्सु सोमो अब्रवीत् इत्यत्र वाके चाप्सुषाहोसि नन्वेवमप्कृतिवदनकरणे इत्यातिदेशेन अप्सु
इति सोः प्रत्ययानत्वात् न दंतात्सप्तम्या अभावे मन्तर्थेवदुर्लभः अतिदेशाप्रवृत्तौ तु सोर्लुकप्रा
प्तिरेव नास्ति चेत्सत्यं अतिदेशस्य वैकल्पिकत्वाद्वोक्तदोषद्वयमपि वैकल्पिकत्वे प्रमाणं तु यत्र
दैनेभ्य इति सौत्रनिर्देश उक्तः प्रकृतत्वात्तिकमपि तद्येतिध्येयं यत्तु भाषायामप्रतिषिद्धतिपठित्वा अप्सु
मतिरित्युदाहृतं तत्राध्यादेन दृष्टं यत्तु वदंति मन्त्रोष्ठितिपाठे सुप्सप्तानां मतुपः कथं संभव इति
चिन्त्यमिति तेदेवचिन्त्यं पाठांतरस्यानकारकत्वात् मतुप्सम्भवतोऽस्युक्तत्वाच्च । यरपनाह्वरेति ।

म॰
४॰
११४
114

षष्ठीवचनादत्र हेतिषष्ठी पश्यंतेमनहृत्यहरतीत्यर्थत्वात् देवानामिति मूर्खो हि देवानांप्रीतिंजनयं
ति देवपशुपत्वात् शुनःशेपमस्य शुनःशेपः शेपशब्दो हि प्रकारान्तोप्यस्ति पौंस्नो नोपादित्वादौ
णादिकः पप्रत्ययः तथाचमंत्रः यस्यामुशनप्रह्वामशेपं इति एवंपुच्छलांगूलाभ्यामपिबहु
व्रीहिः ऋषिविशेषणामेताःसंज्ञाः । बह्वृचब्राह्मणादौप्रसिद्धाः मातुःपितृभ्यामिति सूत्रेस
मासस्यत्रवर्तितं तस्यफलमाह असमासेपीति इह पाक्षिकमपिषत्वंतेनेत्यर्थः । इत्यलुक्समा
सः । घरूपः । चेलडितिपचाद्यटित्युच्यतेऽस्वर्थे । घसाणेनेति तसिलादिष्विति पुंवद्भावस्तन
दात्तेस्त्रिविति निषेधात् एतेनपुंवद्भावेबाधित्वापरत्वात् ह्रस्वइति व्याचक्षाणाःपरास्ताः अमलकेत
रेति ग्रामलकीशब्दोह्रस्वोनित्यस्त्रीलिंगः एवंकुवलीशब्दः तद्यः सुवह्रस्वेकृत्वात्तत्पक्षेपः सच
द्विधेत्याह घनेति निर्मूलमिति यद्वृत्तिकृतोक्तंपुंवद्भावोत्रपत्तव्यत्वाः श्रेयसीराविदुनरा
प्रकर्षयोगात्प्राक्स्त्रीत्वस्याविवक्षितत्वात्सिद्धमिति एवेदंवक्तव्यंपुंवद्भावस्यानादि अतिशयात्रक
त्वात्प्रमाणिकं ह्रस्वकृतनाहि तसिलादिष्विति नित्यपुंवद्भावयुक्तः नतुपाक्षिकः भाष्यवार्ति
कयोरपिनाधिकमुक्तं प्रमाणानामभ्युपेत्यापिब्रूमः कथमिहवचनेनापन्नेपुंवद्भावोयः प्राप्तः
सोऽत्रपदेवक्तव्याः ततःपुंवद्भावपर्वेववक्तव्यइति शब्देपुंवद्भावनिषेधार्थमिदंवचनंस्यात् तथाच
हृतःप्रागेवत्वइत्याहृस्वनाति श्रेयसीराविदुषीतमेति दीर्घकेशीष्विपाशानि हूयाणांसिध्यतनाम प्रक

शे॰
११४

र्थयोगाद्दित्वदीर्घयोरन्यतरत्वसंगतमेवस्यात् सत्युपसंख्यानेप्रत्याचष्टेइतिन्यासकृतावगतिः प्र
त्याख्यानंच नस्यापूर्ववद्भावफलकत्वेसत्येवस्यात् नतुनत्विहद्वित्वफलकत्वे वक्तुनत्तनदोपिनद्याग्रु
हणे तदंतातद्विधानार्थमित्युक्तत्वात् स्वार्थेइत्यालिंगाद्यनंतरमेव प्रियशकृत्सन प्रकर्षो हि विव
क्षितेनेतिभाष्येनिर्णीतत्वाच्च द्वितीयस्तु संभवेद्यदितामिलादिमध्येतरप्रत्ययेनपरिगणयितातो
त्तमवैरेवपरिगणितो दर्शनीयतरादर्शनीयतमेतिचोदाहृते नचद्वितीयग्रन्थेविरुद्धेतिमेत्यादिर्ह
तोपन्यासः स्त्रियांतिप्रदर्शनपरोनतुद्वैरूप्यपरइतिवाच्यं प्रकर्षयोगादित्यादिग्रन्थशेषविरोधा
त् तस्मादसंगतएवायंद्वितीयग्रन्थाइति एतत्सर्वमितिमन्यतइति वदताहरदत्तेनापिध्वनितं न्यास
कारस्यतु इदमुपसंख्यानमितिभ्रमः तत्प्रत्याख्यानेपक्षेमितिभ्रमस्त्वाभ्येवेति तत्रकुत्स्यदोषो
तो स्पष्टमेव एवंस्थितेपक्षेपूर्ववद्भावोवक्तव्यइतिप्रक्रियाग्रन्थः न्यासासिद्धमिदमित्यादितद्व्या
ख्यानग्रन्थस्तुद्वितीयन्यासोक्तार्थानुवादीस्फुलतेप्यविलयादनादेनयामितिदिक् पादस्यपदे। पदेति
सोत्रोविभक्तिलुक् ऋचःशेइतिशसृप्रत्ययस्यपदमेकदेशाद्वकारणे। उदमेघइतिसाहचर्यात्
प्रकृष्टस्यापिसंज्ञा। उदपेषमिति। स्नेहनापिष्टइतिणमुल् उदधिर्घटइति उदकंधीयतेऽस्मिन्नि
तिविग्रहः कर्मण्यधिकरणेचेतिकिप्रत्ययः उदमन्थइति इववहवासमहानाः मंथः स्तनोयेतिया
गविभागात्समासः। एकजः संप्रसारणं इहतत्प्रकृष्टत्वेननपूर्वपदस्यैवपदेचाविधीयते इत्यापो

म०
र०
२५५
115

धेनाह सर्वपदस्येति उत्तरपदस्योरितिच इत्युत्तरपदेन पुत्रपत्नीविशेष्यते नत्वविपरीते तेनकरी
षगन्धापरमपुत्रइत्यत्रनातिप्रसंगः । मालभारीति । मालांबिभर्तीतितिनाछीलग्योणिनिः केचित्तु
हारिष्वितिपठंति कारेसत्यागदस्य सत्यंकारः समयकरणे शपथेतिपरत्वात् शासंबाधित्वात्तु
अगदंकारोवैद्यः अस्तुंकारोभ्युपगमः अस्त्विनितिइत्तमपिनिपुणकमव्ययं धेनुंभव्येति भव्यगेयेति
कर्तरिकृत्यः धेनुर्भव्याभव्याचेतिविग्रहः भविष्यतीतिधेनुरित्यर्थः गोलमंसहनेतिस्यानंकर्मणिषु
त्रेधेनुभव्यौतिबाधादितिप्रकरणं नत्वार्षत्वात्समागमोनेतिनयाख्यायामितिहरदत्तः लो
केपृणतिपृणतिः सदात्वाकर्मेतिहरदत्तः प्रीणनइतितुपदान्तेनैव भ्राष्ट्राग्निमन्धइति
भ्राष्ट्राग्न्योस्समीपमितिहीति इन्धनाभ्याग्नेइत्यत्र पतिसक्ष्याणामित्यादिना इणः भ्राष्ट्रमिन्धइति कर्मण्य
न् इत्यनेनवाषष्ठीसमासः तिमिंगिलइति मत्स्यविशेषः गिरतेमूलविभुजादित्वात्कः गिल
गिलेचेति । गिलंगिलतीतिगिलगिलः तिमेर्गिलगिलइतिविग्रहेस्त्वमासइ नित्यमेवेति पू
र्वविप्रतिषेधेनेतिभावः सज्योतिरिति समानंज्योतिरस्येतिबहुव्रीहिः यस्मिन्ज्योतिषि आदित्ये
नक्षत्रेवाउपनिपतिते तदस्तमयपर्यंतमध्ययनमावर्तमानमाशौचे सज्योतिरित्युच्यते पृषोदरादीनियथो
पदिष्टं निरुक्तादिशास्त्रसिद्धानामसमासपदानामुणादयोबहुलमितिसिद्धिः अनेनतत्समास
पदानामितिविवेकइतिहरदत्तः वस्तुतस्तुसमासविषयकमेवेदमितितन्नियमः हेमसिद्धरामचन्द्रयोः

जो०
२५५

त्रापि प्राचां कारिकायाम् उदाहृतत्वात् हृनेपचाद्यचिह्नगमः हिंसेत्त पचाद्यविहृकारसकारयोः
स्थानव्यत्ययः यदित्तभवे हिंत्यादिश्लोकस्यापि प्रकृतसूत्रोदाहरणतायोनाग्रहः किंत्वनेकक्र
मुत्पत्तिरनेकधत्वेनावन्मात्रे तदाहरदत्र विवेकोपि निर्बाधएवेति दिक् । शाकुनिगणोयमिति।
तेनान्यदपि सिध्यति यथाल्लमपत्वश्यमः हात्येत्तकाममनसोपि समोवाहितनयोर्मो मस्यपरि
यदृच्यनोः ध्वंत्वमितिशेषः कृत्प्रत्ययान्ते उत्तरपदे श्रवणशब्दस्थाने मकारलमपेत् कामशब्दे मनः
शब्देच परेत्तम् शब्दस्थाने तुमितिषष्ठ्यर्थे प्रथमायाः कृत्प्रत्ययपरयोः पत्त्व थात्वलस्मिन्परे मास
स्थाने मकारलपेदित्यर्थः श्रवणमेत्वः गेतुकामः गेतुमनसह्निनः सननः सननः मांसपचनमा
स्पाकः इह संयोगान्तलोपाभावोपि निपातनाद्बोध्यः छन्दोसित्वः यस्मयादित्वेनापि निवाह उक्तः
ध्रुपरस्परः क्रियासातत्ये इति सूत्रे सातत्यइति निर्देशोनेकादेशात्रमतिद्वारा सूत्रोचार्यपादेनोय
त्वाको ज्ञापितस्त्याकः । नहिवृति पदुपरोषध्रिति उत्तरपदेषितिबोध्यं उपनह्यतीति उपानत् संप
दादित्वात्कर्मणि क्विप् निवनतेहति नोवृत उपहंघनोतिमाहद् ममीणिविध्यतेइति मर्मवित् रु
वमीतो मीरोचतेहति नोरुक् कर्तिसहतेकत्तेषहू सहस्वननाजोभ्योचेत्पत्रसहेति योगविभा।
गादत्रक सप्रच्छयाद्वासस्यषत्वमितिन्यासकारः मूर्ख्वपदादितिषत्वमितिहरदत्तः परीतत्तोना।
तिपरीतत् गमः क्वावित्यत्र गमादीनामितिष्ठनइतिवचनात्तनोतेर्नलोपः यत्तु वेदभाष्ये कत्तेन।

म· र· ११६ 116

मित्रावरुणाविति मंत्रस्य व्याख्यायामुक्तं ऋतस्य वर्धयितारावित्यर्थेऽत्र भाविन्याथौ हृ दृधेः क्विप्
नहि ह्रनोन्यादिना पूर्वपदस्य दीर्घ इति नित्यं चिंत्यं प्रकृतेन हृ दे दृ दे त्र पानत्वान्न स्यादन्यथा मपीति दी
र्घत्व बोध्यः । वनं पुरगा । व्यवायेन बहुः स्यात्तेऽप्रथमेत्यादि वनपापूर्वस्येति विभाषौषधीति अपसंज्ञा
त्वेन पूर्वपदात्संज्ञायामित्यस्याप्राप्तेरितिभावः अत एवाहानिपातनादिति यद्व्याचष्टे तेन ह्लद
तादिति समस्यासंज्ञार्थमिन्नेतिभावः । प्रथमेति । समस्यार्थस्यापानिपादिकार्थेऽत्र भावादितिभा
वः । निषादइति निषीदन्त्यस्मिन्पापमितिनिषादः पुलिंदोम्लेच्छजातिः हलश्चेत्यधिकरणेघञ्
कथंतर्हि मनोहारी दौवारिकः अत्राहुः मनोहारी द्वारे नान्यथानामाहमिति एकाचेनोकइति यो
धकः कप् अनदनेत्यादि अत्र केचिदाहुरिति द्यसानपठित्वा स्यादित्यत्र इतिबहुव्रीहावेवायं दीर्घ
इत्याहुः अन्येतु दीर्घेणैव पठंतः तत्पुरुषस्याप्युदाहरणमाहुः इक्षुषादिति केचित्तु कार्षेय
तिनालप्यमध्यपठंति नत्यामादिकमितिभावः शिरीषवणमिति । ननु यस्य फलमेव न पुष्पं स वन
स्पतिः वानस्पत्यः फलैः पुष्पात्तैरपुष्पाद्वनस्पतिः इत्यमरकोशात् सचउदुंबरादि शिरीषस्तु न तथे
तस्य पुष्पफलोभयसत्वात्कथमिह णत्वमितिचेत्सत्यं इह वनस्पतिशब्देन वृक्षमात्रमुपलभ्यते
अत एव लिंगेलुपिफलंवदतीति सूत्रे व्याख्यावचनेऽपि तौ कि शिरीषाणामदूरेभवो ग्रामः शिरीषः
तस्यवनं शिरीषवनं वनस्पतित्वमतिदेशेन नतत्त्वाणत्वस्यादिति भाष्यकारोक्तिः इरिकादिभ्य

गो ११६

इति । अवधित्वात्प्रागिः । हीरपाणिनशीनराइति । उशीनरशब्दोदेशवाचीनद्वासिङ्गोपचा
रिकः गिरिनद्यादीनामिति वाक्रमेतत् संज्ञायामिति संज्ञायामप्राप्तेउभयत्रविभाषेयं माघवा
पिणावीति बहुलमाभीक्ष्ण्येइतिणिनिः व्रीहिवापाणीतिकर्मण्यण् उत्तरपदस्येति अत्रचव्याख्ये
नमेवशरणं प्राचक्षस्त्रस्यहृणानामिहज्ञापकं इत्याक्षुब्धहर्षयति अतएवेति ज्ञापकशैथिल्यमि
तिध्वनयति किंचेति परिपक्वानीति अत्रकुमतिचेतिनिस्पणात्वमाप्ते हरिमाणीति मनेणत्वनात्
किप् प्राकृतवृत्यन्तैः समासान्तकारान्तमुत्तरपदं नोनत्वान्ङीपणत्वं चतुरंगयोगेनेति चतुर्थ्यर्थे
न्यासेनेनयोगाइतिविग्रहः अत्तद्धितइति व्यवधायकस्यपदस्यतद्धितेनसेत्ययोनभवति तदानिषेधइ
त्यर्थः । शार्ङ्गगामयेनेति अत्रगोशब्दः पदं पारस्करइति पारंकरोतीतिविग्रहे कृञोहेतुताच्छील्ये
तिटः किष्किन्धेति । किंकिंदधातीतिविग्रहे धातोरुपसर्गेकः सर्वस्यकिमोऽल्लोपः सुट्षत्व
चनिपात्यते हृषिशब्दात्सेनेकार्थविद्युत्पाणाः नहुहृतीतितिगणसूत्रे नादिति नलोपश्छन्दस्येवेति
भावः चत्वेनेत्युपलक्षणं फणाफणीति लोपस्यापिसत्त्ववत्वात् । टकारभकाराविति । नहुहृत्यां
यथासंख्यंबोध्यं । मायस्येति । पंचमस्यार्थेषष्ठी । मायः पापंविनिर्दिष्टंचित्तेनस्यार्विशोधनमितिस्मरति
आकृतिगणोयमिति । नेनपरः शानाइत्यादिसिद्धं अविश्वयनेजैनताः परः शानाइतिमाघः शानात्प
राइतिविग्रहे पंचमीतियोगविभागात्समासः राजदन्तादित्वात्परनिपातः सर्वनाम्नोवृत्तिमात्रइति

म॰ ५॰ १२

पूर्ववद्भावः लोकाश्रयत्वाल्लिङ्गस्यानिर्देशोऽविनिर्ज्ञातः पारस्करादित्वात्सुडिति दिक् ॥ ॥ इति समा
साश्रयविधयः ॥ ॥ ओं नमः सरस्वत्यै ॥ ओं समर्थानां । नन्वप्रकृतिसूत्रे एकार्थीभावसाम
र्थ्ये गृहीते नोचिते समर्थापदविधिरिति परिभाषायोगात्तदर्थत्वात् तत्कालत्वेनोपस्थित्यवलम्बवशाना
द्विरुक्तेनानुद्धितोत्पत्तिः तथा च पदविधित्वस्पष्टमेव अतस्त्राह सामर्थ्यमिति कृतरूप्यादि अस्य
फलत्वं तस्यापत्यमिति सूत्रे स्फुटमेव स्पष्टीभविष्यतीति इह समर्थानां प्रथमादिति फलत्रयं वक्ष्ये मद्रो
त्सर्गेणाह प्राग्दीव्यतो ऽण् अश्वपत्यादिभ्यश्च प्राग्दीव्यतीयेष्विति दीव्यतः प्राक् प्राग्दीव्यत् अपप
रिबहिरञ्चवः पञ्चम्या इत्यव्ययीभावः स्यात्कुतः प्राग्दीव्यतमिति तु वाच्ये ज्ययरतिः प्रसूत्रेः नतो भावा
र्थे सूत्रात् तस्मिन् अपसमहेत्यादि परिगणनात् अव्ययीभावस्याव्ययत्वं लभ्यत्वस्वरोपराणे षष्ठ्यो
तेनार्थसिद्धमाह अचः इति अचो ञ्णितीति सूत्रादचः इत्यस्यात्रानुवृत्तिरपि इह स्थवचा प्रामादिकमे
वेति चातुर्वर्ण्यादेराकृतिगणत्वात् ष्यञापत्यमूपपदे तथापि इह स्वस्त्रादिदर्शनात् त्रयोधात्वसंज्ञके दि
त्यादित्वा पूर्वपदतिरोहस्योत्तरपदलोपेन बहुव्रीहिं कृत्वा दित्यादिभिर्वह्निदकार्यं इति व्याचष्टे दित्या
दिभ्यः पत्युत्तरपदाच्चेति पत्युत्तरादीनि तन्नोक्तं बहुव्रीहिवादाद्यपि प्रसङ्गात् । तेनाह इति । नत्वदित्यैः एव
मत्यर्थो देवताद्यर्थे सावकाशः अपत्येतु परत्वादिनस्त्वान्तियम इति कृतः स्यात् सत्य एकत्रेतत्त्वत्र पूर्वं
विप्रतिषेधः एवादेशादर्थविशेषलक्षणादपवादात्पूर्वविप्रतिषिद्धमिति अर्थविशेषेति किं ।

ग्रं॰ १२

गोष्ठपतं उष्ट्रपतिनामप्यत्रेत स्येदं पत्राधर्कं परिषदस्त्रैन्यज् अयथकथं दैनेयमिति अत्राङः दितिशा
ब्दात्कृतिनिदिकारादृयिनइति दौषिक्तुनेस्त्रीभ्योढक् एवस्तन लिङ्गविशिष्टपरिभाषाया अनित्यत्वा(
दिति । आदित्यादिति । आदित्यशब्दाण्ण्यप्रत्यये यस्येति लोपे हलो यमांदिति यलोपः नचाल्लोपस्य
स्थानिवद्भावः नपदान्तेति पदलोपेन निषेधात् काशिकायामिति । हरदत्तमाधवग्रन्थेप्येवं तथा
च प्रयोगः नाश्रयाम शाकटायनाः प्रनर्यानतनाइति भाष्योक्तेनैनतदुष्टे नचप्रयोगोनिर्वाहः ।
बाह्वादिरिति । इल्लोपवचनमव्ययानां भमात्रे यत्वस्थानित्वत्वज्ञापनार्थं तेनारातीयइत्यादि सिद्धं
एवमकृतेप्यञ् वचने प्राक्तदीव्यार्थं मा चोग्रस्थेन तथाप चेनि पठनेतदनाकरं । अश्वत्थामइति ।
भाष्योदाहरणादेवेह नदन्तविधिः अश्वत्थाबलवाचिनः स्थामन् शब्दस्य केवलस्यापत्यनयोगाभा
वे ज्ञानादिष्वेव विधिः स्यात् अश्वस्येव स्थामयस्येति बहुव्रीहौ पृषोदरादित्वात्सलोपः । गोरिति ।
न केवलमपत्य एव किन्तु सर्वेष्वप्राग्दीव्यतीयेषु । गव्यमिति । गव्यभावे गोरिदं गोर्देवतायस्येत्याः
दिरर्थः अनेनाहिगव्यमिति जैमिनिसूत्रे हविर्यत्नो वार्तिककाराः समाहिताः केचित्तु प्राग्दीव्यतीये
भ्यो न्यत्राप्यर्थे यत्र इति व्याचक्षाणाः गवाचरति गव्यः इत्यादि प्रयुञ्जः गोरूप्यमित्यादि हेतुमत
श्चेभ्यो न्यत्रस्यात् रूप्या मयट्चेति रूप्यमयटौ उत्सादिभ्योऽञ् । अग्नेर्वद्दपवादनाभिजादीनां वा
पवादोयं इहपठितेन वष्कयासे असमासे पूर्वाचार्यसंज्ञेयं वष्कस्यापत्यं वाष्कयः अरसेर्किं गोवष्क

पिः प्रसङ्गस्तेन तदेवेह उदन्तं विधिं ज्ञापयति अथेन्द्रो नामस्मृद्धः प्राधीनवं इति सिध्यति धेन्वशब्दस्येद्गपा
ठात् नचैवं धैत्रकं वचनमिथ्यादि निवाच्यं धत्रर नञ् इकप्रत्याद्यनीति विशेषवचनस्याभावे प्राप
र्षालिमतेनोदाहृतत्वात् इकमिति ठकमित्यर्थ इति कैयटः । अग्निकलिभ्यामिति । अग्रमथेः सूत्र
ह्याता साम्प्रदेवतेत्यधिकारे अग्नेर्ढगिति सूत्रितं इहं मासेत्यधिकारे कलेर्ढगिति तदिदं सूत्रद्वयम
पनीय प्राग्दीव्यतः इति प्रकरणे अग्निकलिभ्यां ढगिति पाठ्यं तेनाग्नेरपत्यं अग्निनाइहं साम अग्नाभवे
अग्नेरागते अग्नेः स्वं वा आग्नेयमिति सिद्धं एतेन मीमांसकैर्धेज्ञं कलेर्ढगिति पाणिनीयसूत्रमपा
र्थकमित्यादि तत्सर्वमवैयाकरणमीमांसकमन्त्रोपाद्यमिति प्रपञ्चितं शब्दकौस्तुभे इत्यपत्यादिवि
कारान्तार्थसाधारणाः प्रत्ययाः । स्त्रीपुंसाभ्यां । प्राधिन्यत्रवतीते स्त्रैणादीति स्त्रीपुंभवः स्त्रीभिश्च र
तीति स्त्रीभ्योहितः इत्यादि वत्यर्थे इति सामान्यापेक्षं ज्ञापकमिति भावः अतएवोदाहरति । स्त्रीवदि
ति कथं तर्हि त्वतलोः स्त्रीत्वे स्त्रीता पुंस्त्वं पुंस्त्वेति प्राक्त्वादिति चकारादिति वक्ष्यते । द्विगोर्लुगनप
त्ये द्विगोरिति षष्ठी तदर्थस्तु हेतुत्वे तच्चरथन्तरसामत्वादेरिवभाविनोऽपि वृद्ध्याख्यसायात् तदेतदाह
द्विगोर्निमित्तमिति प्रजादिरिति एतज्ज्ञापकसूत्रादचोऽत्यस्यापकर्षात्लभ्यते वाग्रहणमत्रवत्स्यमव
स्थितविभाषाश्रयणे वा । गोत्रेऽलुगचि । गोत्रे किं धस्कादिभ्यो गोत्रे इति प्रकरणेन यस्य लुक् प्राप्तः
तस्येव लुग्यथास्यात् नेह उवलस्येदं औवलं बादरं यूनि लुक् इहापि द्विगोर्लुगनपत्ये इति गोत्रे ते
वि

न्येवस्थानी तथा च ल्यगल्यग्रहणं शक्यमकर्तुं प्रजारावितिकिं ग्लौचुकायन इत्युक्तं प्राग्दीव्यतो
ऽणिके तस्मिन्कृते ग्लौचुकायनीय नञुपग्रह इत्यस्मिन्ने ऽणैरणं बाधित्वा परत्वाद्वचोऽणिनीति वृद्ध्यभा
वो गुणस्य तु पिच्च इत्यादिरवकाशः किं च गुणेकृते वादेशे च प्रत्ययोपधाया इति वृद्ध्यभावो नत्वाह
प्रादिवृद्धिरिति परत्वादिति भावः प्रत्ययोपधावृद्धेरवकाशः गोपाचकः प्रादिवृद्धेरवकाशः स्वश्वः सा
स्वते ऽपगवः त्वाष्ट्रो जागत इत्यादौ उभयप्रसङ्गे परत्वाद्वादिवृद्धिरेव भवति न च पुनः प्रसङ्गविज्ञाने
सकृद्गतिन्यायाश्रयणात् प्रवर्त्तापकं प्रत्र शान्तिकादिषु प्रकरसमासन्यायः प्रत्ययोपधावृद्ध्यापो
कस्मादेः सिद्धत्वादन्तरपदासिद्ध्यर्थस्तत्र पाठोऽनर्थकः स्यात् प्रकृतेनेति परिभाषायास्तु समर्थग्रहणमे
वज्ञापकं तद्धितपरिनिष्ठितफलमित्युक्तं परिनिष्ठितत्वं च ज्ञापयतीति पदिकाशाप्य नत्र संनिपाद्धेर
त्यवच्छेद्य तेन ऽपगवः ह्रीर्मानित्यादि सिद्धं प्रश्चिमानणीति लिङ्गं यदि तत्र तद्धितकरणेनाकृत
वृद्धपरिभाषाश्रीयते पामादिगणो विसर्गान्तरपदलोपश्चाकृतसंधेरित्यत्राकृतसंधिग्रहणेन
परिनिष्ठितत्वात्तद्धितोत्पत्तिः स्यात् हि समर्थग्रहणं शक्यमकर्तुं नञ्समासस्तद्धितेन नित्यं बाध्यते न च
तद्धितस्य वैकल्पिकत्वात्पक्षे सोपीति वाच्यं यतोत्सर्गापवादो महाविभाषायामकल्प्यते नत्राऽप
वादेन मुक्ते उत्सर्गेण प्रवर्त्तनेति पारेमध्ये षष्ठ्या वेति वाग्रहणं ज्ञापितत्वादित्याशंक्याह दैव जें॰
यज्ञीत्यादि जातित्वादिति यद्यप्यचोक्तं प्रकृतत्वाद्वोविति यद्व्याचष्टे इच्छानतिव्यतनेनेति तद्व्य

म॰ २॰ ११९

119

येमामादिकामिति भावः गोत्स इति उत्सः प्रस्रवणं वारिप्रवाहो निर्झरो झर इत्यमरः तस्यापत्ययोगात्
गार्ग्यो योऽभीष्मे इतिवत् । जीवति तु वंश्ये युवा पित्रपितामहादिरुत्पादकप्रबंधो वंशः तत्र भवो वंश्यः
द्विगादित्वाद्यत् पौत्रप्रभृत्यपत्यं सूत्रे षष्ठ्या विपरिणम्यते व्याख्यानादित्याह पौत्रादेरिति तथाऽन्वयो भिन्नक्र
मः एवेत्यस्मात्परो बोध्यः स च एवकारार्थ इति व्याचष्टे यावत्सत्त्वमेव एको गोत्रे अपत्यप्रत्यय इति
एतच्चाधिकारबलाल्लभ्यते गैयगव इत्यादि उपगोरपत्यं गर्गादिभ्यो यञ् नडादिभ्यः फक् सूत्रारंभफ
लेमनभेदेन व्यवस्थापयति गोत्र इति स्वगोत्रेन तृतीयेन तथा एको न संख्यायां तृतीये द्वयोश्च चतुर्थी त्रयाणा
मित्यादि इत्यर्थः षष्ठेति तृतीये एकस्मात्तेनिरोधात्त्वात्रिः चतुर्थी द्वाभ्यामित्यादीत्यर्थः पितरेवेति ।
तथा चामरः आत्मजस्तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी आहुर्दुहितरं सर्वेऽपत्यं तोकं तयोः समे इति
ततः प्राचामिति तथा हि तपनत्यनेन इत्यपत्यामिति युव्यापत्तिः पौत्रैर्विशतीति सूत्रे भाष्यकृता तद्गी
ताद्यवाहितोऽपि पितामहादीनां ग्रहणमिति प्रसिद्धं जरत्कारोविषयाभ्यां नेभ सूत्रकारोऽप्याह अपत्यं पौ
त्रप्रभृतीति आद्यपक्षे अपत्यमिवापत्यमिति गोशब्दोऽन्नित्राश्रयणीयास्यात् गोत्राद्यूनि गोत्रमत्पर्य
त्रादेवेति तत्र एवत्यत्ययोनादितिप्रथमपक्षेर्थः द्वितीयपक्षे तु स्थूलप्रकृत्यंतरेकवभ्यानेत्यर्थः
स्त्रियांत्विति । अयं भावः अस्त्रियामिति योगो विभज्यते यूनीति शब्दस्वरूपपरिभाषा चेयं यत्र यत्र
संज्ञा विधीयते तत्रास्त्रियामिति उपतिष्ठते इत्यर्थः सिद्धस्यागतिरियं जीवति तु वंश्ये युवा अस्त्रिया॰

गे॰
११९

मिति तत्सूत्रयित्वसूचितं अतइञ् नपदः किं अभ्यः अपत्यं शोभ्यः कथं तर्हि मवीयतेनं दाशर
थाय मैथिलीति अपत्यत्वरूपविशेषस्याविवक्षायां शैषिकोऽण् । बाह्वादिरिति । यद्वाबाधलोऽ
नेऽन्तिथानो माधवेनोक्तं केवलस्य बाहोरपत्येनायोगात् सामर्थ्याद्वचनविधिः सोबाह्वादीति
तस्मिन्ने ज्ञानेति बाहवीत्याश्वलायनसूत्रबाह्वादिभ्यश्चेति सूत्रे बाह्वादिरिति भाष्ये व्याख्याकद्वा
हरणाच्च बाहोः संज्ञाशब्दत्वात् औडुलोमिरिति यद्यपि लोमन्शब्दो गणे पठ्यते तथापि सामर्थ्या
द्वचनग्रहणे उडुलोमशब्दस्य लोमानि यस्य तस्यापत्यं औडुलोमिः शारलोमिः इत्यादयः प्रमाणादि
प्रसिद्धाः संज्ञात्वाभाव एवमन्ययोर्बोध्यः निरूढत्वेन प्रथमोपस्थिताभिरत्नाभिरेव विधेर्निराकाङ्क्षत्वा
त् यत्तु इदानीं तनो बाहुलस्यापत्यं बाहविरित्येव उक्तं च हरिणा अभिव्यक्तपदार्थाये स्वतन्त्रा
लोकविश्रुताः शास्त्रार्थस्तेषु कर्तव्यः शब्देषु न तदुक्तिषु इति अनर्थकं सन्दिग्धार्थकमप्रयुक्तं
चक्रमेण विशेषणव्यावर्त्यं तदुक्तिषु न तत्सदृशेष्वित्यर्थः अतएव संज्ञाशब्दस्यापत्यस्याश्वारिरिः
त्यत्र राजश्वशुराद्यदिति यत्र मिमीते मानान्तस्याः स्वसा मातृपितृभ्यां स्वसेति षत्वं न वाडवाकिरिति
वाडवशब्दयोर्जातिविशेषाः इत्यादीनि आदिशब्दाद्वषादकिः चाण्डालकिः वैश्वाकिः वरूथनेऽरिति
ब्रानच्छक्नोरिति विहितस्याणप्रत्ययस्येति शेषः यञिञोश्च गोत्रेयाविति । गोत्रेकिं द्विपादत्र
मसुइयत्र द्वेष्यः शानकूमादिभ्यश्च सौनकूमिः नटापत्ये माभूत् । अन्तश्यानन्तर्ये । अन्तरीत्य

स॰ र॰ ए॰ 120

पंचम्याः सौत्रो लुक् सूत्र इति अनेनैवेत्यत्रेत्यर्थः वैदिरित्यत्र अरण्यानामाशंकयाह बाह्वादेरिति
प्रवराध्यायप्रसिद्धमिति एतच्च स्त्रीभ्योऽभ्यानञ् स्त्राणमिति सूत्रे कैय्यटे स्पष्टं । काप्य इति इत
स्यानिञ् इति फक् कप्यर्गगादित्वात् यञाम आङ्गिरस एवेति नियमात् सूत्रे गर्गपाठस्तु लोहितादि
कार्यार्थः काप्यायनीति बोधिरिति अन्वाख्यत्वादिञ् बाह्वादित्वाद्वा वनेशस्य यञणोः प्राग्मयोः प्रा
ङ्गिरसे यञेवेति नियमार्थे सूत्रे लौकिक्या विवक्षितस्येति परिशेषेणानस्य एवेति बोध्यं एतच्चाङ्गिरसस्य
तद्वृद्धालभ्यते अत एवाह अनाङ्गिरसे त्विति वक्ष्यमाण इति शिवादिनिरनाङ्गिरसयोरिति सूत्रेणेति भावः
अश्वादिभ्यः फञ् गोत्र इति क्वचित्पुस्तकेऽपि तथा हि अश्वादिगणे गोत्रप्रत्ययान्तात्स्वयः पठ्यते बैल्य ।
अत्र इह अश्वेवा इति बालिनाम राजर्षिः ततो बाह्वादिस्वोरसेति त्यजः अत्र इत्यशब्दो गर्गादियञन्तः
आत्रेयशब्दो ढगन्तः ततः सामर्थ्यान्निफञ् नहि फकत्वानां विना अपत्यप्रत्ययं गोत्रत्वेन शक्यते
प्रसिज्ञान इति गणसूत्रे प्रसिद्ध्यमानो यो जानशब्दस्तस्मात्फञित्यर्थः । जाताया इति । लिङ्गवि
शिष्टपरिभाषया एकादेशस्य पूर्वान्तत्वेन ग्रहणाद्वा यामः फञ् शिवादिभ्योऽण् गोत्र इति निवृत्तमिति
इतः प्रभृति अपत्यसामान्ये प्रत्यया इति भावः एतच्च सूत्रे कैय्यटादिग्रंथेषु स्पष्टं यत्तु मूले लुक्सूत्रे
कैय्यटादिपर्यालोचनया गोत्रसंज्ञा सूत्रपर्यंते गोत्रादिका वहति लभ्यते तन्मताश्रयामिति भावः ।
विपाशेति अन्तोपज्ञाते न्यस्य जाङ्गादेरपि पाठान्यत्वे फञ् वैपाशः वैपाशायन्यः जरत्कारुशब्दः पठ्यते

ओं॰ ए॰

ततः शुभ्रादित्वाड्ढगपि ढेर्लोपोकद्र्वा इत्युल्लोपः जरत्कारवः जारत्कारवेयः विश्रवणरवणश
ब्दौ प्रत्यये तो विश्रवः शब्दस्यादेशौ प्रकृत्यन्तरमेव वा इति विशेषणद्वये समानार्थे वैश्रवणः रावणः
इत्यस्यानिजः ह्याचः अकं उत्पथेत्पन्थगेढक् यत्तु काशिकायां मरीचेर्मारीचइति मत्सदाह तन्
न चित्त्यं बाह्वादित्वेनैव संगतत् तथाचाभिधाने चोज्ञायत इति सूत्रे भाष्यं मरीचिशब्दो बाह्वादिषु
पठ्यते इति शुभ्रादिभ्यश्च मृकण्डुशब्दोत्र पठ्यते सच प्रकृत्यन्तरं: पदव्य मृगण्ड्वादयश्च इति सूत्रे
उक्तवदन्यग्रन्थस्य मृकण्डुस्य पुत्रेस्तीर्थं तथाम्यामतिनिर्मलं इति स्कंदे मार्कण्डेयः उकारान्ता
त्वादेत्तु ढेर्लोपाबाधः। कल्याण्यादीनामिनङ्। परस्त्रीशब्दोत्र पठ्यते पारस्त्रैणेयः शुभ्रादि
कादित्वाद्युभयपदवृद्धिः परभार्यायामुत्पन्नइत्यर्थः विदादिगणेतु परस्त्रीपरशुं च पठ्यते श्रा
पद्यत इति विशेषः पारस्त्रियाः पत्यं पारशवः ब्राह्मणात् शूद्रायां तेन वोढायामुत्पन्ने सच जात्यन्त
रयोगात्परस्त्री न दित्यपरस्त्रीति कल्याण्यादिषु षष्ठीतत्पुरुषः विदादौतु कर्मधारय इति विवेकः
तथाच याज्ञवल्क्यः। विप्रान्मूर्धावसिक्तो हि क्षत्रियायां विशः स्त्रियां अम्बष्ठः शूद्र्यां निषादो जातः
पारशवोपि वेति न चैवं पारशवोपि स्यात् निवर्जा वारत्त्रयाति कादि कार्यं स्यादिति वाच्यं पूर्वोत्तरपद
संभमोहात् नहि हयनावानूर्ध्वपरः स्यादेशः इति विषयविभागो गम्यते सती भिन्नश्चेति।
प्रवृत्तिनिमित्ते उक्तं चामरसिंहेन ग्रथबान्धकिनेयः स्यात् बन्धुलश्चासतीसुतः कौलटेरः कौलटेयो

म॰
रं॰
११
121

भिक्षुकीति समनीयादि तदा कौलटिनेयः स्यात्कौलटेयोऽपि चात्मज इति केचित्तु कुलटाया अपि इन
ङ्तोयं ढूणमाहुः क्षुद्राभ्यः परत्वाद्ढ्रगित्युक्ते नचित्रं तस्य वैकल्पिकतया स्वयमपि पक्षे
ढकः स्वीकाराच्च इनङः प्रामेहं वीरत्वात् तयोर्वेति तत्र दाबेनात्रास्तितेर्त्वमेत्त्वं ब्रितत्वकौति।
दापोल्लङ्कि पुनरदादिलक्षणः दाप् हि बाधितलक्षणोऽपि बाधक इति भावः यत्तु हृदन्यासकृतोक्तः
चटकादेरगत्यैव सांप्रदायिकः क्षुद्रपाद इति तत्राख्यवार्त्तिकविरोधादुपेक्ष्यं । आरगुदीचां ।
उदीचां ग्रहणं पूजार्थं वचनादेव ढ्रक् ढ्रगारकोः पर्यायेण सिद्धेः प्रत्यन इति । अनाकारान्तात् क्रो
तत्थिदित्यर्थः जडस्येति जलद्यातेन डलयोरभेदाज्जडः परिगतो ग्राहः पत्युक्तोऽधात्वोन्माध
वीयदृष्टोस्पृष्टं तत्रापि स्यापत्यं दौत्रिमाद्विबोध्ये गाङ्गेय इति तत्र दृष्टिः सहान्यस्तूनागोरितिको
शाचतत्त्वक्त्रोढ्क् इत्येव सिद्ध अत्राहुः कोरोगोरितिप्रायोवादः सहान्यस्तूनां सर्वोपि दृष्टिः
अतोयमारंभ इति वत्सतरादृष्टिशब्दः शुभ्रादिः तथाचातोदात्रे ढगातप्रथमश्मते सहृष्टियोवृ।
भ्रूभोगोभिरानाडिति अतः पाक्षिकाद्धृदाज्ञाभिभावः कैकेयमित्रयु कैकयस्यापत्यं स्त्री कैकेयी
जनपदशब्दात्क्षत्रियादञ् मैत्रेयिकया श्लाघत इति मित्रयुना भावेनेत्यर्थः गोत्रचरणात् श्लाघात्याका
रेतिवुञ् तत्र हि लौकिकं गोत्रं गृह्यते लोके चर्षिशब्दे गोत्रमिति प्रसिद्धः इति काशिका प
तञ्जयदामित्रशब्दोभेदोपचारात्रदपत्यं मतानैवं तेन तदाबोध्यं यदा तदृश्यादित्वाढ्कञ्मोयस्का

गो॰
११

दित्वादूज्झष्ठलुक् नत्वापरिभाषिकेपि गोत्रेनन्तरेति: मलयादागतं प्रालेयं इत्यादेशोन वृद्धिर्न बाध्यते
विषयभेदात् सूचाभावे वृद्धिर्यादेशो यादेशः प्रागत्तूभयोर्विशेषणं नकार्यं निर्हृदक्षः दाण्डिनाय
न एतानीति दण्डिन् हस्तिन् शब्दाभ्यां नडादित्वात्फक् येस्तु नडादिष्वेतौ न पठ्यते तेषां सूत्र एव निपा
तनात्फक् टिलोपाभावस्तु निपातनादेव । आथर्वणिक इति । वसन्तादिषु पठ्यते अथर्वणा प्रोक्तो ग्रन्थः
अथर्वा उपचारात् तमधीते आथर्वणिकः जिह्माशिनेति शुभ्रादिः जिह्माशिनो ऽपत्यं जैह्माशिनेयः
वाशिनोऽपत्ये वाशिनायनिः उदीचां वृद्धादिति फिञ् भ्रूणहन् धीवन् एतयोः ष्यञि तकारादेशो निपा
त्यते भ्रूणघ्नो भावो भ्रूणहत्यं इह हेतो लत्वे हन् लोपे च सति लोपे नित्ये वसिद्धे निपातनं ज्ञापयति धातोः स
रूपग्रहणे तत्प्रत्यये कार्यविज्ञानमिति तेन वार्त्रघ्नमित्यत्र नत्वं न सारवैक्ष्वाकस्य णिपरे यादेशो निपात्य
ते सरय्वां भवं सारवमुदकं दाविकायां सरय्वां च भवे दाविकसारवा वित्यमरः नत्व दाविकाशिंशपादि
त्वादञ् दीर्घसूत्रे ऽयसामान् इति सूत्रेण दाविकाशब्दस्याचामादेरा कारादेशो बोध्यः । ऐक्ष्वाक इ
ति अणि नमञ्जेनेव एकश्रुत्यापादनात् उभयत्रापि उकारलोपः इक्ष्वाकोरपत्यं जनपदशब्दात्क्षत्रिया
दञ् ऐक्ष्वाको राजा बहुत्वे लुक् इक्ष्वाकूणां जनपदे तेन तदधीना दिवसिध्यः इक्ष्वाकुभ्र जनपदेषु भ
वः कोपधादण् ग्रस्य बहुत्वेपि न लुक् ऐक्ष्वाकेषु च मैथिलेषु च फले त्वस्माकमपि शोषा इति श्रा
तिः हिरण्मय इत्यत्र मयटि यादिलोपो निपात्यते हिरण्यस्य विकारो हिरण्मयः यस्कादिभ्यो गोत्रे ।

म॰ र॰ तत्र

129

अपत्याधिकारादन्यत्र लौकिकं गोत्रमित्यभिप्रेत्याह अपत्यमात्रस्येति । राजश्वशुराद्यत् यथाक्रम
मणिजोरपवादः । जाताविवेति प्रकृतिप्रत्ययसमुदायेन जातिरुक्ता चेत्यर्थः । प्रत्ययस्तु अपत्य एव
वर्तते सपत्नशब्दः शत्रुपर्यायः । अभ्रष्टत्वं प्रातिपदिकं वस्तुतस्तु सपत्नीशब्दादिवार्थे अण्प्र
त्ययो निपात्यते सपत्नीव सपत्नः । अनपत्येन सपत्ना अयने भवो लिङ्गत्र सपत्नादित्यत्र ग्रहः पञ्चते
लिङ्गरेणमप्येवातः पामनेति नञ्ऋत्वात्पुत्रत्वस्वरूपोऽवयवार्थोऽस्तीति भावः । वृत्तिकारस्तु इह
प्रत्ययग्रहणं न संबध्यते घनर्थकावेव प्रकृतिप्रत्ययौ समुदायार्थः । परेस पत्नइत्यनन्तराह । गार्ग्यापत्य
मिति । पितरि संविज्ञाने मातापुत्रपदेशात् ऋत्वस्य । अपत्यवादीति । अस्मादित्यनेन गार्ग्यशब्दा
दिति यद्यपीह प्रकृतेर्हस्वत्वाम् स्याणित्वेनोपपद्यते तथापि गलचुकायन्या अपत्यं गलचुकाय
नः इत्यत्र हस्वत्वेन तद्बाध्यं गोत्रेति किं कात्तिकेयः स्त्रियाः किं गोपगवस्यापत्यं फकवा औपगविः आत्म
नेकिं गार्गेयः । कौरव्यब्राह्मणा इति यत्तु कुरुणा दिभ्यो ण्य इति वक्ष्यते तत्क्षत्रियादित्यधिकृत्य न
त इस्रात्रालाह्मणत् कुरवः क्षत्रिया इति विशेषः । वावदूक इति । वदेर्घणानाह्वकइति सचऊ वदिरा
णो वावदूके निपातसामर्थ्यादेवेति माधवः । उलूकादयस्तु अणादिसूत्रेणेत्यन्ये सम्राज इति ण्य
सूत्रे हरिषेण्य इति पतिसंज्ञायां मा गादिति णत्वस्यासिद्धत्वान्नेनोनोय नापित्य इति प्राचामतेन
हे उदीचात पत्यान्याजितिवक्ष्यते उदात इति उदीचामित्येव इञोऽपवादः । वृत्तिकारस्तु उदन्त शब्दे

उ॰ तत्र

शिवादिषु पठित्वा कारितत्वाणप्रदोषाभिन्नमग्रणीवा एतत्तद्वा वाधेनेष्यते इत्याह सर्वथाप्यणपरभ्यो
रूपद्वयेनिर्विवादे यत्तु षष्ठ्यर्थे वृद्धत्वं धृतराष्ट्रनामण्णीति सूत्रे ह्रस्वदेशेनोक्तं नेत्याह तस्येदमित्यण् नेव
पत्ये कारितत्वाणेनैव न बाधितत्वादिति नदिह त्वभाष्यवृत्तिस्वग्रन्थविस्मरणं तेकायनिरिति
तिकग्रास्केदने तिकादिनीतितिकः हृग्रपथत्वात्कः हृद्यात्किं दाक्षिरिति दक्षिणहेतुर्यौक्रपरः
नामधेयत्वेन वा नामधेयस्येति वृद्धत्वात्त्वं लौकिके न भवत्येव दालायनीपस्थिनौ त्यादिना राष्ट्रस्थिफ
पस्थिनीः स्यमरः पाञ्चालानां राजेति इह वृद्धावपि बहुवचनविषयादिति प्रासोऽत्र न वाच्यते । पू
रोरिति । पुरुषशब्दस्य जनपदवाचित्वाभावात् तद्राजेभ्यो यो सिद्धे न तद्राजसंज्ञार्थं वचनं जनपद
वाचित्वेन तु जनमगधेत्येव सिद्धे पाण्डोड्यण् । णकारो वृद्धिनिमित्तस्येति पुंवद्भावप्रतिषेधार्थः
क्षत्रियाभिधायित्वाचिनो ग्रामवाचिनश्च पाण्डोनेह ग्रहणं जनपदशब्दादित्युक्ते हि तदधिपति
वाच्येवोपतिष्ठते कुरुनादिभ्यो ण्यः कुरोस्तु लक्षणेन ग्रामे नकारादिभ्यस्तु ग्रामेवचने
तेन तद्राजः । पुत्रादयश्चेति । ततः प्राचीनात्तत्र तत्रैतेन न परामृश्यते गोत्रइत्यवसंज्ञाकांडेन वि
च्छेदादिति भावः तद्राजस्य बहुषु तदर्थेति तद्राजस्यार्थे न तु न इत्यर्थः । रघुयदुशब्दादिति ।
पत्यबहुवचनेति सूत्रे पदमञ्जर्यां विस्थिते सिंधुतत्वेति । कंबोजशब्दस्य पठ्यमानत्वादिति भावः
पुर्वेतो कुतीति न्याडी लुक इतोमत्र स्थजातोरितिरोष । कुद्वोरिति । एतस्य लुक इत्यत इत्याह

म॰ टी॰ ११ 123

अनेन च इह तत्त्वज्ञानेन प्रकारो विशेष्यते न तु विपरीते विशेषणेन तदन्तविधौ ज्ञापकम्। एणादीनामपि अनेनैव
वल्लकिरिड्डो अर्थे तिङ्गो तिङ्कस्भोल्लवचनवैयर्थ्यापत्तेः येन कौसल्येति सिद्धं तदेतदाह तद्राजस्या
कारस्येति। कारूषीति सृजनतः करूः नेवाह मूलविभुजादित्वात्कः करूषाः एतेन कारूषीति मूर्धन्य
पाठः प्रयुक्तः अणिञोः। यद्यपि स्त्रीप्रत्ययाः प्रकृताः स्त्री प्रत्ययत्वेन लक्ष्यसिद्धिरप्यन्तु हा तथा
प्यादेशत्वमेवोचितं पत्रनीयत्वमेयोगस्य यथा अणिञोरिति षष्ठी स्वरसात् इत्यभिप्रेत्याह ष्यङादे
शः स्यादिति नत्वयेनतु ज्ञायते सर्वादेशः स्यात् डित्त्वेत्यस्यानन्यार्थत्वे डित्त्वं ष्यङ्नजादेशप्रचारितार्थत्वात्
ष्यङो डित्त्वस्य यङश्चापि विशेषणार्थत्वादित्यत आह निर्दिश्यमानस्येति कौसल्यकार्मार्यगोत्रेति प्रतः ष्यङ्
वाराह्येति कुतः ष्यङ् अणिञोः किं आर्त्तभागी ऋतभागस्यापत्यस्त्री विदादित्वादञ् इत्यपत्याधि
कारः रज्यतेऽनेनेति शुक्लस्य वर्णान्तरापादनमिह रजनेरर्थः कषायहारिद्रकाषायपादादिविति उप
मानाद्वेति लाक्षारोचनात् ठक् शाकलाद्वानिकस्योशाकलकर्दमादिविति हरिद्रमचक्षेप आभ्यामि
ति भाष्यादीत्यनेन तत्रोक्तं नीलेति नीली ओषधिविशेषः नक्षत्रेण नक्षत्रवाचकाच्छब्दात् वृत्तिविषये
यद्युक्तं चन्द्रमससमभिव्याहृतः प्रत्ययं लभते पुष्येणेति पुष्यसमीपस्थेन चन्द्रमसेत्यर्थः लुबविशेषे
ति अयं च विशेषः वृत्तिविषये तत्रायं वृत्तिविकालाख्यते नाद्येषभ्यानस्तानस्य इति विशेषणानामा
नेऽपि लब्धवति देहाद्धः विशेषे उदाहरणमाह निष्पन्नं वनमिव वीर्यमह्नीति। अविशेषे लुब्बाधा

शे॰ ११

ज्ञाधीयं नचलत्वविशेषं इत्यणाइवरुस्यापित्वस्यादितिवाच्यं पूर्वोपास्थितेनैव धातोवतस्येति
प्रकोपत्वात् एतदेवाह मध्येपवादन्यायेतितनत्व ग्रंसिद्धर्थेइति तथाचश्लोकवार्तिके इष्टमा
मनिज्ञानेवाप्यणाभित् द्विर्वाविधीयतेइति ज्ञानेयंयोद्धरणा सचवाहिरित्यन्वयः शान्तभिषजि
ज्ञानः शान्तभिषजः शान्तभिषः इत्यहिमारदीर्घ्यतइतिसूत्रेण कालाच्छन्नोबाधितः संधिवेला
दिसूत्रेणनप्रतिप्रसूतः इत्यर्थविसर्जनेण । ग्रन्तोवाभित एतच्चसूत्रेलेखस्यानेवसूत्रे वामदेवा
त् यस्येतिलोपेनसिद्धत्वात् ग्रद्योहित्वकारणंस्वरार्थंययतोश्चेति सूत्रेणविधीयमानेनञउत्तरस्यय
तेनस्य प्रत्तोदात्तत्वे ग्रवामदेव्याशब्देमाभूत् किंत्वव्यय पूर्वपदस्वरएवयथास्यात् नञ्ग्रहणेपि
डित्वेययतोरिति ग्रस्यप्रवृत्तिः कृतोनेतिचेत् परिभाषाबलादित्यवेहि तथाहि निरबंधकग्रह
णेन तदनुबंधकस्येतियत्तुग्रहणेग्रनुग्रहणेनभवति इमेचपरिभाषेइहवर्तिनेत्वेनज्ञाप्यते तत्राद्यायाः
प्रयोजनं सर्वणाग्रोति सूत्रेतव्यग्रहणेतव्यत्ग्रहणंमाभूत् दिवउदित्यत्रदीव्यतेमाभूत् द्वितीयाः
स्य त्वङ्ग्रहणेचक्त्वाग्रहणंमाभूत् । स्वयतेरः । ग्रंशोस्वतनेह ग्रंशोस्यितत् परिहृतोरथः तदेका
नग्रहणं कर्तव्यंनेह पुत्रैःपौत्रैःपरिवृतः नवोद्धृत शारावइति भक्तोग्रंश्यइत्यर्थइति हृत्रिकारः
ग्रवशिष्टइतितदर्थः तथाचकल्पसूत्रेष्वव्यवहारः उच्छिन्नाच्छेन सर्वज्ञहोतीति सास्मिन्पूर्णमा
सीति सूत्रान्याकउत्वेत्यत्रवर्तिते नेनसमस्थानात् इवप्रत्ययः स्योदिलात् ग्रनंशास्त्रेणविहितोनियम

म.
र.
ग्र
124

त्मास्मिन्संप्रदायेन गम्ये उख्यमिति । कथं तर्हि उख्योऽग्निः नह्योसौ भवत्यं इति चेत् तस्य भवार्थे दिगा
दित्वाद्यद्भ्यः इत्यत्र उखीति संस्कारश्चेह लवणादिना यत्तत्संस्कृतार्थे प्राग्वहतेरिति ठ
ञुच्यते सत्त्वनीयोनात् न तस्य उखा संस्कृतो ऽपि ह्याधिक एव उख्येन स्वयनी निर्दिश्यतस्य इहैव ह
वेनिपातनात्संप्रसारणाभावः इति शब्दादित्याह लौकिकी विवक्षा मन्त्रसरतनाहृत्य संज्ञायामिति
वृत्तिकृताप्युक्तमिमे । पौर्णमासीति महाराजप्रोष्ठपदाट्ठञित्यत्र तस्मिन्नर्थेन इत्यर्थे पौर्णमासादण्
उपसंख्यानादण् शानकन्दाः इति शानशब्दः तेन वचनः सोमीति हलस्तद्धितस्येति यलोपः वायव्य
मिति ऋतेण वातोर्यान्यादेशः उषस्यमिति उषः शब्दः स्त्रीलिङ्गो दिवौकसि इति देवतावाक्ये एत
च्च रूपेण संभवरथमित्यादिमन्त्रेषु प्रसिद्धः शुनासीरीयमिति शुनश्च सीरश्चेति द्वन्द्वः शुनो वायुः
सीर आदित्यः इति हि निरुक्तः पूर्वेत्वेकमेव शुनासीरमिन्द्रस्य गुणमाहुः तथा चाश्वलायनः इन्द्रो
वा शुनासीर इति मन्त्रवर्णाश्च इन्द्रं वयं शुनासीरमस्मिन्यज्ञे हवामहे इति वास्तोष्पत्यं वास्तोष्पतीय
वेश्मनुर्वास्तवरश्चियो वास्तोः पतिः वास्तोष्पतिः निपातनात्साधुः गृहमेधीयं गृहमेध्यं गृहमेध
शब्दोकारान्तः मरुद्भ्यो गृहमेधेभ्यः इत्याश्वलायनः गृहमेधास आगत इति मन्त्रलिङ्गं च कालेभ्यो
कालाट्ठञ् इति प्रकरणे येभवे प्रत्ययास्तेषां साम्प्रदेवतास्मिन् विषये नेन सूत्रेणाति दि
श्यते वाक्करणसर्वेसाहृप्रणार्थं तेन यस्माद्यो विहितः स एव भवति तथैवोदाहरन्ति मासिकं मासि

ऽ.
ग्र

घेण्वमिति सकारोऽपि तथैवोदाहरंति स्त्रीत्ववाचककारमेवपठेदितिभावः तस्यसमूहः विग्रवक्ष
दात्रे प्रत्रगोत्राप्रलिपदमत्रजप्रत्ययमिहोदाहरणं तथाहि प्रविन्नाहेक वदंते प्रत्रदात्रादेरः
त्र गोत्रोनाहुत्र केदाराट्टिभ्यः प्रातिपदिकनात्स्य स्त्याराधेनोदाहरंति काकं बाकं पवंबाकंस
काककूकवकमाहूषादात्राः प्राणिनांकपूर्वाणामितिफिञ् स्यात् प्राणिविशेषवाचिनाशब्दा
नांये प्रादिभूताः केवगोत्रपूर्वेतेषाञ्चदात्रः स्यादितिसूत्रार्थः प्रथमादिप्राक् शाकटेरितिसंधिवृ
त्ये तत्प्राप्तिकं खंडिकादिभ्यश्च कशाहूस्य भाष्येसूत्रोचपठितेत्वनात्रेनादित्यवधेयं भित्तादि
भ्योऽण् भैक्षमिति प्रविन्नत्वाहुक्याप्तः गार्भिणमिति प्रत्रदात्रादेरण्प्राप्तः सतितान्समिताद्यदा
त्रः डिलोपश्चस्यात् युवतीनामिति वृत्तिकारस्तु भित्ताद्गणे युवतिपाठं पठितवान्तन्नसामञ्जस्य
त्रपुंवदित्यागः नचात्रदात्रादेरनेबाधितेपाठः भस्याढेतद्धितेपुंवद्भावः सिद्धश्च प्रत्ययविधाव
तिमागवेति प्रत्ययनिमित्तोसत्यां कतिनश्चतुर्थीतिकतिनेतनयाप्राप्तस्यदात्रत्वात् तथाचसौसंगे
यौवनमिति रूपमन्यतेरस्थितं किंतु तेनसकृते भाष्यवार्तिकयोरिहयुवतिशब्दपाठस्यप्रत्याख्या
नात् तथाचेह गोत्रस्त्रीकौपण नतभिक्षाटिकत्वप्रयुक्तप्रत्ययवधेयं । ग्रामजनादिति पूर्वंचगार्भिण
यावतगणस्यमरेक्तिः प्रदःसमीत्युवंबांरयौवनेत्रुटकृत्साकमशुमृणालहारिणाःइतिश्री
हर्षोक्तिः भाष्यमतेपिनासंगतेतिभावः ब्राह्मणमाणव नन्वत्रयोपमीहस्राः तेभ्यःमत्तुनोयजे

मः
टीः
७५
125

वात्तनहिसूत्रात् यस्मिंयस्मिन्वाहूपेविशेषोस्ति नवास्यैउभयथाप्याकृदात्तत्वात् ठक् तन्नात्रवार्ति
केष्यते ः स्वरितत्वात्स्वरे प्रत्ययविधानार्थेयन्वचनं नाभिप्रायार्थकथनपरंवार्तिकमाह सहायादिति
सहायाद्वा ः लोकविशेषस्य संज्ञा सहायेति सहायानांसमूहः कथंतर्हि सहायवद्ग्रहणमिति मत्वर्थल
क्षणोयस्यवेदि ग्रामजनबन्धुभ्यस्तल्वार्तिकान्तर्गतः सहायशब्दोपिसूत्रेप्रक्षिप्तः सूत्रदात्तादेश
त्र इहसूत्रेचित्रउदाहरणं प्रतिपत्त्यार्थं प्रक्षिप्तं शाकुलिकमित्यादौ परत्वाद्धि गोत्रत्वात्प्रथमेनाः
ह कापोतमिति । कपोतमयूरशब्दौमध्योदात्तौ लक्षणवन्तरहृयोरितिनिपाद्य सूत्रात् खण्डिकादिभ्य
श्च प्राकृदात्तार्थवचनं प्रतिपत्त्यर्थकोबाधनार्थंच चरणेभ्योधर्मवत् ॰यस्याःप्रकृतेर्धर्मःप्रत्ययोय
मेवत्यने सतः समूहेपिस्यादित्यर्थः वृत्तादयोहि चरणेभ्योवर्त्यन्ते चरणाद्धर्माम्नाययोरिति
तनत्रवार्तिकं नदष्णेननिर्देशसूत्रेणज्ञापनमितिबोध्यं काठकमिति गोत्रचरणाद्वुञ् छान्दो
ग्यमिति छन्दोगौ ॱॱ केचिज्वः विषयोदेशो नस्येत्यत्रवर्तते इत्याहृषष्ट्येनेति । भौतिकविधमिति ।
लौकिकत्वेलोकात् सोमादिविति प्रत्ययेयत्राणिबन्धनंपञ्चाशादिके छेदः नद्वाचकात्प्रत्यमानायस्येत्या
मेतिप्रत्ययःस्यात् यत्रादिमान्समासगात्रश्चेत् सप्तशतेइतिसमासगात्रः प्रकृतेरिच्चकारकइतिकर्माण
ग्रन् सष्टादशादित्वात्इफनकारयोर्लोपः तृप्तस्वाये चतुष्टयषष्ठाय पैलवाहने समासेप्रनरभ्यासित्व
नयोरवस्येत् इत्येवमादिवचनाद्यत्रहृयोरूद्वेतिस्वः क्रियते सप्तगात्रः त्रैपुरभामिति ऊदीरऊदीर

जेः
७५

इत्यादिवल्लौकिके कृते लिंगानुशासने संग्रामे प्रयोजनवाचिभ्यो योधृवाचिभ्यश्च प्रथमान्तेभ्योऽस्ये:
तिषष्ठ्यर्थे संग्रामे अभिधेयेऽण्स्यात् तदस्यां प्रहरणंकिं मालाभूषणमस्यां क्रीडायांकिं ए
कृत: प्रहरणमस्यां सेनायां चक्रः सास्यां चक्रः किं श्येनापतनमस्यां वर्तते क्रियाकिं पाका
रोऽस्यां वर्तते तदस्यामिति प्रकृते पुनः सास्यामित्युक्तिः क्रीडायामित्यस्यात्र हि निवृत्तिर्माभूदिति
अनपवादः दंडपातोऽस्यां तिथ्याविति तदधीते तद्वेद द्वितीयान्तादध्येतृवि प्रत्ययः स्यात् द्वितय
ग्रहणमधीयाने विद्वांषि च पृथग्विधानार्थं अन्यथा उत्तरत्र क्रत्वन्तसेनादीनामशाहृत्मकतया अध्य
यनासंभवेन वेदितर्येव प्रत्ययः स्यात् सिद्धान्ते तु द्वितयग्रहणात्तामर्थ्यात्क्रत्वादयः शब्दा
स्तस्यानिर्पदिकग्रन्थे गौणा अपि प्रत्ययं लभन्ते क्रतूक्थादि क्रतुविशेषवाचि क्रतुशब्दस्तत्र
ह्यते तथाह्यसौ ते उक्थादिषु पठ्यते तत्र क्रतुपर्यायः उक्थादिश्च यत्तशब्दस्य पाठादिति भावः
अग्निष्टोमक इति तस्याविशेषवचनस्यापि अग्निष्टोमशब्दस्य तत्त्वस्य केकानोनिवृत्तिः प्रयोगः
वासवदत्तामिति गद्यरूपो ग्रन्थविशेषः आख्यायिकेत्यधिकृत्यात्कृते ग्रन्थ इति सूत्रे हरदत्तः ।
सर्वादेरिति सर्वादेरित्यत्रोक्तवनः सर्वशब्दस्य ग्रहणात्सर्वादेः पृथग्ग्रहणं पुनरभ्यर्थं वृत्ता
भाषायां सावक सर्वातिक इति वार्तिकांतमधीते इत्यर्थः अंतवचने अव्ययीभावे चाकाले इति
सहस्य सः ततोऽणोऽलुक् इकोऽचिति । पदशब्दस्योत्तरपदं यस्य तस्मात्तिकन्स्यात् पानशब्दात्पोदेश

म· र· ११६

126

त्वात्त्वप्रत्ययोः परत्वेन प्राप्त्वादेनापि कस्मात् छोऽङीषः पानप्रत्ययकः इति अच्वृद्धिकारो बळल
ग्रहणं कृत्वा शानप्रत्यय इति ग्रामणो राजन्यात् इकन्बळल प्रत्ययो परदेशस्तक्षायनगणो हृत्र
मित्यामसकारः वसन्तादिभ्यष्ठक् उक्थादिभ्यश्च वसन्तादयः पाठ्याः नेवावसन्तादिषु तथा तन्न कृत्व
मित्येव। आथर्वणिकमिति आथर्वणप्रोक्तोऽथर्वा उपचारात् यद्वा तेन प्रोक्तमिति प्रत्ययश्च इति भा
ल्यवक्तव्यः वासिष्ठः विश्वामित्रो वाचकः इत्यस्मात् अथर्वणो वा अथर्वा अथर्वाणः इति शौ
षिकप्रकरणे भाष्योक्तेः साधुः। एवं त्वित्यर्थं। एवं प्रत्ययान्तात् त्रय गोत्रप्रत्ययान्तात् छप्र
त्ययान्तात् जितस्य प्रत्ययोर्दर्शनाभिधायिनो गणे नोल्लेखात्। ऋष्यादिभ्यो णः। कौरव्यः पिता
कौरव्यः पुत्रः ऋष्यन्धकेत्यण् श्वाफल्कः पिता ततः इत्रतः लुक् श्वाफल्कः पुत्रः वासिष्ठात् ऋष्य
ण् वासिष्ठः पिता पुत्रस्तु तिकादिभ्यः फिञ् नैकायनिः ततो लुक् नैकायनिः पुत्रः ऋष्यण्प
वेति पाणिनग्रहणेन गोत्रग्रहणं तस्यादिकप्रवाणं इति भावः यद्वा पाणिनशब्दो यौगिको न तु ऋषेरूढः
लोकविधौ तु रूढस्यैव ग्रहणं न तु पाश्चात्येन भगवतः पाणिनेः सिद्धमिति वार्तिकनिर्देशाद्दाक्षी
पुत्रस्य पाणिनेरिति भाष्याच्च निर्णीतमित्यवधेयं। आष्टकमिति। संख्यायाः संज्ञासूत्राध्ययने
ष्विति संख्या च प्रतिशब्देनाद्यः कन् छन्दोब्राह्मणानि छन्दोग्रहणादेव सिद्धे ब्राह्मणग्रहणं तत्
द्विषयार्थमिति प्रपञ्चार्थं तेन पुराणप्रोक्तानामेव तद्विषयता नेह याज्ञवल्क्येन प्रोक्तानि ब्राह्मणानि

गो· ११६

याज्ञवल्क्यानि कण्वादिभ्यो गोत्रे इत्यण् अपत्यस्येति यलोपः याज्ञवल्क्यादयो ह्यतना इति सूत्रकार
स्याह भिक्षुनाट्यव्यवहारः छन्दोब्राह्मणानीति किं पाणिनीयं व्याकरणं ग्रन्थश्चातुरर्थिका तदस्मिन्न
न्नर्थे यमपवादः सकललोकनिरूढो यद्यस्यात् नन्वाथर्वणिकस्य कौतिनेयीत्य तदर्थं इति शङ्कः दोषान
न्नाम्नीसूत्रसूत्रत्रयेण्वन्वेति तेननिवृत्तेः ग्रन्थभाव्यनणयोस्तद्धद्देवकर्मगणाङ्कः । चातुरर्थिकमिति ।
चतुर्णामर्थानां समाहारश्चतुरर्थी तत्रभावाच्चातुरर्थिकाः ग्रन्थात्मादित्वाद्वृञ् तद्धितार्थे द्विगोर्लु
ग्नोर्लक्षणात् कुम्भजान् सूत्रेज्ञमदशाह्वस्यादि द्विःपाठेपि एकशेषोपि न भवति प्रथमतः जम्बुदाना
नां चतुर्णां द्वंद्वं विधाय द्वितीयेन काशादिजम्बुदान्तं द्वंद्वेन सह पुनर्द्वंद्वविधानात् श्रादेशाह्वमत्येक
मभिसंबध्यते तदेतदाह प्राग्रोहणादिभ्य इति जनपदे लुक् तत्रापि ज्ञानीत्येव नेह उदुम्बराः सन्त्यस्मि
नौदुम्बरो जनपदः नयत्र लुक्त्वं तेन नामधेये वक्ष्यमाणेनेति प्रत्ययेवापदान्तरत्वादिति भावः नचाइलो
पस्य स्थानिवत्त्वं पूर्वत्रासिद्धे न स्थानिवदिति निषेधात् नन्वेकदेशविकृतमनन्यवदिति परत्वाद्गुत्वं स्यादिति चेन्न बहिर
ङ्गत्वेन टिलोपस्यासिद्धत्वात् न च षाष्ठी बहिरङ्गपरिभाषा नेनपरत्वेदितिवाच्यं कार्यकालपक्षाश्र
यणात् नन्वेवं गौतमीनामाद्वैतः चटी ग्राससलकीत्यादौ जस्त्वं स्यात् । यस्येति लोपे कृते वशिष्टस्य स्था
दिष्वनिपदत्वात् नच भत्वे यस्येति लोपस्य स्थानिवद्भावात् नचपदत्वेप्येवं तस्य फणविधानास्तुत्का
र्थकालतया पूर्वत्रासिद्धे चेति निषेधादिति चेन्न पदसंज्ञायां यचोर्हेशाश्रयणात् प्रत्ययवशात् गेहः

म. र.
१२७
127

त्यवस्थायां पदत्वेव स्वसादेरिव स्यान्निवृत्तावेव तयोर्मेत्वादेः पदत्वं ग्रन्थयोरुभययोराश्रयणेनोन
वृत्तावप्रतिषेधात्पदत्वे रुत्वे भस्यात् इति दिक् । मद्विधायामिति पदत्वस्य सूत्रेणैव सिद्धौ विवेते तथा हि प्र
कृतस्य मतुपप्रत्यये हि स्थितमिति निर्दिश्यतां संक्रियालाघवाय द्रूपदेवावक्रियतां एवं सति तत्र
स्यावने ग्रन्थस्योविधानार्थं शिवाद्यनुलक्षे तेनाशिवात्मस्तायामिति पदत्वमेव स्यादिति नतूक्तन्य
णं शिवादिवलं इति स्वरूपस्यासिद्धये इत्युक्तनिस्तूस्वाद्यर्थं देवान् ज्ञापयितुं बोधनार्थं च । कुञ्ज्वादि
ति तत्रायंतनगणास्तूत्रम् सोऽतः एष्वपि लक्षु एवं तत्त्वविन्यस्यापि ॥ ॥ इति मनोरमायां चातु
रर्थिकाः ॥ ॥ शैष ॥ लक्षणं चेति स्यादेतत् लक्षणेनावद्यार्थं चाक्षुषादीनां तस्येदं
इति सूत्रेण श्राविदादीनां तत्संस्कृतं भक्ता इत्यनेन सिद्धत्वादयथा अधिकारोपि व्यर्थः तेविनापि रा
दीनां घघसं तानामपत्यादि चतुरर्थीपर्यन्तेष्वर्थेषु अप्रवृत्तेर्ज्ञापकबलेनैव सत्साधत्वात् तथा हि
ग्राइकामालेत्यादयो वृद्धाः तेषां वृद्धाच्छ इत्येव सिद्धे उत्कगदिष्वपाठो ज्ञापयति तेनतः प्राग्दीव्यत
यः स्पृशिति गोत्राख्येति वृद्धत्वविधिर्वारिति लिङ्गं ग्रन्थयोः सस्पृशस्यापादमर्थानभ्यूहनया गोत्रच
रणात् वृत्तिस्यैव सिद्धे किं तेन किंचापत्यादयर्थानामवश्यक्त्यान्तस्येदं विशेषणेन यावायदितत्र
यादृशस्येत्यत् नहि प्राग्दीव्यतोऽपत्यत्रेवणादिभिः सह पद्यते ययोऽच्यते नापत्यादिष्वाद्य
त्रयेण बाधिकारः किं त्वर्थसाकल्यार्थः ग्रन्थयोः संनिहितज्ञानार्थं एवं ज्ञादयः सूः भवादीनामा

शं.
१२७

ग्दीव्यतन्नित्ति विशिष्टावधिपरिच्छिन्नेष्वर्थेषु विधीयमाना घ्रणादयः पवस्तुः नतु ज्ञातादयः शेषश
ब्दात्तु सर्वेषु ज्ञातादयः सिध्यन्तीति मैवं जातादिधिकारानन्तरं प्राग्दीव्यतोविष्यादिभिः सह घादिषु
वक्तव्येषु ततः प्राक्यातसामर्थ्याद्देवार्थमाकल्पभावात् तस्मादर्थमिदं सूत्रमिति चेत् अत्रो
च्यते अधिकारस्तावदयमपकः शैषिकात्सूत्रपः शैषिकोनेतिवक्ष्यमाणस्यार्थस्य विषयालला
भोयथास्यात् शैषिकत्वमपयाकं कार्यविशेषधनायेत्रे क्रियमाणः शेषाधिकारापवस्यापयुते
शैषिकामनवबद्ध्यादित्यादि एवचश्लोकः सन्निधामतिनियेच भाष्येपठितः इहत्वसत्वेन
उपन्यस्तइति नचैवमाख्यास्यते एवास्यते विधायकत्वमपि तस्यस्ववचामिति नातीवतत्रेन भेदः
कार्यः । विग्रहीतादपीत्यादि वाचनिकमेवेदं सूत्रेनसचानस्यव ग्रहणं अन्यथावेषम्यात्स
ख्यानानिर्देशेन स्यात् । अग्निनास्तुयदृति इह बहुव्रीहिरपि स्ववचः अतएव निपातनात्कोः
कक्षावः तेन कद्वावेत्राद्युपसंख्यानमिति नकर्तव्यं पश्चिणापश्चात् पाश्चात्य इति कथं तर्हि
पश्चात्तनैः कस्तुनत्रुच्यमान इतिशेषोऽन्हर्षः नचादिग्देशवाचिनिपश्चाच्छब्देसावकाशोत्यकेकाल
वाचकात् च्यच्यलोबाधते परत्वादिति वाच्यं अग्रादिपश्चात् डिमजोति डिमचाच्यच्यलोबा
धस्यदुर्वारत्वात् सत्यं पश्चात्तत्वोति इति पश्चात्तनः इतिकथंचिद्योज्यं कापिश्याः ष्फक् ।
कापिशीशब्दात् ष्फक् स्यात् षोडीवर्थः नतारु । कापिशायनीद्राक्षेति ष्फमागमाक अथा

त्वे प्रत्यविचीददिति प्रवहस्यह्लोपः विशाह्वान् एवं मादिगणादेशः निरायथनीति इह तिरसः
पृथक्करणंनास्ति प्रत्युपसर्गत्वात् प्रतः प्रकृत्यैकाजितिनप्रवर्तते नतदाह प्रत्न्वेति ।
देवच्चन्वमिति नलिब्धात्व्यानात्मानमलदावछ इतिकारकस्यपृथक्करणादिकंस्यात्
ततस्तुदेवानन्वनीतिप्रसज्येत एवमग्रेऽपि प्रजमन्वयनीतिप्रसज्येत नचकृत्यकृत्नेतादेशो
मत्येवतत्यवृद्धिः प्रकृतिप्रत्ययावित्संनियोगशिष्टत्वादितिवाच्यं बलिंबंधयतीत्यत्राव्या
मेः नापिग्रामणीरिति प्रासिद्धत्वान प्रवर्ततेइतिवाच्यं राजानमागमयतीत्यत्राव्यामेरितिचेन्मै
वं श्रूयमाणकृतिंनत्यवृद्धेः इहचवृद्धिनोऽलसत्वात् पत्नीचकृत्यकृत्यसंनियोगशिष्टत्वात् ल
भ्यते किंचमहाजनप्रवादविषयीभूतार्थविषयकमेवैतत् आख्यानग्रहणसामर्थ्यात् ना
हशानामेवभाष्यादावुदाहृतत्वाच्च आत्रत्रत्र आययदिति पूर्वत्रासिद्धीयमद्विर्वचन इति
प्रत्ययस्यासिद्धत्वेन स्वयतीति अव्ययानांभमात्रेटिलोपः प्रकृत्यैकाजितिप्रकृतिभावस्य
देशित्यस्यैवबाधकः येनाप्राप्तिन्यायात् आनेनयोच्च असभ्यादितिणौकृतेनवेतादिटिलोपस्य
स्थानिवत्त्वात् स्वशाहृस्यद्वित्वमिति मतेनेदं वलनस्यअजादेशः स्थानिवत् अयंत्वरूहला

म० र०
२५६
256

देशः अनोऽऽगास्य हितस्येव हितत्वेनदाह अस्य ॥ स्वादिति भावयतीति इष्टस्याविडे
ति सूत्रेणेष्टनि विहितत्वादुहाभावे भूभावः नन्वायिडागमोऽपि नहि णेरस्त्विति चेन्मैवं द
ष्टवदिति समस्यन्तादुक्तेः णाविष्टवदिये समं दर्शनात् तेनेष्टनि परे पूर्वस्य यत्कार्यं त
त्तते दृश्यते नात्विष्टनोऽपि किं च यानिपदिकस्येष्टवद्भावः अपि चेत्यलभ्यते दोतिसूत्रे काश्य
हेनभावयतीति स्वमतेनोदाहृत्य बहयतीत्येकीयमतत्वेनोपन्यस्तं हृद्वत्वादयस्तु न
देवं ब्रुवन्तीति मन्यन्ते सन्नियोगशिष्टपरिभाषया यिडभावे भूभावस्याप्यभावादिति व
स्तुतस्तु इष्टवदिति कार्यातिदेशः प्राधान्यात् एवं चेष्टनि दृष्टे भूभावे सत्येव वृद्धिर्वचने तथा
च सन्नियोगशिष्टत्वाभावः स एष एव नेदं दृष्टमिति बहयतीत्यन्यद्भिन्नं श्रीमतीमिति ।
एतेन समं संचारिलर्भुवनानि तारागणानि यद्दृच्छया भिन्नपदानेऽयं श्रियामिति माघश्लोके १
भिन्नपदादिति प्रयुक्तः पादोऽपि व्याख्यातः श्रीमतीमकरोदित्यर्थात् पयसयतीति अत्रेदम
वधेयं विन्दतो लोके सन्वदित्यादिकेन अग्लोपित्वात् अनग्लोपेऽपि नेतिसिद्धान्तस्य भा
ष्यादृष्टत्वात् तेन स्वपिवणमाख्याने अससजत् पयस्विनी अपपयसत् गामतं अजग
वत् स्वजं पयस्यन्त्यादिविग्रहे अससजत् अपपयत् अजगवदित्यादि एवं च प्राचा
मुक्तानः सन्वद्भावो वेति व्यवस्थासूत्रे यदुक्तं तन्निरस्तं तत्त्वादुपेक्ष्य स्ववयतीति अत्रत

गे०
२५६

णस्याचो ञ्णितो नित्यादिः आमा अंगाद्वृण परिभाषया प्रातिपदिकाद्धात्वर्थे इति बहुलग्रहण
द्वामेतिसिद्धान्तः एवं टक्ययति यवयतो निचबोध्यं ज्ञापयतीति वृद्धस्य चेतिज्ञः सचापि
यास्थिरेति वर्षादेशेन सह विकल्पनेन दाहवर्षयतीति उक्तमिति सूत्रवरादेशो हि डिने
ति सूत्रान्तर्हत्रो माधवः कृणोतिधातुहूतोत सपवहृदिश्रदाजहार बाहुलकादिहापि
विकल्प इति तन्न दाणाय धनयत्र दाहरति वरयतिवारयतीति ॥ इति मनोरमायां नाम
धातुप्रक्रिया ॥ ॥ कण्ड्वादि । धातोरित्यत्र वर्तते वेतिनिवृत्तं तदाहुधातुभ्यो
नित्यमिति द्विधाहीति यदिहि प्रातिपदिकान्येवस्युः तर्हि यकः कित्त्वं व्यर्थं स्यात् त
द्विगुणनिषेधार्थं यदि तु धातव एवस्युः तर्हि काण्डूशब्दो नपदेन प्रकृत्यावेति सिद्धत्वे
न ह्रस्वविधानेन धातुभ्यो यकि गुणनिषेधेन कित्त्वं सार्थकं काण्डूमे ``रित्यादि वृद्धितमयो
गासिद्ध्याद्दोषे पाठोऽपि सार्थकः उक्तं च भाष्ये धातुप्रकरणाद्धातोः कस्यचासञ्जनादपि
आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः इति यत्तु प्राचोक्तं कण्ड्वादिभ्यो यक् स्यात् स्वा
र्थे इति यच्च कण्डूं करोति कण्डूयतीति यच्च नामधातुत्वाद्यक्ये हि द्वित्वप्रसङ्गे कण्डू
रेरन्तीयस्येति यत्र नदेतनत्सर्वं माकारविरुद्धम् अनेकदोषग्रस्तं च तथाहि
स्वार्थे इत्ययुक्तं भ्याकरणस्य मान्त्रहितं लभाते एतच्च व्यर्थं मन्भूतानर्थकारिणां ज्ञेनोषि

म॰
दे॰
२५७
257

वप्रकृतिप्रत्ययाभ्यां व्यापारद्वयप्रतीत्यापत्तेः कण्डूं करोतीति विग्रहोप्यसङ्गतः नच प्राति
पदिकान्येव कण्ड्वादयः तेभ्यस्तु करणे यगिति न्यासाशय उचितः धातवः प्रातिपदिका
नि चेति कण्ड्वादयो द्विविधा इति न्यासग्रन्थस्य स्वरसत्वात् अत एव नामधातुत्वादित्याद्यप्य
सङ्गतमेव धात्वधिकारात् वा धातुभ्य एव यगिति सिद्धान्तात् धातोर्लडादौ कण्डूयतीत्यादि
अनिष्टप्रसंगाच्च स्वादेः स्वादिप्रातिपदिकेभ्यो यक्प्रत्ययासंभवेन शुभ्यतीत्याद्यसिद्ध
प्रसंगाच्च यत्तु परिष्कुर्वन्ति इत्थं किल ग्रन्थाशय कण्ड्वादीनि प्रातिपदिकान्येव यक्तु
वैकल्पिकः अत एवाक्षेपानर्थे इति विगृहीतं च कण्डूं करोतीति नहि धातुभ्यो यकि
प्रातिपदिकेभ्यो वा नित्ये यकि अर्थविग्रहः संभवति एवं च नामधातुत्वादित्यादि सम्यगेव
कथं तर्हि द्वैविध्यग्रन्थमिति चेन्न इत्थं यतः ताः सेनो धातवः केवलात् प्रातिपदिकानीति
पक्षद्वयोति धात्ववयवेषु धातुपाठे गोणः प्रत्ययसत्त्वसङ्गावाभ्यां अवस्थाभेदाच्च द्वैविध्यं
न चैवं शुभ्यतीत्यादौ अतो लोपो न स्यादिति वाच्यं यकः किन्त्वेवावाच्यकत्वान्नाहुवात्त्वा
धधातुकस्यैव ज्ञापनात् अत एव द्विविधा इत्येवोक्तं न तु धातुभ्यो यगिति अत्रेदं वक्तव्यं
प्रातिपदिकाद्विधानं करणं इत्यत्र वर्तनं च नानावत्तत्रात्रगणम् त्वदुक्तपक्षे हि यग्विधेः
प्रागेव यकं विदध्यात् धातोरित्यस्यानुपेक्षितत्वात् यथान्यासपक्षे तु धातोरित्यस्य सं बं

गो॰
२५७

बंधमेव ज्ञापयति हेतुमतिच णुहृधयेति सूत्रेणैव णिच्प्रत्ययोः धातुग्रहणसंबंधस्य निर्वि
वादत्वया तदंशापातित्वे कण्ड्वादेस्तुत्रे तद्धेक्षायोगेणाभावात् प्राधधातुकसंज्ञाद्
यफलस्य यज्ञादौ निर्णीतस्य यक्यापि स्पष्टत्वात् एतेनावस्यकत्वाहाद्युवाद्यार्धधातुक
मेव वयवः किन्तु न ज्ञाप्यत इति मस्तुक्तं अप्रवृत्तस्यार्धधातुकत्वस्य विकल्पेन प्रवृत्त
धात्वाधिकारत्यागेच विपरीतगौरवस्योद्भवत्वात् यजादीनामिव यकोप्यार्धधातुकसं
ज्ञायां यतनायामसिद्धत्वाच्च नापीदंभाष्यानुगुणं धातुप्रकरणादित्यादिभाष्येणास्य ह्यव
रोधस्य स्पष्टत्वात् नापिव्याख्येयग्रन्थानुगुणं द्वैविध्यग्रन्थस्य सहृदयस्वत्यत्वापत्तेः यत्तु
व्याख्याने यगन्तः सन्तो धातवइत्यादि तदपि नयगन्ताः कण्ड्वादयइत्यस्य व्याहतत्वात्
नहिक्रमागमोयेन नद्विशिष्टः कण्ड्वादिः स्यात् कण्ड्वादयइत्यस्य तद्विशिष्टसमदायो
यइतिचेत् नहि तन्नामैकप्रातिपदिकं इतिस्पष्टमेव किंच सकलप्रातिपदिकानां वयजा
दिप्रकृतितया कण्ड्वादितरूपद्वैविध्यसत्वात् किमेषामेव विशिष्य तत्कथनेन तस्मा
द्यथाक्रममेव गुणप्रवृत्तेः यङ्गीन्तयुचितामितिदिक् । अत्रेकेचिन्मनस उपनापदूति प
देति तत्रापि मनस इत्यस्यार्थनिर्देशोनयोनमेव एवं सूर्वभाव इति सूत्रशाहोपि सूर्वेभावः
सूर्वन्तं केचित्तु मनसः सूर्वइति धातुमत्वा मनस्यति सूर्वनीत्स्तदाचज्ञः नतु मनंधातु

म० र० २५५

258

वस्तोदये समर्थितं शाब्दकौस्तुभेन्न ह्याषितं न तत्पुनरावधायेम् ॥ इति मनोरमायां क‑
ण्ड्वादिप्रक्रिया ॥ ॥ प्रथमस्यान्तपलक्षणं अज्ञादेस्तु द्वितीयस्यान्तपदोध्यम्
यद्येषामितितत्तन्नहेयामनामधातत्वस्य निराकृतत्वात् अत एव सूलकण्ड्वादयो नामधा
तवश्चनोक्ताः किंतु नान्नमाध्यप्रयोगे वोक्ताः यश्च तत्तन्नामधेयपादोऽत्र इष्यते अधः परस्यैव
ति हेतुमत्सिच्चाकरणेऽकृत्यादिनमेनत् यच्चेतन्नास्तीति आदेशो यः सकारस्तस्य षत्वश्र
के यथेत्वादेशस्यावयवत्वान्नत्वादेश इति भावः ॥ इति प्रत्ययमाला ॥ कर्तरि कर्म ।
परस्परकरणमपि कर्मव्यतिहारः संप्रहरन्ते राजानः कोऽयं ग्रहणं तु सार्थं व्यतिलुनति
यच्चरत्वाभावात्र षः व्यतिसर्हत सान्यदाद्योरिति षत्वनिषेधः एकदेशविकृतत्वादेन
प्रत्ययमात्रस्यापदत्वात् । नगतिहिं० । प्रभ्वः कर्मव्यतिहार आत्मनेपदेन हरन्तेरिति ।
अर्थग्रहणमसमर्थ्याद्दिग्येशाद्दानरानिरपेक्षाया वर्तनेर इति न तस्याये प्रतिषेध इति वार्तिके
नारम्भणीयमित्याहुः कथं तर्हि ननः संप्रहरिष्यन्तो हस्ता कर्णधनञ्जयाविवेति अत्राहुः
योत्स्यमानाविवेति विवक्षितं तत्र कर्मव्यतिहारः वहे स्त्वनायं निषेधः अगत्यर्थत्वात् प्रा
पणोहिवहेरर्थः गतिप्रतीतिस्त्वावेपात् । इतरेति । लौकिके शब्दव्यवहारे लाघवं
प्रत्यनादराद्दितेन गादेशाद्वहः व्यतीत्स्यमसंगौ चकर्मव्यतिहारो यत्र तत्राप्यसत्त्वोघ्यते तथा

शं० २५५

त्मनेपदमपि सङ्गच्छते इत्येनेति निषेधोऽयमारभ्यते संयोगादिनियमेनोभयतोऽयतन्त्रवदृश्यमि
त्यत्र तत्करणविनिमयेऽस्त्यपि क्रियाविनिमयस्याविवक्षितत्वान्नतङ् । नेर्विशः । क
थं न्यविशतेति अडागमव्यवधानात् न च स्यादिङ् मध्यवर्त्यपि क इति वाच्यं अङ्गभक्तस्याटो वि
करणत्वे प्रत्ययावयवत्वेऽपि धातोः प्रत्ययानवयवत्वात् सत्यं तावस्यायामडितिभाष्यमतेनाव
यवकारिद्विहोषः मतान्तरे तूपसर्गनियमेऽप्युपलक्षणमात्र उपसंख्यानमिति वार्त्तिकमस्तीति दिक्
ग्रन्थवत्तु ग्रहणपरिभाषया लक्षणप्रतिपदोक्तपरिभाषया वा नेरुपसर्गस्य ग्रहणं तेनेह न
मधूनि विशन्ति भ्रमराः कथं तर्हि दृष्टस्त्वा मैथिलीभर्त्तेवके निविशन्तो भयादिति अत्रा
निविशन्तो मिति पठनीयमित्याहुः घञन्तरगेहृणानुक्तं पदसंस्कारपक्षाश्रयणादटेरोष
इति तत्र पदान्तरसमभिव्याहारे सति नियमप्रवृत्तेरुक्तत्वात् ग्रन्थयोजकस्यैतदसमञ्जसं
मान्याधिकारेऽप्यपि लक्षणारीत्या प्रथमपुरुषबहुवचनेः वालिस्थायामित्यादेवैयर्थ्यापत्ते
श्चेति दिक् । प्राङ्तोदोः कथं तर्हि व्याददते विहगाः पतिङ्गस्वकीयमिति क्रत्वभिप्राये भवि
ष्यतीति पदेन त्रवत्व्यादादयस्यापि तीव्रस्य स्वस्याव्यवस्थ इति न्यासेन प्रयोगादिति प्रत्यभ
वपरीतायां वाचस्याविप्रयोगोपिष्याख्यानः प्राङोऽहिशिष्टस्य ग्रहणात्तङ् । भिक्षामा
ददाति प्रश्नस्तनावाकारद्विनिह्नवदतः पदेन प्रतीकमाददानोऽति विवरणग्रन्थोव्याख्या

म॰
२॰
१५५
259

नः । सिद्धेर्नि॰ । सिद्धविपर्ययोपादानेन न्यायस्यानेहग्रहणं प्रवृत्तत्वेनादेव सिद्धत्वात् किं
तु शाकैः मन्त्रेष्वस्य प्राप्तेः सोमेनेति नत्वेतदाह धत्रविषय इति नियमार्थमिति नचैवं नो
थ्येन रज्जुदानेत्वं यथार्थमिति बाध्यं नस्यतानाधन इति यत्त्रार्थत्वात् मातरज्जु इदवनीति सोहृश
मात्रमिह विवादेन तत्र प्रकारता द्योत्य शापउपालम्भे कथं तर्हि नीचैः प्रतिप्रणोहृते
त्तकर्मणि येण सत्यैः शपामि यदि किंचिदपि स्मरामीति प्रत्याङ्ः स्वाशयप्रकाशयामीत्य
तावदिह विवक्षितेन तत्र शपथ इति । प्रकाशन॰ । स्थेयो विवादपदनिर्णेता तस्मिन्नेस्थितौ
निश्चत्वात्रैः बाह्यल्यकादधिकारणचोद्यत । उदोनू॰ । उत्पूर्वान्निष्ठेनेरहधेपारिस्पन्देवते
मानादित्यर्थः इह पारिस्पन्दस्यानुद्धत्वे नामोपरि देशसंयोगफलकत्वाभावः यद्यप्युद
नूर्ध्वकर्मकेऽपि क्रियावाचकत्वेलभ्यत एव तथापि परिस्पन्दार्थतालाभार्थं कर्मपदं तदे
तदाह इहायामेवेति । समो गम्यृ॰ । हो विकारस्य समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदि
भ्य इति पठित्वा इत्येतदुपसंख्यानमाह तत्र वार्त्तिकात् पूर्वो भङ्गः केषांचिदेव सूत्रप्रक्षेप
इत्येव वर्तिकारे बीजाभावात् श्रुतित्रयानुसारिणो तद्रूपत्वे योगविभेतेति भावः श्रमेसरा
च्छतीति कथं तर्हि तच्चैवं संगच्छेतेति प्रार्थित्वात् यद्वा वचनात् वर्णादिभ्यः स्वार्थे ष्यञ् पके
सपाद्यतेत्यर्थः विदिरेरेवेति परस्मैपदिभ्यो साहचर्यादित्यर्थः विदेतर्हि स्वरितेत् सतो

ऊ॰
१५५

विचारणार्थो योऽस्त्वत्र तद्वेत्स्वादेव सिद्धं । श्रद्धधोत्यिति लुग्विकरणोऽत्र शासिना सहचर्यो
दिति भावः । गंधने हिंसेति गंधप्रहेने प्रहेदिं सायामिति चुरादेणपाठादिति भावः सहसाव
र्तते साहसिकः ओजःसहोंभसा वर्तते इति ठक् न स्यकर्मसाहसिकं यस्य नटेतदाह तेष
सहसेति नचैवं परदारानिति कर्मणोनन्वयः शंक्यः साहसिकस्य प्रयोगोपाधित्वात् धा
त्वर्थत्वव्यभीकरणे पयोदकस्येति पयश्चोदकं च पयसं समाहारः यद्वा पयांसि चोदकं चे
ति विग्रहः उदकपर्यायो दकस्य राद्याप्यस्ति तथा च हलादौ फलः श्रापस्तोयं जीवनं समपयः पुष्क
रं मेघपुष्पकं पानीयं सलिलमुदकं वारि वाः शंबरं च अर्णः पाथः कुशं नलवनं नीरं मेघ
नीरं सर्वतो भुवनमसृतं जीवनीयं दकं चेति । अभिभवे चेति येत्वभिभवे छंदसीति प
ठंति तेषामपि छंदसीति प्रायोवादः निरुद्धवत्रः मानवकमुपनयनं इति विनिमंत्रवेने ग
र्वोग्रहोपियेदस्यचलयामायकरणस्यविधत्तितत्वान्नतः इर्षितलादितिभाष्योक्ते इर्षेणे
लोभसिपत्तुरपादः नचोक्रमसर्वविकायांव्यासोकामिरेरुधः कथंतर्हि नभः समाक्रामति
चंद्रमाः क्रमादिति आमि मात्रमिह क्रमेरर्थो न तु क्रमणं तन्नोनतं । प्रोपाभ्यां । उपक्र
मन इति उपपराभ्यामिति तनेहप्रवर्तते वृत्त्याद्यर्थाभावात् प्रमाणं भाष्यमेवेति न च वृत्त्या
दिसूत्रे सोपसर्गे चात्मनेपदार्थमिदं तु भयत्र विभाषा वाच्येति वाच्यं उपपराभ्यामिति नियमस्यो

म॰ र॰ २६॰ 260

क्त्वात् छत्रवदस्तेकाडः कलापस्येति छत्रसादृश्ये तेन कलापस्येति तृतीयार्थे योगे शेषल
क्षणा षष्ठी । समः क्ष्णुवः । संक्ष्णुवीत रते क्ष्णौतेर्योऽनेन कृत्रादित्यर्थः । दाणः भाष्ये त्विदं
क्ष्णोत्यर्थमाख्याते तथाहि ग्रेदास्यामहं भुञ्जानः तथा दत्तं स्वयं भुङ्क्ते स्वयं च तस्मै ददातीति त
त्राघं प्रयोगद्वयमिति तत्र च सहप्रयुक्ते तृतीयायाः कर्मव्यतिहारो वेति दानपूर्वके भोगे दाण आ
त्मनेपदमिति बोध्यं यतेन कर्मव्यतिहारोदाहरणेऽत्र व्यतिपाहप्रयोगः प्रावश्यक इति भाष्यतः
प्रयुक्ताः सम इति षष्ठीति दास्या संयच्छते इत्युदाहृत्य विशिष्टव्यवहारेण ब्राह्मणीभ्यः संप्र
यच्छतीति प्रत्युदाहरणं भाष्यकारेणोदाहृत्य व्याख्यानेऽप्रमाणं । उपाद्यमः । स्वकरणे स्वीकारे इ
ति यत्तु प्रवृत्तिस्थाने नोक्तं पाणिग्रहणं विवक्षिते नेह परभार्यामुपयच्छतीति दासीत्वेन स्वीकरो
ति इत्यर्थ इति तच्छाब्दविरुद्धं तत्र स्वीकारमात्रे आत्मनेपदस्योक्तत्वादिति भावः तथा च
भाष्ये प्रायेण उपायंस्त महास्त्राणीति । समः । समो गम्यृच्छिभ्यामित्यतो विच्छिद्य पादः
सकर्मकादपि विधानार्थ इति धनयज्ञदाहरणेति भुञ्जे पृथिवीं पाल इति इहेति उपभोग
इत्युपलक्षणं आत्मसात्करणस्यापि इह च तथादेवग्रहणं अनवन इति प्रतिषेधात् ।
संयोगो विप्रयोगस्तूपक्रमस्य विशेषस्यैतिह्येन वदन्त्यभियुक्ताः तत्र भवबलेन च संप्र
योगविप्रयोगस्यापि विशेषावधारणोपायत्वात् तेन भुजो कौटिल्ये इत्यस्य तदादेः परस्मै

श्री॰ २६॰

पदमेव विभजन्तिपाणिनिं । णेराणौ । इहस्यादित्यनेन णेरितिनिव्याख्याने ग्रणौ यत्कर्म णौ
चेदितिभिन्नवाक्यं कर्मशब्दः क्रियापरः कर्तरिकर्मव्यतिहारइतिवत् तदेतद्व्याचष्टे ग्र
णौक्रियायासैवचेदिति सर्कमैवाकान्तरं ग्रणाविन्यादि चेद्ग्रहणमिहानुवर्तते कर्मण
इहस्तुकारकविशेषपरः शाब्दाधिकारस्तुग्रणान्तदेतद्व्याचष्टे ग्रणौयदित्यादिना ग्रनाथा
नर्थक्यंशेषव्याचष्टे नत्विति इहप्रसज्यप्रतिषेधोनानीवर्ज्यनीतिव्याख्यानेः नत्वनञ्याभिनि
निवेशस्य पर्युदासस्यन्यायत्वात् लद्व्यविसंवादाभावाच्च पूर्वविप्रतिषेधेनेति ग्रत्रचग्रमा
णं दर्शयतेराजेतिभाष्योदाहरणं नत्विह ग्रणावकर्मकादितिप्राप्नोति निवृत्तप्रेषणात्वेना
कर्मकत्वादितिभावः नन्वेनमन्तूनकर्मवत्कर्मणेत्यनेनैवगतार्थमित्याशंक्याह कर्त्रस्थे
ति ग्रपरिस्पन्दसाधनसाध्योभावः सपरिस्पन्दसाधनसाध्याक्रिया नत्रकर्मस्थभावके ग्र
कर्मस्याक्रियेग्रचकर्मवदितिदेशः प्रवर्तते नत्वनयोश्चेतिसिद्धान्तोपक्षनइतिभावः नत्रक
र्तृस्थभावकमुदाहरति पश्यन्तीत्यादि ज्ञानविशेषविषयत्वापत्तुपसर्जनविषयत्वापाद
नवचनोद्दिशः सकर्मकाणामेषामुदयाभिधायिनोपा ग्रावश्यकत्वात् धात्वर्थान्तव्यापारा
श्रयः कर्ताव्यापारविधिकरणधात्वर्थफलशालिकर्मेतिसिद्धान्तात् तदेतदाह चा
क्षुषेत्यादि येरणेति सौकर्यविवक्षयेतिभावः पश्यन्तिभवत्रमितिकर्तरिलट् उक्तंच ति

म॰ टे॰ २६१
261

हेतुप्रेषणं कर्मस्थक्रियावयवेऽस्यितं निवर्तमाने कर्मत्वे स्वकर्तृत्वेऽवतिष्ठत इति इष्टकर्मैव
स्त्यतिदेशस्याप्रवृत्तेः कर्मकर्तरि यथा यस्य शवाद्यस्तेन शुद्धेन कर्तृत्वोद्भूतत्वं ननु इति
विषयत्वापत्तिमात्रहेतुत्वे द्वितीयोरित्यर्थः तुल्ययोरिति विषमयोः प्रेषणप्रतीतेः समो धुरन्तरव्या
गादिति भावः तत्र तृतीयेति आद्यद्वितीययोस्तत्रापि तत्त्वाभावादुक्तिसंभव एवं नास्तीति भा
वः । क्रियासाम्येऽपीति प्रथमकल्पया सह इति भावः द्वितीयामादायेति अर्णायाः क्रिया
सैवचेदित्यस्य न्यूनाधिकभावव्यवच्छेदपरत्वे इष्टेऽबाधे अधिकव्यवच्छेदमात्रपरत्वेन य
यममध्यादायन संभवात् कर्तृस्थक्रियत्वेऽदाहरति एवमित्यादिना । इत्थं निवृत्तप्रेषणा
मक्रियोत्पत्त्याय अध्यारोपितप्रेषणो मक्रियामाह यद्वेति हेतुत्वारोपादिति अत्रापि सो
कार्यविवक्षैव बीजं प्रेषणारोपाग्रनेव प्रेषणानारोपेणापि सौकार्यप्रतीतेरत्रभवा सि
द्धत्वादिति भावः । अधःप्राग्वदिति उदाहरणान्तरयोस्तु रमकत्वयोः पक्षद्वयेऽपि प्रेषणा
राभावाभावादिति भावः । आधिक्यादिति आस्मिन्पक्षे णिचेत्याक्रियेत्यनाधिक्यमात्रे च्छि
द्यते न तु न्यूनत्वमपि अन्यथा तृतीयकल्पायामपि न स्यात् प्रकृतस्तु पात्रप्रेषणांशाग्रे न
न्यूनताधौव्यादिति भावः णेरिति किं आरोहतीति निवृत्तप्रेषणान्माभूत् न च णेश्चेदिति ग्रं॰
वाक्यशेषे श्रुतत्वात् णेरेव भविष्यतीति वाच्यम् आगाविन्यस्यापि श्रुतत्वात् किंच उत्तर

रार्थमवधेयं णेरिति वाच्यमेवं नदीहेव स्यादृष्टार्थमुक्तं अणौ यदित्यादि चेदित्युक्तं किं प्रथमा
रोपितप्रेषणापेक्षे द्वितीयकक्षायामाश्रित वाक्यार्थविलय इत्येतच पक्षायुदाहृते
कर्तृत्वाश्रितत्वात्तिलवनपत्यर्थोउदाहृताः प्रथमस्या द्वितीये इत्यत्रेणैव निवारिता द्विती
यस्या द्वितीयाया द्वितीयेनेति संग्रहः यत्तु माघकाव्ये करेणुरारोहयते निषादिन इमे
ति नान्यश्च स्मृतिसिद्धम् तत्र प्रकृतसूत्रस्य विषयः प्रथमारोपितप्रेषणा द्वितीयकक्षा
रूपत्वात् एतेन समं तत्त्वं दर्शयते भवतस्मयः स्मृताधिपत्यामिव साधुबंधतामिति व्या
ख्यातम् बंधता तं पश्यति सतो दर्शयति यद्वा बंधता स्मृताधिपत्यामिव लोकः पश्य
ति सतो दर्शयते उभयथापि णिच्स्तुत्यर्थेन नतु प्रकृतसूत्रेणेति दिक् अत्रेदमव
वधेयं कर्मशब्दोऽत्र क्रियापर इति व्याख्याकारैरुक्तं यद्यपि नोक्तं आचार्येणाप्यत्र सर्वे
षिप्रायेणाशिथिलादिना इति तत्त्वावाहृतं किं वित्यवानं तत्स्यतानुषेः तथाहि इह सू
त्रे अणौ यत्कर्म णौ चेत्स कर्मेति कर्मान्तरानिवृत्तिः क्रियते नत्वणौ कर्मणोऽकर्म
कत्वप्रतिपाद्यते सकर्तृत्व वाक्यान्तरेण तस्यकर्तृत्वप्रतिपादनात् एकस्य कस्याश्चित्क्रिया
यां कर्तृत्वकर्मत्वासंभवात् न चैवं दर्शयते भृत्यानिति भाष्यविरोधः भृत्यरूपस्य कर्म
णः सत्वादिति वाच्यं अणौ यत्कर्तृकर्मणीति द्विकर्मक प्रदासनेत्यर्थात् अत्र चोक्तं

म०
र०
२६२
262

भाष्यस्यैव प्रमाणत्वात् एवं च स्वयमेतेन नवग्रन्थः स्वयमेवेति कोकिलस्य कर्मत्वोपप्र
न्नस्योदाहरणं यजति हन्तीनामवलक्ष्येनोक्तं तच्चोद्यस्य व्याख्यातृभिः परिहृतं कर्तरि कर्म
त्वतः कर्तरीत्यत्र सूत्रे प्रथमयाविपरिणम्यते यद्वा यद्भुयादिति नपुंसके नैत्यकशेषः
तेनाणौ कर्मकर्तृणौ कर्मत्वेप्यदोषः एवं च करेणुरारोहयते निषादिनमिति मात्रप्र
योगोप्युपपद्यते इति एतेदेवजाव्य एवं वर्ण्यमानेऽपि घटादीनां प्रकृतसूत्रस्य भाष्यवा
र्तिकयोः सर्वं एव विरुध्यते आरोह्यमाणो हस्ती स्थलमारोहयति मनुष्यानि
त्यत्रातिव्याप्तिशंकायां मनुष्यानिति कर्मणः सत्त्वान्नातिव्याप्तिरिति हि प्रथमग्रन्थस्यैके
षिते कर्मकर्तृत्वान्नेदमिति शंकायां यृद्धुणो निहृत्यर्थे नियमोयामिति द्वितीयग्र
न्थस्यैके कर्तृस्थभावकार्थोऽयमिदं सूत्रमिति नन्वत्र तृतीयप्रश्नेहके नत्राद्यो विरुद्धः मनु
ष्याणां कर्मणः कर्तृत्वात् द्वितीयोऽपि विरुद्धः तत्कर्त्रीत्याकर्मवद्भावस्यैवाभावात् कर्मव
त्कर्मकाणामिति हि वार्तिकं अतएव वत्नीयोपिन तथाचोदाहरणस्य विसृतिरेव स्यात्सत्या
पतनीति महानयं महतां मोहप्रमादः किंच कर्मान्तरनिर्हितप्रसक्तवाक्यस्य निष्फल
त्वमेव स्यात् उदाहरणालाभात् नह्यण्यन्ते एककर्मणि नद्विकर्मणि संभवति अ
टनेन व्याख्याने तु यदपि जयादित्येनोक्तं यत्नग्रहणमनन्यकर्मार्थं आरोहन्ति हस्तिनं

गो०
२६२

हस्तिपकाः आरोह्यमाणो हस्ती स्थलमारोहयति मन्त्रव्यानि निर्णीत्वे नैकां स्थहीत्वा
यानच्याहृत्यन्तरं तस्य णेरभावे कर्मणो हस्तिनएव तिद्धक्तनिष्ठ्न्नएव नार्थे कर्तृत्वादि
ति तस्याशयः तदपि न प्रत्यासन्नेव गतत्यर्थत्वात् तथाहि द्वाविह णौ चैतन्नाद्ये कृत्तमे
वात्मनेपदं आरोह्यमाण इति द्वितीयत्वे णौ कर्मणः स्थलस्य णौ कर्तृत्वाभावात्
प्राप्तिरेव नास्ति यदपि हरदत्तेनोदाहृतं आरोहन्ति हस्तिनं हस्तिपकाः तानारोह्य
ति हस्ती तिनदपि न पतञ्जल्यारोपितप्रेरणापत्तस्य द्वितीयकल्पाया द्रूपेन तत्र च समा
नक्रियत्वमेव नास्ति एण्वाव्यापारान्तरोपादानात् ततः किमिति चेत् स्वग्रन्थविरोध
इत्यवधेहि णौ चेत् ग्रहणसमानक्रियार्थमिति हिजयादित्यग्रन्थः णिजन्तकृत्स्नपात्र
क्रियायामेव यथा स्यात् प्रयोज्यप्रयोजकभावलक्षणेपि क्रियाभेदे माभूदित्येतद
र्थं णौ चेदित्यत्र ग्रहणीयादित्यत्रवक्ष्ये ग्रहणीयत्वानिपाद्ये वक्तृणौ चेत्रदेव प्रतिपाद्यमि
ति व्याख्येयमिति हरदत्तग्रन्थः तत्र चैतन्नैवगतार्थत्वात् यत्संग्रहणमनन्यकर्मार्थ
मिति जयादित्यग्रन्थस्य तद्व्याख्यानादेयेष्यानो चानिर्विशेषणतया स्पष्टैव यदपि जयादि
त्येनोक्तं कर्त्रेतिकिं आरोहन्ति हस्तिनं हस्तिपकाः तानारोहयति महामात्र इति
तदप्येतेनप्रत्युक्तं यत्र हरदत्तेन कर्मानरसंभावादेव न भविष्यतीत्यादि विचारितं त

म. र. २६३
263

हृषेर्वा ङ्करोत्योराहरणस्योक्तिसंभवादिति निरुक्तं यत्तु प्राचां ग्रन्थे ण्यन्तकर्मसम्पव ण्यन्तस्य
कर्त्ता चेदित्येकवाक्यतयैव व्याख्याते तत्र ग्रन्थारोपितप्रवेशणौ द्वितीयकल्पायामिति निर्ध्य
मेः यद्यपि प्रमादलक्षणाण्णौ यत्कर्मन्यादि त्वयैवान्यत्र यत्किञ्चित्वाज्ञयादि तत्पक्षे यदाहि समताऽत्र
मात्रेणैव मूलग्रन्थोपष्टम्भो नीतस्तथापि मूलारूढ्यासंबोधशुद्धिहेतुर्निवारैव यदपि प्रसादात्
ग्रन्थोपमर्दनेन । प्राचां ग्रन्थव्याख्यातृणां प्रौढिः ण्यन्तवृत्तेः समानक्रियायामिति वा
क्यार्थभाष्यकारेणानाश्रितः प्रयोजनाभावात् तथाहि ण्यन्तादात्मनेपदं भवति ण्यन्ते
त्कर्मणो चेत्स कर्त्तेत्युक्ते प्रत्यासत्तेरेतत्सम्पन्ने येनाणौ चाण्यन्तादात्मनेपदविधित्सितं
तेन वाणिचाप्यते तत्पक्षान्तिमहेतुधातोर्यत्कर्मसम्पत्तव कर्त्तानास्मिन्नेवण्यन्तत्विति न
तत्र यथा रोहति हस्तिनं हस्तिपकाः आरोह्यमाणो हस्ती भेतान् सेचयति सूत्रेणान्यत्र
धात्वभेदे न भवति एवं प्रयोज्यप्रयोजकाभावभेदेऽपि न भविष्यति तत्पतदात्मनेपदवाक्या
र्थोऽभाष्यानादृतत्वेनाचार्यैरनुपेक्षितः सम्पन्नण्यन्तस्य कर्त्ता चेदिति एकवाक्यत्वस्यैव
प्रतीतेः स्वारसिकत्वात् एवं चाध्याहारव्यवहितान्वयकल्पनाभ्यां वाक्यार्थद्वयोप
वर्णनेऽप्युपपन्ने प्राचां क्रमनादेयं ग्रन्थेऽकानेककष्टकल्पनापत्तेः नचात्र पदेनाणौ चेत्
हणौ व्याख्येयम् प्रमत्ति हि तस्मिन्नणौ यत्कर्मस कर्त्तेत्याकारकेकवाक्यतयैव संबन्धः स्यात्

ऊं. २६३

तस्युकर्मान्तरानिवृत्तिर्नकृतास्यात् अतःकर्मान्तरनिवर्तकवाक्यभेदापादकं णोचेत् यद्ग्रहण
मावश्यकं कर्तव्यं अतएवत्वत्कार्यं भाष्यकारेणनाश्रितमित्यासेदम् भाष्यस्यानेकर्मणःप्र
नोक्रियापरत्वे कर्ता चेद्वितिवाक्येनकारकपरत्वं इत्याश्रित्येव भाष्यव्याख्याया उचित ।
त्वात् अन्यथा सूत्रसमाप्तिपर्यन्तं सकलस्यभाष्यग्रन्थस्यासंभवद्गतिकत्वापत्तेः यदुक्
क्तं प्रयोजनाभावादित्यादिनभविष्यतीत्यन्तं तदनिरभसात् अध्यारोपितप्रकरणोऽहि ग्र
णो इहलोकसंनत्रैवगौणत्वकार्तेतिस्पष्टम् ततस्तुकथमत्यासत्ता तद्ग्रहणं कृतत्व
स्य प्रयोजनप्रयोजकाभावभेदः नत्राणिजन्याधिक्यं ब्रूमहेतिचेत् किंततः नह्येतावता
णोकर्तृणां कर्मत्वंगतेनदृष्टान्तस्थानिविषमः सहिंसितचप्रकृतिकयोर्णिचोरसत्त्वभेद
त्वात् यदप्येकवाक्यत्वप्रतीतेः स्वाभाविकत्वादिसमुक्ता कर्मान्तरनिवर्तकवाक्यभेदा
पादकं णौचेद्ग्रहणमित्युक्तं तदपि परम्परव्याहतमिति स्पष्टमेव अगत्यानन्तर्यं कृत
मितिचेत् नतस्यानिष्फलतया उक्तत्वात् केयटाद्युक्तरीत्यानेवब्रूमहेतिचेत् प्रमाद
कारोपि नहिंजयादित्यान्यामकारहरदत्ताद्युक्तरीत्या स्थूलग्रन्थसंभावोऽहितिकिंतेना
पराङ्मुख तस्मात्कैयटप्रभृति अर्वाचीनपर्यन्तं सर्वेषां ग्रन्थानां हानिशैथिल्यापत्ते इति
स्थितं निष्कर्षस्तु अनिक्याग्रवबोधनस्कृतनएव स्यादेनन कर्मकर्तरिस्लसोदाहरणानि

म.
र.
२६५
264

कर्मवज्ज्ञापकता कर्तृस्थभावात्क्रियत्वाज्ञेति सिद्धांतयतोरं भाष्यकृत्स्यादिति कर्मैसिद्धं एवं
च उदाहरणप्रत्युदाहरणयोः कर्मकर्तृस्थावश्यकतया भाष्यकृत्स्यादिष्ठ कर्मप्रयोगो
ऽपपन्नः हरयते चमः रणोयते ऽम्बृत्याज्ञाज्ञते भाष्ये स्मरयत्येनं वनगुल्मः स्वयमेवेति भा
ष्यकृतोक्तस्य कागतिरिति चेदत्राह शुविवक्षितं नमिह कर्मेति तेषामयभावः गंभीराया
नद्याः घोषः इत्यत्र गंभीरनदीपदार्थयोरभेदबोधानंतरं तीरलक्षणायामपि प्राथमिकबो
धमादाय गंभीरपदस्यार्थैकदेशेऽन्वयो ऽप्युपचारोपि तस्य तावद् द्वितीयकक्षायां कर्मैव
त्वेन नत्रोणिजंतस्येव कर्मत्वोपचारोपि च। कर्मपदस्य च प्राथमिकबोधमादाय साधं
कं स्वत्वाख्यसंबंधोलक्षणेनाभ्युपगमात् ख्यातस्य चेह विशिष्टवाक्यार्थरूपत्वात् पौ
वचाधिवादेः प्रामाणकरूपलक्षणायोगातिः सपर्यमिज्ञानां वाक्योपायः स्वायत्तेन शाद्ध
प्रयोगे कर्मवितिष्ठक्रमेव प्रयोक्तृशुविवक्षितमिति दिक्। भूत्पादीनां परित्यागाद्भृशभेदप
तिग्रहात् कर्मवाक्यस्यानादृत्योऽभ्युपगतावित्तरेतराधीः सर्वे चेदं मूलपदवधीनतम्। प्रकृ
तमनुसरामः। स्मरति वनगुल्मस्येति स्वत्वानि विस्मरयत्येनमिति भाष्यकृतो ऽप्रयोक्तृत्वा
त्तु प्राथमिकबोधाभिप्रायेणैतत्कर्मत्वमद्यधारोपितपदत्वपद पदांतरेकोविलस्य
कर्मत्वासंभवात् यद्यपि गतनवृद्धेतिसूत्रे ज्ञानसामान्यार्थकानामेव ग्रहणं स्मरतेनेवेह

गो.
२६५

विशेषणाच्चिन्त्यादणौ कर्तुः कोकिलस्य तत्रापि कर्मत्वं लेभे तथाप्यनेन ज्ञापकबलादेव
गतिबुद्ध्यादिसूत्रे स्मरतेरपि परिग्रहो बोध्यः । मिथ्योपपदात् । इह करोतिरभ्यासार्थ
त्वादकर्मकः एवं तदुच्चारणार्थत्वे सकर्मकः । स्वरितञितः । ञ्वरितेञित इति टोके
णादिकं तन्नयागफले उक्तं हि हरिणा यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः तत्प्र
धाने फले तेषां तल्लाभात् प्रयोजनमिति पचादिकः केचित्तु प्रयोजकव्यापारद्वन्द्वेभ्यो
धातुभ्यः तद्योतकमात्मनेपदमनेन विधीयते यजते कारयतेत्यर्थः कारयते इत्यत्र
तु प्रयोजकव्यापारद्वयसमर्थः णिजन्तात्सिच्चि यथाकर्त्रभिप्राय इति सूत्रेणापि कर्त्रप
दस्य हेतुकर्तृपरत्वाद् ज्ञापार्थेनाप्यर्थकम्पदेत्याहुः उक्तं च हरिणा क्रियाप्रवृत्ताव्याख्या
ताकैश्चित्तदर्थप्रार्थना प्रसत्तौ वासत्तौ वापि विवक्षितनिबन्धना केषाञ्चित्कर्त्रभि
प्राये णिचास्य विकल्पत्वे आत्मनेपदमन्येषां तदर्थोपहितं नियेधा क्रीणीष्वपचनेध्वे
चिनोति चिन्तनेऽपि च आत्मप्रयोगाद्र्पणेनेयेष्वेवार्थेऽभिधीयत इति प्रसत्तौ वेत्यनेन क्रम
लवनोद्घाटनं कुर्वन्नेय इत्यादयः प्रयोगाः समाहिताः तत्रापि स्वार्थेनाविवक्षायां सम्भ
वात् एवार्थस्य वाचकत्वे द्योतकत्वे वात्मनेपदमिति मतद्वयं संगृहीतं केषाञ्चिदिति श्लो
कः चिनोति चिन्तन इति संहतानि संग्राहयतीवेति क्रमेणार्थः । णिचश्च । प्रवर्कश्च

न लक्षयतेः स्वरितेत्त्वकरणाज्ज्ञापकात् चुरादिणिजन्तादात्मनेपदं नेति मन्यते प्रा
हुश्च स्वरितेत्त्वस्यानुवृत्तिः कृतादिलक्षणैकः चुरादिरिति नवीना इति बहवः चन्द्रोऽपि णिजभा
वपक्षे स्वरितेत्त्वं चरितार्थमित्याह मैत्रेयादयस्तु स्वरितेत्त्वमनाकरमित्याहुः नवीनास्तु
वेह स्वरितत्वोऽपि संजयाह एवं विधिने चुरादिणिजन्तात्स्यादेव निकस्तु न निष्प्रयोजनेस्य प्राम
वचोऽत्र न कैश्चन दृष्टः लक्षयतेः स्वरितत्त्वमनार्षमिति । समुदाङ्भ्यः । आङ्पूर्वस्य वच
ने सकर्मकार्थम् अकर्मकेऽप्याङो यमहनः इत्येव सिद्धे । अग्रन्थ । अकर्मकात्त्वन्यत्र सि
द्धे वचनमिदं सकर्मकार्थमिति ध्वनयन्नुदाहरति गाजाने नेति ॥ इति मनोरमाया
यामात्मनेपदप्रक्रिया ॥ परेऽहृषः । योजनादिकस्येति सहितस्वरितेत्त्व शाकटाय
नमतेत्त्वत्वदीयेन उभयथापि न्यायमेवेह ग्रहणम् । उपाच्च । सकर्मकविषयमिदं
उत्तरसूत्रानुरोधात् अतएवाह यज्ञत्वमिति । बुधयुध । इहप्रुद्रुस्रूणां गत्यर्थानां चल
नार्थे त्वदर्थे ग्रहणं चलनेऽप्युत्तरसूत्रेणैव सिद्धं निगरणं निगरणभक्षणं अदेः प्रतिषे
धार्थे पतञ्जलिनेष्टोऽतिसूत्रे भाष्य उक्तं सूत्रेऽभिहितेऽस्य स्थले योजिते यथाकथं निघो
यनानामचकोराजिज्ञासाकण्ठादिदेतन्मात्रिचन्द्रचन्द्रिका इमां कि माचामयसेन वत्स
यो चिरं चकोरस्याभवन्मा वस्तु स्पर्शो इति निष्ठोऽहृषः आङ्पूर्वोऽत्र मेरनेन परस्मैपदोऽचित्या

त्र मन्ये आचामयतीति लोके तं हित्वा किमाचामयतीति व्याख्येयं अस्य श्रीर्ई लक्ष्मीस्तया सह वर्त
मानासेः तत्संबोधने हे से सलक्ष्मीके इति मयेतीत्यर्थः । अणावि० । अणौ किं आरोहय
मारोप्रयोक्ते आरोहयते णिचणाविति सूत्रोदाहरणत्वेन योः कर्मकत्वेन निर्णीतः तस्मा
द्वितीयणौ माभूत् सोहि णावकर्मकः न्याभवतीत्यर्थपर्यवसानस्याज्ञातत्वात् केचित्तु खा
द्येणिचनाद्वेतमस्माविन्यस्य प्रत्युदाहरणमाहुः तन्नाध्यादिविरुद्धं तथाहि बुधादिसूत्रा
दिह णौ चिन्वत्र वर्तते बुधादिभ्यश्च हेतुमति णिचि चेवसंभवतीति तद्वेनाद्वेवायं विधिः अणाविति
निषेधोपि प्रत्यासत्त्या तस्यैव न्याय्यः तेन बुधादिणिचनाद्वेतमणौ परस्मैपदं भवत्येवेति भाष्या
द्वोध्यते अतएव चेतयमानं प्रयोक्ते चेतयत इति केषांचित्प्रत्युदाहरणं ह्टिन्त्युक्तं तदाहोपेक्षितं
न तु चितसंचेतनन इति बुधादिष्वाकृस्मीयो वार्तिकबोधः यत्तु न्यासकारहरदत्ताभ्यां व्याख्यातं
चितीसंज्ञाने बुधादिरकर्मक इति तदनित्रभमात् एतेन ह्रूपयते इति विनिपातः प्रत्युदाहर
णे प्रत्यक्षं ह्रूपह्रूपकरणे बुधादिः ह्रूपात्यस्य कर्मणोधात्वर्थेऽन्तर्भावादकर्मकः ततो हे
तुमति णिचि ह्रित्रिकारह्रूषितेन चेतयतेस्त्वनेन समानयोगक्षेमत्वात् वस्तुतस्तूभयम
पि समर्थयितुं शक्यं तथाहि स्वार्थणिचनादेकस्मिन्नेव हेतुमणौ चेतयते ह्रूपयतीत्यत्र तु ना
म तस्यापि निवृत्तमेषणनयोः कर्मकतामाश्रित्य द्वितीये हेतुमण्णौ तत्प्रत्युदाहरणत्वं केन

म॰
वं॰
१६६
266

वार्यते घटश्चैतेनतत् रूपवत्तं प्रयोजयतीति विवक्षितार्थाचार्यकत्व णिजर्थोपयोगकालिकद्वयं वदता
हेतुमणिजन्तस्य विवक्षितत्वात् हेतुमतीत्यकोहिप्रयोजककर्तृविशिष्टेन कर्जितैव व्यपदेशोऽयात्
तन्नाणिजन्तेनेति दिक् यत्तुप्रसादकृतोक्तं णिग्रहणे णिज्ञानेराश्रयणोऽयं दस्य विवक्षार्थेऽद
मितितत्तुभाष्यादिविरोधात्पेक्ष्यमेव धात्वर्थेनेरितिप्रत्ययवसानार्थत्वात् णिज्ञामित्यस्यकर्म
त्वे समीचीनइति प्रथमाद्विवचने वाक्छन्दसीति पूर्वसवर्णदीर्घः ॥ इतिपदव्यवस्था ॥
भावोभावनेति उत्पादनार्थोऽत्रवर्तेर्णिजन्तादेजितिभावः परजणयन्तानामितित्वनार्थम् कल्पर्थे
दिभ्यः प्रतिषेधमात्रे हिभाष्येस्थिते कल्पोमत्रोर्थइति त्रयपवोदाहृतात्वेत्यवधेयं भवतेर
त्पाद्यर्थत्वेणिजन्तस्यभवतेः शब्देनकरोतिनातुल्यार्थत्वं चदर्शयति उत्पादनाक्रियेति धात
त्वेनेति तत्त्वज्ञातेहेतोर्भूत्वे प्रादेशश्चैदस्यज्ञानेशब्दत्वादितिवदताकैयटेन तथाधनितत्वा
त् हेलाराजीयादौस्पष्ट तथाभिधानाच्चेतिभावः धात्ववाच्येति एतेनभवनातिङ्प्रत्ययवा
वाच्येति मीमांसकमतेनसृष्टतामितिध्वनयति तथाहिभोक्तव्यमित्यादौ तिङंते विनाभावना
प्रतीयते कारकापेक्षाचहृष्यते प्रसिद्धचकरोतिसामानाधिकरण्यं किंकर्तव्यंभोक्तव्यं
किंकृतवान्भुक्तवानिति किंच भावयति घटमिति वत्परमतेभवति घटमित्यपिस्यात्
तुल्यार्थत्वात् दृष्टांतेहि कर्तुः कुंभकारस्य व्यापारे निजाचेष्टे साष्टांतिकेत्वाख्यातप्रत्य

ग्रे॰
१६६

यः नन्वप्रयोजकव्यापारोणिजर्थः कर्तृव्यापारस्त्वाख्यातार्थ इति वैषम्यमिति चेन् कारकं च
क्रमप्रयोक्तः कर्तृत्वे चटस्यानयात्वात् यदि तु धातुनोक्ता क्रियेति तस्य कारको कर्तेष्यत इति
भर्तृहरिप्रतिपादितमेतत्प्राधान्येन धातूपात्तव्यापाराश्रयत्वरूपकर्तृत्वे तथाप्यसमतं कः
तर्हीदानीमाख्यातार्थः व्यापारस्य धातुनैवाभिहितत्वात् अपि च धातोः सकर्मकत्वाकर्मक
त्वविभागउच्छिद्यते अकर्मकाः स्नात्यादिरहुतामपि च विरुध्येत तत्र सिद्धानेपि क्रियायाः
कर्मापेक्षाया नियमात्कथं अकर्मकतेति चेन् फलव्यापारयोः समानाधिकरणत्वैवैयधिक
रण्याभ्यां सकर्मकाकर्मकविभागाभ्युपगमात् किंच ज्योतिष्टोमयाजीत्यादौ करणे णिनर
ति णिनिरस्मत्पक्ष एव संगच्छते धातुत्वेन धातूपात्तभावनां प्रतियाजित्वेन तदुपात्तस्यो पा
त्तस्य करणत्वात् पचादयो हि धातुत्वेन भावनामाहुः विक्लित्त्याद्यंशानंतं तु पचित्वादि
ना प्रातिस्विकरूपेणाहुः तच्चांशांतरं भावनां प्रति प्राधान्ये भावनया संबध्यते ज्योतिष्टोम
याजीत्यादौ तु करणतया ज्योतिष्टोमाख्येन यागेन स्वर्गं भावितवानिति प्रत्यर्थप्रतीतेः स्पष्टं
चेदं णिनि विधौ हरदत्तग्रन्थे एतेनहृर्थः प्रचिकीर्षति भाष्यव्याख्याते भट्टिस्त्वाह विभज्य से
मापरमार्थकर्मा सेनापतिस्त्वापि दुरन्ददाय नियोजयामास तथा तु सैन्यं करोतिरर्थोपि च स
र्वधातूनामिति तत्र क्रियाया धात्वर्थे पचतीत्यादावेककर्तृकवर्तमानपाकक्रियेति क्रियायै

म॰
र॰
२६६
~~266~~
267

शेषकोबोधोनस्यात् प्रत्ययार्थेप्रतिप्रकृत्यर्थस्यविशेषणतायाऔपगवादौल्लक्षमत्वादिति
चेन्न प्रत्ययार्थप्रधानमितिसूत्सर्गः सचेहत्यज्यते क्रियाप्रधानमाख्यातमितिस्मरणात् पा
चिकेत्यादौ स्त्रीत्वस्यविशेषणत्वाभ्युपगमाच्च प्रस्तुतनतेवैषपचतीत्यावत्तप्रपत्तेः पचतेप
चेत्यादौ पाल्लशानचोः कर्तृप्राधान्यस्य सर्वसंमततयातिङ्त्वापितथात्वापत्तेः शत्रादीनां
ति ''चलादेशत्वस्याविशिष्टत्वाच्च शादेशानांच त्यातिस्मारकत्वेस्यान्यार्थाभिधायित्वे (
चार्थैक्यओस्यात् अतएवहि कष्टादिसमानाधिकरणेमध्यमः अस्मद्युत्तमः इत्यादिशुत्
षत्वावस्थासंगच्छते अभिहितेकर्तरिप्रथचेत्यादिच नचसमानाधिकरणइत्यनेनस्वाभिधे
य संख्यान्वियत्वमभिहितपाहूत चाभिहितसंख्याकत्वंविवक्षितमितिवाच्यं हृतानत्र
गुणत्वात् द्वन्द्वंद्वितसमासैः संख्याया अनभिधानान्नटाभिहितेपित्तृतीयाप्रसंगाच्च नच
कृत्स्वनभिधाने एवकर्त्तर्यनभिधानमितिवाच्यं भावार्थकेपिकर्त्तरिप्रथमापत्तेरितिदिक्
सामानाधिकरण्याभावादिति भावाभिधायिनोलकारस्यकथापितर्समानाधिकरण्य कर्मा
भिधायिनस्तु नत्वंभवान्त्वमेवत्वयमस्व यथायथप्रदाहरिष्यते । तिङ्वाचेतिकृत्वाख्याया
लसत्वरूपत्वमिव नथाचभाष्ये कृदभिहितोभावोद्रव्यवत्प्रकाशत इति इत्यधर्मा
लिंगसंख्याकारकादीन्नटलीनीत्यर्थः अतएवपाकः पाकेनेत्यादौ यथायथं द्वितीयादयः

नचैवमोदनस्य पाकइत्यादौ कर्मणि षष्ठी अनन्वितास्यादिति वाच्यं तत्रादावपि प्रकृतिभा
गस्य प्रत्ययार्थक्रियाभिधायित्वाभ्युपगमात् उक्तं च हरिणा आख्यातशब्दे भागाभ्यां साध्य
साधनवर्तिता प्रकल्पिता यथा शास्त्रे सत्त्वमात्रादिष्वपि क्रमः साध्यत्वेन क्रियातत्र धातुरूपनि
बन्धना सिद्धभावस्तु यस्तस्याः सत्त्वमात्रादिनिबन्धनइति यत्तु अस्तु न रसप्रस्यन्दमाधीकभूरि
ति ऊर्ध्वमाशालिस्तोके अस्तु तस्य रसः रसमानमस्तु ननमिति यावत् इति व्याख्याय तयोः प
र्यायकत्वेन कृदभिहितो भावो द्रव्यवत्प्रकाशत इति वर्धमानेनोपन्यस्तं प्राचोग्रन्थव्याचक्षा
णैस्तात्तु मोदितं तत्सर्वमनिरसनात् तथाहि रसदर्शनभावेष्टान्तं रसमानमिति विवरणे
न सह विरोधात् यत्तु द्रव्यवत्वेन तस्य द्रव्यविशेषकाप्रतीतिजनयतीत्यर्थवर्णनं तदपि निरस्तं
त्वमत्र प्राणसनविरुद्धं चानोदितं । एकवचनमेवेति प्रायोवादोऽयं भाष्ये उष्ट्रासिका आसते
हतशायिकाः शय्यन्त इत्यत्र बहुवचनस्य स्वीकारात् उष्ट्राणां स्यासिका इवासनमेव विलक्ष
णाः हतास्तु नानाप्रकारेण शेरते उद्यानावनानाविकीर्णकेशाः विस्रस्तवस्त्रास्तु नतस्त
थाहृशानि हतानां शयनानि तादृशानि देवदत्तादिभिः क्रियन्त इत्यर्थः अत्र सादृश्यावगमा
त् आख्यानवाच्यस्यापि भावस्य भेदावगमाद् बहुवचनं आसिकाः शायिकाः इति द्वितीया
बहुवचनं क्रियाविशेषणत्वेन कर्मत्वात् नचैवं क्लीवत्वमेकवचनं च स्यादिति वाच्यं खि

म॰ र॰ २६८

योक्तिविप्रत्यधिकारान्तरीत्यावधारणेन सामान्येनैकैकमित्यस्याप्रवृत्तेः बहुत्वावधारणेन ए-
कवचनाप्रवृत्तेश्च नचैवमसत्योक्तिर्विरुद्धेति वाच्यं लिंगक्रियानाथावकारकयोगाभावमात्रेणा-
न्यथेमित्युक्तत्वात् । स्यौसिचौ । यद्यपि सुजादयो द्वन्द्वेन निर्दिष्टास्तथापि उपदेश इत्यव
एव विशेषणं नहनादीनामव्यभिचारात् नदादि उपदेशो योऽजीति सुत्रमाचोपदेशे ज्ञेतभ्यो
हनादेश्च परेषां स्यादीनामित्रस्यात् सर्वत्रैवस्येति व्याख्याने नत्र हृदेहि स्यादयः समस्या
निर्दिष्टा सुजादयश्च षष्ठ्याविविक्तावश्च प्रधानेषाद्रः इत्यत्र चकारेणानन्यावियोगोपाद्रः वि-
एवादिति च समस्य नाहतिः स्यौसिचौ फङ्गासिषति प्रतियोगिनि समस्यौ निर्देशात् नचैतस्य
मेवस्य भङ्गेन विपरीतव्याख्याने बीजमस्ति चशाद्रुस्य व्यवहितान्वयापत्तिरिति स्थूलः स्यादेतत् ।
सूत्रस्य समासारोप्येकस्यैवेष्टत्वात् सुजादिवत् पुनरिड्विधिवाक्ये स्यादीनामिति विभक्तिविपरि-
णाम आवश्यक इति चेन्मैवं पूर्ववाक्ये चरितार्थस्य उत्तरत्राविपरिणामोऽन्याय एव नच तत्र
स्यात्तत्र विभक्तेरचरितार्थत्वात् सुत्रावतो विपरिणामः यथा हि ह्रीः सेव्यः नड्डान्वेति वा
क्यप्रयोगे उत्तरवाक्ये सेव्या इति विभक्तिविपरिणाम इष्यते नहि ह्रीः सेव्यास्त्यपि प्रयोक्तुः शीघ-
ने यदप्याहुः विभक्तिव्यत्ययस्यापि बहुलं दर्शनाददोषे इति तदपि भक्तिवादमात्रमिति स्य
ष्टमेव किंच प्राचोव्याख्याने हि एवादितित्वनीयानाहतिः नत्वयथापूर्वमस्यकार्येष्वव्यापकः ।

उ॰ २६८

येहृस्वादिकमतिदिश्यते एवं स्वस्य स्वस्मात् परस्य च कार्यमिति दिश्यते ननु चिण्वेडु
दाङ्गः स्यात् चिणः परस्येव टेः परस्यापि लुक् प्रसज्येत ननु बाह्ये मते नासौ इट् आगमत्वेन
प्रत्ययावयवतया प्रत्ययत्वाभावादिति चेन्न ह्यनेनागमेषु शिष्टस्यात्वया प्रत्ययत्वाभ्युपगमा
त् कर्तोरिति सूत्रे प्राचोक्तं व्याचक्षाणैः तथैव वर्णितत्वात् किं च हृस्वादिकार्यस्य प्रत्यये
परे विहितस्योदिष्टे कथं निर्वाहः इत्याशङ्क्य चिण्वदूहस्य सर्वस्यैवातिदेशः प्रत्ययत्वस्या
प्यतिदेशात् न दोष इति तावत् प्राचोयन्यव्याचक्षाणा एवाहुः तन्न चापदम्न्यापि प्रत्यय
त्वेन लभ्यते यत्तु वदन्ति चिण्वल्लाकिः चिण्वदिति दोषसङ्गत्वादिति तदपि न नाहि चिण्वदित्युः
तिदेशप्रतीतिसिद्धः अतिदेशस्यातिविशालत्वापत्तेः तथा च लोकोपि हृस्वादिसमकत्वे
नातिदेशोऽङ्गवेयवेत्युक्ते अतिव्याप्तेन ननु यदि चिण्वदूहमात्रस्यातिदेशस्तर्हि हनिणि
जादेशाद्यापेक्षः घ्नानिघ्नने घातयिष्यते अध्यापयिष्यते इति सिद्धं अङ्गादिकार्यबलेन प्राङ्
सैवातिदेशात् नचैते प्रसङ्गाः नटेतदाह अङ्गकार्यमिति सीधयतीति तथा च सीधब्रूण
हेन नाहि विशिष्टलक्षणमिति भावः अर्थधात्वकट्ठनेनप्राप्तस्य विधालङ् नचबलादि
त्वे नास्तीति वाच्यं तस्योद्दानपेक्षणात् यदाहुः नित्यश्चार्यवल्लिकिमिन्नो विहानीति अस्यार्थः
विभाषणतन्त्यादौ भूर्मासित्यादिषु परमापि वलादिलक्षणमिटं बाधित्वा चिण्वदिडेव भवति

म॰
रं॰
२६५
269

सत्यामपि शास्त्रेण प्रवृत्तौ हानोपादानप्रसंगितमात्रेण अवोद्धुकत्वं नित्यत्वात् बलादित्वानिर
पेक्षो ह्यसौ परस्त्वनित्यः अस्मिन् कृते बलादित्वविघातात् एवं च नित्यत्वात् इष्टोऽयमेवे
ष्टं भवति एतेनोपदेश इति किं भाविष्यते अत्र गुणवादेशयोः कृतयोः न स्यादिति प्रसङ्ग
न्यः प्रसङ्गः विप्रतिषेधो विषये अस्ति मित्रस्याप्रवृत्तेरेवादेशस्यासंभवात् गुणमात्रे प्रवृत्ते
पि गुर्जनत्वानुपायात् उपदेशग्रहणफलं न स्फुटमभविष्यति विप्रतिषेध इति न
गुणं पनस्यथा तोरुपदेशाभावात् कथमिह विप्रतिषेधः न च णेरुपदेशात् उपदेशो यो चुरन
श्च वेति वाच्यं स्यादत्र ॰ ॰ ॰ ॰ ॰ नित्यादेयत्वान्नित्यत्वाच्च परे गुणे कृते विप्रतिषेधाभावा
त्रैः न हि गानस्योपदेशो यो च न हन्तव्यमस्तीति चेन्न मेवम् उपदेशयोजितव्याख्यानेऽपि
उपदेशग्रहणसामर्थ्यादेव शास्त्रेणादौ प्रवृत्तिस्वीकारात् अस्त्वौपदेशयदर्जनेनस्य
निव्याख्याने अस्येति व्यधिकरणषष्ठी अगावयवस्याजनस्येति कार्यनत्वात्तौ च व्या
पदेशवद्भावः सर्वव्यापिणाजन्ते विप्रवद्भावोऽस्त्येव तदाह विप्रवद्भाविस्थत्वं इह तस्य
त्वे दीर्घस्याज्ञायो मिनावा चिणीति इहायामिद्धत्वेन मल्लप्यते णानित्यस्यायवत्त्वेऽमि
ञो विद्यातीति । घन्नुपपत्तवेनाजन्तत्वाद्धिवादिति प्राचोऽग्रस्य व्याचष्टे णाणुक्तम्
न्नेधा त्वनरं तद्रुपदेशावस्थायामभवत्ययमजन्त इति तन्न्यायविरुद्धं स्वोक्तिविरुद्धं च उप

ग॰
२६५

देशो हि साक्षाद्धारणं न चैवं तत्र तदस्ति किंच धात्वादेशः सद्धप्तयत्र हन्तेः प्रतिषेधश्च
ज्ञोपदेशग्रहणबलेन न तत्र त्यन्त्याख्यानमाकारेस्थिते स्वयमेव न इत्यत्रैवोक्तं तादित्यानीं विरुध्ये
तेति दिक् । आनोयमवा । चिण्वत्तोः किं चौरिः बालाकिः बाह्वादित्वादिञ् प्रदायिषात
मिति स्याद्योरिति स्येननेत्रादिस्तान्तरत्वाच्चिण्वदिति हन्तेः फलादित्वात्तन्नेत्याङः सन्यपि न
सिद्धेहकारितत्वात्तोनः प्रतिनिर्लक्षणयाहनस्त्रादुपनिपातेः । आशीर्लिङीति नत्वलङि तयोः भ
योरपि वैकल्पिकत्वाद्येन नाप्राप्तिन्यायभावादिति भावः विशेषविहितत्वादिति लिङीति
हि पदद्वयसाधारणं सीयुटस्त्वात्मनेपदएवेति विशेषविहितेति भावः एतेन स्यासिचिण्वदिट् परनिपदविधे
बलीयस्त्वाच्चिण्वद्भावः इति कैयटग्रन्थो व्याख्यातः यत्तु नरनारायणेनोक्तं अत्र यद्यपि वधा
देशोपि परनिपदविधिस्तथापि विप्रतिषेधाच्चिण्वद्भावस्त्याशय इति यच्च तन्त्वविदा कारार्थे प्राचा
ग्रन्थव्याख्यातृणोक्तं यद्यपि परादप्यनन्तरंगं बलीयस्तथापि परशब्दस्येष्टवाचित्वाच्चिण्वद्भावेन
व्यवस्थेति तस्याप्याशय इति तदेतत्सर्वं कैयटग्रन्थाशयापर्यालोचनमूलकमिति स्थूलपद
ध्वनितं पक्षे वधिषीष्टेति इह प्राचा यदुक्तं वधादेशस्तन्नोक्तं न त्वमेव गवयत्र नत्रनत्यौ त्रेणोक्तं
वधादेश इति परमतम् स्वमते तु वधादेशोऽत्र न भवत्येव तथा चोक्तं महाभाष्ये चिण्वद्भावेन
नेष्टनः प्रसक्तस्य भावः कस्मान्न भवति सहस्रनो विप्रतिषेधेन यद्बाधितं तद्बाधितमेवेति हार्दम्

हनिणिङ्गादेशप्रतिषेधश्चेति तदेतद्भाष्यार्थानवबोधविजृम्भितं लिङीति परसप्तमी स्यसिच्सूत्रे
प्रार्थयानकर्त्तव्यस्यासंबंधश्च सौत्रिवादेन स्त्रीहृत्यप्रहृत्नवदभावात्सोऽकारि चिण्वद्भावो विप्रतिषे
धेनेति वार्त्तिकं च व्याचक्षाणेन भाष्यकृता चिण्वद्भावप्रसेवल्लवधादेशाभाव उक्तः तत्र चिण्वद्भा
वविरहेऽपि नत्कथं स्यसिच्सूत्रानुक्रमपि विकल्पो विसृत्यश्रवणमपि स्हलमङ्गीक्रियते यद
पि हनिणिङ्गादेशोऽत्याघकृत् तदपि न घ्रनादेः स्याध्यनिर्देशो प्रायेवार्त्तिककृता ह्यनिष्यते ऽन्यादे
तदुक्तः श्रेणाधिकारबलेन तत्समानाच्च तलिङि लङि च सात्त्वादुपदिष्टस्य वधेरिति देशापेक्षा
स्ति उदाहृतश्चात्र वधादेशो भाष्यकारस्तु विकारमाधवीतरसर्वैरेवेति टीकः श्रद्धसानामिति चि
ण्वदिटोभावेऽहनः सिजिति कित्वात्तत्रानुपदेशोत्पत्तेनासिकलोपः । चतुर्भिरधिकेयान
मिति यत्तु धेसल्लोपे वा समस्यदृश्चेति के चिदिति घ्रनाडिति त्वमिति वा प्रामाणिकद्वये संचार्य लोप
विकल्पादिप्रपंचेनेह षष्ठाविंशद्रूपाणि भवन्तीति वदन्ति तदुक्ति संभवेनप्रयामः घ्रनाडिति
रूपानंत्यस्य ऽद्वंवारन्वात् षष्ठाविंशतिसंख्याया पवप्रस्कारे स्हलभावाच्चेत्यासंतानावत् । प्रवह
भवति तदपि एवं ज्ञाप्तिसिद्धिमिति स्हत्रीसत्ताऽर्थकथनमिति सूत्रं नावसमानेऽथ प्रांसमान्निष्ठप्रयत्नेचि
समसलोपिति स्हत्रे दीर्घग्रहणं कर्त्तव्यं तथाहि ह्रोडुघ्रनादेर्वेष्टदारिः पचरक हिड्यांत् प्रत्र
चिसमसलोः कृतयोऽहस्वे विकल्प्यमाने प्रहिहि प्रहेडेति स्यात् दीर्घेत प्रांजिडे प्रहोडेति

भवति एतच्च विप्रतिलोपेति सूत्रे कैयटग्रन्थे कर्मण्यङ्ङिति सूत्रे हरदत्तग्रन्थे च स्पष्टं दीर्घो
नास्तीति यङ्लोपे लुप्तस्यानिवद्भावेन णिच्परत्वाभावात् यथाहं देवदत्तेति निभावः । नोदा
त्तो । कथं तर्हि हरेर्यत्क्रामिपटैककेनात्वं मिनिश्रीहर्षः प्रमाद एवायं यदित्तसमाधेय
मेवेत्याग्रहः नहि निहत्तप्रेषणात्मक्तानेर्थोऽस्ति नन्वच्छिवाबोध्यः कथश्चयमः उपरम इति
सेत्ताप्यवकस्याविर्थिनित्यत्वात् तथा च निर्दिश्यते प्रश्न उद्यमे यश उपरमे इति ग्रथ्यर्थे हि
कर्मकास्तेषु निःशस्यन्पर्थविलार्थाः किं प्रत्येकं कर्मणैव गौणे किं वा उभयोरिति सन्देहे व्या
वस्थामाह द्विकर्मणोश्चेति ॥ इति प्रोक्तमनोरमायां भावकर्मप्रक्रिया ॥ प्राकृतकर्म
काप्रयोगि फलावच्छिन्नव्यापारप्रत्वेन देवदत्तादिनिष्ठव्यापारस्यापि कर्मणि विलीनैति
द्विधाभवनत्याभवनादिफलाश्रयणाभोदनादीनां कर्मत्वं प्रावितं कार्त्स्न्ये मी श्रिततनत्वात् व्या
पारोपायेतिरतत्वेन फलोपामायपरत्वेनपायनिर्मिदेरितीवोहामपि गन्धनि द्विधाभवति त्याभव
तीत्यादि विवरणविषयीभूतानां गध्यादिकवद्वा कर्मकता तस्यस्यामवस्थायामोदना
देः कर्मत्वं संभवति किंतु कर्तृत्वमेव स्वतन्त्रः कर्तेति लक्षणात् एतच्चोणवनाद्दृच्च
वप्रपाञ्चितं । स्यादेतत् द्विकर्मकाणामेकस्य कर्मणः प्राधान्यविवक्षायामपि प्रयो
णास कर्मत्वमस्त्येव स्वयं प्रश्नयस्याश्रयेण गौणप्रस्तुतावस्थापमानस्यव हानि मेदिनी पादोयये

प्र॰
र॰
२२१

271

निचेत् सत्यमेककर्मकाणामेव अकर्मकतायां उच्यमानत्वान्न दोषः तदेतद्ध्वनयन्नेव प्रा
येणेति अकर्मकत्वस्तुत्पादनस्य फलमाह नेभ्यो भाव इति भावे चाकर्मकेभ्य इत्युक्तेरि
ति भावः । कर्मवत् । कर्मशब्देन कर्मस्था क्रिया लक्ष्यते तदाह कर्मस्थयेति लकारवा
च्य इति लकारेणोपस्थापितं इत्यर्थः हिलकारककारादिति प्रश्लेषे भावः च्यत्ययो बहुलं लिङ्गा
शिष्यादिति संहितया पाठे परसवर्णविधिलब्धलकारो परिलक्षयेत् व्यञ्जनपरस्यैकस्या
नेकस्य चोच्चारणे विशेषो नेति भाष्योक्तेः यद्वा लम्भनिर्दिष्टो लकारः लोपस्य संयोगान्तस्येति
पदान्तेन हलो यमामिति न च लग्रहणमिहानर्थक्यं नित्यषष्ठ्या विपरिणम्यते लमषष्ठीकं वा
षष्ठ्यन्तस्य तद्रूपस्यान्वये कर्तरि शर्विति सूत्रात् कर्तृग्रहणमनुवर्त्य प्रथमया विपरिणम्य
ते तेनाभिमतार्थलाभ इति करणादिकारणेभ्यो माभूदिति नन्विह करणस्यैव स्यायावस्थितः
सचापि असिस्यात्वेनधान्यायोधात्वना नोपात्त इति चेत् किं ततः न हि तस्मिन्नुक्ते साह चर्य
तियोगिभूता क्रिया धातूपात्तेत्वन विशेषता एवं चासति कर्मणस्तु तस्मिन्नस्या देवाति प्रसङ्ग
इति भावः अधिगच्छतीत्यादि श्लोकस्योत्तरार्धं तत्र यत्नात् पावयति तस्मै नमो गुरवे सदेति
बोध्यं स्यादेतत् पच्यादीनां गम्यादीनां च फलाभिधायत्वे फलस्य च कर्मनिष्ठत्वेन लब्धक
र्मकर्मवद्भावप्रवृत्त्यापत्तिरिव्यवस्था तत्राह यत्र कर्मणीति उक्तं च हरिणा विशेषदर्शनेन यत्र

उं॰

त्रक्रियातत्रव्यवस्थिता क्रियाव्यवस्थात्वन्येषां शब्दैरेवप्रकल्पितेति ग्रन्थेषां धातूनां शब्दैः क्रि
याव्यवस्था शब्देनकर्तृव्यापारस्यैवप्राधान्येनावगमात् कर्तृस्थितेत्यर्थः उद्देश्यत्वेनापिकर्तृवि
त्कर्मस्थयोरस्य क्वचिद्व्यापारांशस्येति सापिनियामिका तथाहि दर्शनारोहणाभ्यां विषये
न्यरभूतेच रविमाषात्रुपलंभात्कर्तृस्थिता उद्देश्यपात्ररोधाच्च ग्रहंपश्येयमिति हृद्देशेन
त्वयंविषयो भवत्विति एवम्पारिगच्छेयमित्युद्देशेन तद्धारितेनान्यसंभावो भवत्विति उप
रिगमनरूपएवव्यापारविशेषोत्रद्देशेन तन्यग्भवनमात्रे भूमिष्ठेद्द्रष्टस्य शाखाहस्ता
भ्यां ग्रहणमयत्नापि प्रारोहयतीति प्रयोगात् अतएव वाह्ययज्ञिनपरिच्छेदसीत्यत्रभाष्ये क
र्मणोत्यर्थइति अतएवचाणिकर्तुणिकर्मत्व परिच्छित्रयोरसाविति द्विधाभवनरूपावि
शेषः कर्मणीत्युद्देशेनवचकारकव्यापार इतिमहद्वैषम्यं एवंचात्मनेपदमुत्तमिक
मेवभावेपरस्मैपदं भाष्यन्यायविरोधादुपेक्ष्यात्वादितिकय्यटः हरदत्तोप्येवम् नन्वेवमिह
वस्तुत्रे सकर्मकाणां प्रतिषेधोन्योन्यमाश्लिष्यन्त इतिभाष्यवार्त्तिकग्रन्थः संयोगरूपस्यफ
लस्यकर्मस्थत्वात्स्यामितिकय्यटादिग्रन्थस्य विरुध्यते संहृत्यामिभ्यां सहाश्लिषेवरूपस्य
रूपएपादृत्वात्संयोगात्मकस्य फलस्य सर्वत्र तत्त्वत्वादिति चेत्सत्यं उदाहरणदिक्मात्रं तत्त
त्रस्थितोदाहरणमितिनत्वं स्यादेतत् तानेव्ययोरिव यत्नस्यापिकर्तृस्थत्वान्नहाधिनः

म॰
र॰
२७३
273

करोतेरपि कर्तृनिकर्मवत्स्यादित्याशंक्य करोतेर्यत्नार्थत्वमेवनास्तीत्याह करोतेरुत्पाद-
नार्थत्वेति एतच्च भूवादिसूत्रे भाष्ये स्पष्टं नैनादेश्यलक्षणं सकर्मकत्वेनानावृत्तस्यायत्न
तर्हि निवर्ततिबोध्यं एतेनेति ज्ञानस्य कर्तृस्थत्वप्रत्यादनेनेत्यर्थः अत्र व्यवस्यमानः इति व्य-
एतेन कारस्य प्रयोगः सकर्मकाणामिति एतेन सृजस्यात्मनेतिव्याख्यातं तथाहि आत्मान-
मात्मना वेत्तीत्यकर्तृस्थभावकत्वेन समाधत्वेऽपि सृजसीत्यपरोऽप्रहृत्वार्तिकेनैव निर्वाहः
सृजेः कर्मस्थफलकत्वात् अन्योन्यमिति स्यादेतत् यद्यपीह संयोगात्कृत्तिक्रियायां कर्मत्व
कर्तृत्वोपयोगिन्नुभयनिष्ठा च तथापि व्यक्तिभेदोऽस्त्येव अतएवान्योन्यं श्लिष्यतः न्यायस्य कर्मत्वं
अन्ययोरुभयोरपि कर्तृत्वमेवस्यात् न तु कर्मत्वं हुमोगगास्पृशान्तहृत्वत्रयथा एवंस्थिते कर्तृ-
त्वोपयोगिनी याक्रियानया तुल्यक्रियस्यतदीयकर्तृत्वं विधीयमानः कर्मवद्भावस्तृतेन प्रामो-
त्येव एवं सृजस्यात्मानमात्मनेत्यत्रापि नात्रिवार्तिकारम्भोऽणोत्याशक्योदाहरणान्तरमाह प्र-
जेति तयेनाहिंकर्मकत्वया ऽजाहृपस्य कर्मणः कर्तृत्वेन विवक्षायामपिग्रामसूपेण कर्मणा
सकर्मकत्वाज्ज्ञानिदेशाप्राप्तिनभावः स्यादेतत् कर्मवत्कर्मणेति सूत्रमेवास्तु निरर्थं वार्तिकं
प्रयोगस्तु सर्वेऽपि प्रकारान्तरेणैव व्याख्यास्यन्ते तद्यथा एकस्यापि वस्तुनो वस्त्वविशेषावि- गं॰
शिष्टा विशिष्टत्वाभ्यामौपाधिकमाश्रित्य कर्तृत्वकर्मत्वचोपदेशकमेव सिद्धान्तेऽप्युक्तवान्नो

क्रियते ह्यात्मानमात्मना वेत्तीति सूत्रस्यात्मानमात्मनेति एवं च पच्यत ओदनः स्वयमेवेत्यत्रापि शुष्के क
र्मण्येव यगात्मनेपदे मा भूतां च निवृत्तप्रेषणेन स्वयमित्यस्यात्मनेत्यर्थात् एवं च स्थालीपचते
त्यत्राधिकरणस्य कर्तृत्वे यथा धात्वर्थः कर्मण्यपि लभ्यत इत्यपरमत्र सूत्रे कथं तर्हि पच्यत ओ
दनेनेति भावे लकार इति चेन्न मा भूद्भावे कर्मण्येवास्तु कर्म चात्मैव न चैवं भेदव्यक्तसूत्रेण
भिन्नमीघ्रेहंटमिति भावे ह्यात्मनः स्तः कर्मणि चेदात्मनेति विशेषणानर्थक्येन शुद्धत्वं स्यादिति वा
च्यं सामान्येन प्रसक्त्यसंभवात् स्वरूपमित्यस्याविशेषणत्वसंभवाच्च आत्मनेति विवक्षायां न
पुंल्लिंगतायाः उक्तविवक्षायां सूत्रपक्षेपि द्वैविध्याच्च प्रत्योच्यते कर्मवत्सूत्रे प्रत्याचक्षा
णेन न दुहस्नुनमामिति प्रतिषेधप्रारम्भेण वा प्राप्तेष्टं कर्मैवास्य विषयः स्यात् ततस्तु दु
ह्यते गौर्गोपालेनेत्यादि न सिध्येत् दुग्धे गौर्गोपालेनेत्यादि च स्यात् द्वितीयपक्षे तु न मते दण्डश्चेत्यादि
स्यात् कर्मणि यक्प्रसंगात् कर्तरि तन्न संभवात् किं चात्रः कर्मकर्तरीति चिण्विकल्पो
निर्विषय एव स्यात् कर्मवदित्यतिदेशस्य विषयो भूतः कर्ता हि कर्मकर्ता न चासौ नवास्ति त
त्वर्सेन्यात्मना हार्योत्पत्राणि चिण्विकल्पापत्तेश्च ननु निवृत्तप्रेषणेनात्मामिश्रिताभूतपूर्वकर्म
णि साम्प्रतिके कर्तरि चिण्विकल्पश्चुम इति चेन्न तर्हि तत्र वलस्यादिष्ट यथायथं भावा
यः स्तः यक्तन स्यादिति कर्मवत्सूत्रमवश्यमारभ्यमेवेति दिक् । सार्वधातुके यक् । एवनो

म॰
र॰
२७४
274

नित्यं क्ङित्यादिर्नित्यमिति स्वरार्थं यक्चिण्वल् सार्वधातुकानुदात्तत्वस्थानेऽयक उदात्तत्वं स्यादेतत् य
क्प्राप्ता स्यात्र्वत्कर्मकात्तु जेर्यक् क्रियते करोतीति केचिदित्युक्तं तत्र यगात्मनेपदे आत्मनेपदा
न्तं क्रेस्तु स्तूयते तेनेति दिक् भूषाकर्मेति यक्प्राप्तौ ह्रस्वं हरतिरूपे किरादीनां सर्वेषां ग्राह्यत्वात्
एतच्च ग्राह्यते ग्राहतेति उदाहरणाभ्यासूलेध्यति यदपि चिण्वदिडपि नेति केचिदित्युक्तं
तत्र केचिदित्येषोऽत्राधितः उक्तार्थस्य भाष्यवार्तिकारूढत्वात् मास्ताविष्टेति चिण्वदिट् यक्
प्राप्ता नत्विहेति चिण्वदिडोऽपि निषेधमत्वा तेनोक्तं नानिषेध इति केचित् इति तत्र चिण्वदिति
चिण्वत्कार्यमिति निर्दिश्यते न च चिण्वत्स्यापि निर्देशो निषेधशास्त्रे येन चिण्वदिटो निषे
धः स्यात् एवं च निषेधाभावस्य न्यायत्वमवसमनत्वे च केचिदित्युक्तेः सुचिन्तत्वात् यक्तवदेति
चिण्निषेधस्य चिण्परे विहितत्वाभावात् तस्मिन्नत्वेनास्यानिर्देशः इति तदनितरभसात् स्व
निर्देशेन निषिध्यते इति यक्त्वो निषेधो नातिदिश्यत इत्युक्तेरतश्चिन्तत्वात् स्वीकारतेति चि
णि प्रतिषिद्धे मा स्थीति च कृ यक्प्राप्ता कर्मकर्तरि यद्युक्तं प्रकारान्येष्वस्तु तत्र सेलत्वात्
पेदे यक्परिष्कृतेति चिद्धृधाकर्तरीति न कर्तव्यं सामान्येन चिद्धृधीयता तस्य भावकर्मणोः
परत्वाच्चिण्बाधको भविष्यतीति किंच चिण्ते पदं तत्रमतश्च्रिणीति वर्तमाने प्रतनस्थितग्रह
णं बाधकबाधनार्थम् तथा च कार्टेचित् ग्रहणसामर्थ्यात् चिण्वाद्यभाव्यं नत्तच्चेदन्याहिनतन

गे॰
२७४

स्मात् विधिनिषेधस्यैव प्रक्रान्तत्वेन विधेर्वाऽभाव्यमित्युक्तव्याहतत्वात् किंच कर्तरीति
मात्रकृत्यसंगतमेव कर्मणि नशाहृभिन्नेष्विति प्रसङ्गः नहिन्त्रापि विधिनालित यच्चकं बाधते
एवंचकर्तृविग्रहणयोः सामर्थ्यादेव वर्णनमपि कश्चिद्रिक्ति संभवं लभन्तो इत्यालोचितावत्
चिण्वदिटोपि निषेध इति प्राचो ग्रन्थस्याशय इति स्यादेवेति यत्तु परिज्ञावेति स्पष्टमित्यूचे
चिण्वदिटि नित्यतो यानाहेति विज्ञानाच्चिणि निषेधोपि विधिः कार्यमित्यनिर्दिश्यत इति तत्र
ममसंनाद्देववतीरिति नत्वेववर्णितत्वात् आत्मनेपदविधौ योकर्मकर्तृत्वमुदाहरति विक्र
वेते सैंधवा इति । कुषि० । न दुहेति हेत्वाश्वेत्यनुवर्तनेन नदाह नयतीति किंत्विति तस्मिन्ने
व विषय इति भावः गच्छत्युक्तेः फलमाह यगाविषयेत्विति यमाविति एवं कोहि निषेधः यत्र
त्वयक्तानप्रवृत्तिस्तत्र न निषेधो नापि शपव् नापि त्वमसि योगाश्रित्य परस्मैपदं त्यर्थः नेनलि
ङ्गेयो लिङ्गः स्यादीनां च विषयेनेदंसूत्रे प्रवर्तनमिति फलितं शपन्तकोऽत्रेति विशेषः कुष
तीजेच्चानित्यत्वाच्चम स्वैविशेषापुष्कापव गच्छेदमवधेयं कर्मकर्तरि सूत्रे कारादिभिः प्राप
येन स्वयमेवेति प्रयोज्यते नदाविवक्षितम् आत्मना करणेनेति वा व्याख्येयं नतकनोति न
घासति कर्मण्येवलः स्यात् स्पष्टं चेदं कैयटादौ ॥ ॥ इति कर्मकर्तृप्रक्रिया ॥ ॥
प्रभिन्ना । प्रभिन्नास्थानिः सोच्यते बोध्यतेनेनेति विग्रहः नदाह स्थानिबोधित्वपदं इति

म॰
२॰
२७५
275

स्मरसीत्यत्र वाक्यार्थः कर्म पचपञ्चगोधावनीतिवत् कृत्स्नेति क्रियायां विशेषणं गोकु॰
लाधिकरणकास्मत्कर्तृकभूतानद्यतनवासकर्मकं कुलसंबोध्यकं स्मरणमिति फलि
तोऽर्थः वासो लक्षणमिति प्रसिद्धत्वात् चरणं लक्षणमिति सहसा बुध्यमानो हान्यपरिवाध्य
मित्यर्थः । अत्यन्तापह्नवे इति । अपह्नवोऽपलापः नाहमित्यादि कलिङ्गेनामजनपदोऽस्मि
नोद्देशः तत्र प्रविष्टोऽसि चिरं त्वया स्थितमिति केनचित्पृष्टः सन्नाह नाहं कलिङ्गाञ्जगामेति
न केवलमवस्थानमेव निषिध्यते किन्तु तद्देशप्राप्तिं गमनमपीति भावः अत्यन्तापह्नवः
यद्यपि गमनमेवाभिधेयं कृतं तदेवापलपितमिति तदात्यन्तापह्नव इति लडेवं भवति । पृष्ट
वाः प्रश्न इति कर्मणि ल्युट् । आसन्ने इति । पञ्चवर्षाभ्यन्तरमासन्नकालः पञ्चवर्षातीतं तु
विप्रकृष्टकालमिति वर्णयन्ति । ननौ॰ । पृष्टस्य प्रतिवचनमिति विग्रहः । यावत्॰ ।
लक्षणप्रतिपदोक्तपरिभाषया प्रतिन्यायत्वव्यापनार्थं निपातग्रहणं भवन्त्यत्र महाभाष्या
दिनिग्रहणमप्येवमेव नत्रान्यतरस्याग्रहणमकर्तव्यम् । विभाषा । तत्र कर्हिशब्दोऽयमनद्य
तनविषयः अनद्यतने र्हिलन्यतरस्यामिति किमो र्हिल्विधानात् ततस्तद्योगे लुडेव
भवितव्यं तत्स्मृते तल्लृण्ग्रहणं क्रियते कर्हि भोक्ष्यते इति अत्राहुः भविष्यत्सामान्ये भो
क्ष्यत इति युक्तं यच्च कर्हिशब्देन संबध्यते इति भोक्तेति तत्र भविष्यत्सामान्ये लृट् विहि

जे॰
२७५

नः सोनद्यतने लटा बाध्यते तत्कथं विकल्पोदाहृतिः । अत्राह । अनद्यतने लङित्यत्राथं
योगेऽत्र वर्तते तेन तन्निमित्तयोगेऽपि पर्वकेऽत्र एवमत्र रमपि योगद्वयं तत्रात्र वर्तते तेन तन्निमि-
त्तेपि लङ्स्यादिति कथं वर्तनत्वबाधकः । लिप्सा । पूर्वेण सिद्धे सत्यारम्भसामर्थ्यात्सिद्धमिति
धनयन्त्रदाहरति । वर्तमाने । येनोपाधिनेति तथाहि पूर्वजोऽस्यानद्यतनः तेना
ध्ययनत्वधात्वेन तत्स्थानादि विशिष्टकर्तरि अल्पपूर्वात्कालमिदं एकत्र सोपि न
स्मिन्नुपाध्यौ भविष्यत्वस्मादिति कदागतोऽसीति भूतकालेन प्रश्नवाक्यमुदाहरणे भूतकाला
भिधानाय एवं कदागमिष्यसीत्यत्राप्युत्तरम् उदाहरणद्वयमेवमिति एषोऽभ्यागमन-
विनाभूते यद्यपि प्रश्ने प्रकारभेदादिदमतो नद्यतनत्वे विवक्षिते इदानीमागमनमिति
धनयति तेन कदेति प्रश्ने प्रोक्ते प्रार्थिकमुत्तरं संगच्छते सामीप्यं च द्योतितं भवति अत्रो-
दाहरणप्रत्युदाहरणम् प्रत्याख्यानमिदमाकरे । लिप्सायां । वचनग्रहणं स्वरूपस्यैव ग्रह-
णमात्रं भूदित्येवमर्थं तदाह लिप्सापर्यायेऽपीति । पंचदशरात्र इति भाष्यकारप्रयोगात् स
त्यपूर्वमिति लब्धीवत्वेन । भूते च । अस्योदाहरणानि उत्ताप्योरित्यतः भूतेति बोध्यानि
ततः प्राचीने सूत्रे रह सूत्रेण विकल्पोक्तेः । किंकिल । अस्ति भवतीति त्वत्काले केऽसो
गमनं भवतीत्यादिरर्थः । यत्रयोः । अनवक्लृप्त्यमर्षयोरिति लिङ्लृटोः सिद्धौ वचना

म० भा०
२७६
276

मिदं स्त्वद्बाधनार्थं नवाहस्त्र्यपवादइति । संभावनेल० । संभावनमिति प्रथमयासमस्य
न्ते विपरिणम्यते अलमिति च सम्बन्धः एतच्च गौरवं सिद्धस्य गतिः स्थितेन नोक्तेति न्याये
नाश्रीयते अलमिति संभावने सिद्धाप्रयोगस्तु इति सूत्रार्थस्तु चिन्ते अलमिति चोक्तिं प्राये
णागमिष्यति हन्तीति पलायनइति हननं हेतुः पलायनं हेतुमत् लक्षणहेत्वोरिति सूत्रे
ण शत्रादेशस्तत्र भवति देवश्चेतो गले ग्राहः इति योगे च सिद्धिर्यतिर्मान्यवाक्यत विभाषा
रूपपाठात् । इच्छार्थे० । नन्विकामप्रवेदनइति उपसंख्यायते एवं च कामप्रवेदने कश्चिन्नी
ति सूत्रं मास्तु अनेनैव सिद्धोतीति चेन्न मैवं यत्रार्थप्रकरणादिना पि कामप्रवेदनं गम्यते तदु
र्थं तत्रारंभात् नहिनेन सिद्धत्वात् तत्त्वात् महानसूत्रमास्त्विति चेन्न तेन लोटि सिद्धेपि लोडर्थ
मस्यारंभात् लटो च लिटो बाधामा भूदिति लिङ्प्रकः नहि लोङ् चेति एवोच्यतामिति
चेन्न लिङ्ग्रहणकार्यं नत्संबंधस्य विभाषाग्रहणस्याप्यत्र कर्षप्रसंगादिति दिक् । लिङ्च । स
मानकर्तृकेषु तुमुन्नपूर्वेण सम्बन्धः इच्छार्थेषु लिङ्लोटौ इति प्राप्तं लोटं बाधते एवं लिङ्
मपि बाधते न च वासरूपविधिः क्त्वातुमुन्नवलर्थेष्विति तदभावादिति लिङ्च धीयते । धा
तु सम्बन्धे० । इह धातोः संबंधे नोपपद्यते स्वार्थस्य कारणेनापरलोपात्वात् पदार्थसंसर्गः
कारकविशिष्टक्रियायावा वाक्यार्थइत्युपगमात् मात्रबाधेनापि भासनइति प्रश्नपरा

उ०
२७६

मेऽपि शब्दस्य स्वार्थे प्रत्येव प्रकारत्वेन तच्छब्दान्तरं प्रति प्रयोज्येन यथा सन्निधौ कर्मत्वं समान
कर्तृकत्वं च धातोरर्थद्वारकं विशेषणमाश्रित्य यथा च कश्चिद्धीमान् तस्य कर्मत्वं तथेह
पि धात्वोरर्थद्वारकः संबन्ध इति तदपि न तथा हि परस्परसंबन्धार्थबोधकानेकधा त
प्रयोगे प्रत्यया इति फलितं स्यात् न तु स्व गोमानासीद्‌ विनाचेति न सिध्येत् नह्यत्र वर्तमान
कालोऽस्ति प्रयुज्यते न चाप्रयुज्यमानस्य संबन्धोऽस्ति तस्माज्ज्ञानरूपेण वृत्त्यर्थो लक्ष्यते इत्य
भिप्रेत्याह धात्वर्थानामिति विषयबहुत्वापेक्षं बहुवचनं एकैकविषयापेक्षायां तु धात्वर्थ
योरिति बोध्यं स्यादेतत् तत्रापि द्विधा वाक्यैरेव स्वविषयप्रत्ययाः सिद्धाः तत्किमनेन यदि त
त्रा प्रमाः तत्राप्येतत्सूत्रेण प्राप्येरन् तस्य पदोपाधिकप्रकृतिप्रत्ययार्थानां सङ्करस
ति सर्वप्लवः स्यादिति शङ्कयाह यत्र काल इति ग्रन्थभावः कालमात्रमनेन बाध्यते न
त्वन्यदपि स्वल्पबाधेनोपपत्तौ बहुबाधस्यान्याय्यत्वात् स्वल्पत्वेऽपि न हि किंचिदेकं बाध्यता
मिति चेत् किं तादृक्त्वे विनिगमकाभावात् कालांशेऽपि किं विनिगमकमिति चेत् प्राय
शोनामिति गृहाण वर्तमानसामीप्ये इत्यारभ्य कालान्यत्वप्रतिपादनमेव प्रायेणेह दृश्यत
इति भावः । स्यादेतत् वनानि पश्यन्नयं यो विवेकोपच्छन्नो मनो नाविद्यते इत्यादिमहाक
विप्रयोगे दर्शनं निवेदनामनीनानामपि लङ् लृनादिभिः संबन्धो दृश्यते स च कालबा

म

प०

२७७

धेऽपि समर्थनीयः इत्यनेन दर्शितमिदं सूत्रं तत्रयपर्यौ विषयेऽद्य इति लिङर्थे स्यैव बाधः किं न स्यात्
तत्राहि लिङं न वाचेति प्रधानानुरोधेन गुणस्य नयनेन तद्विपरीतमिति भावः येन प्रत्ययमान
विशेषकं बोधं स्वेच्छामात्रेण स्यात्क्रियाप्रधानमाख्यातमिति भाष्यवार्तिककारादिस
हार्दिवचोऽस्मृपेक्षितं तेनैषामपि दोषः प्रसज्येत उक्तानामन्येऽपि कारकप्रकरणे । स्यादेतत् व्यव
हारस्य विषये धात्वर्थस्याह्नते लक्षितेऽपि वा भूतभाविप्रत्ययार्थाः संबध्यन्ता यथायथं तथाहि अग्निष्टो
मयाजीति भूतप्रवर्तिनिः जनितेत्येतत्समभिव्याहारे तत्र स्थ्ये व्यवहारिष्यमाणः इति व्याहारो
स्त लक्षणार्थं एवं गोमानासीदित्यत्रापि ईदृग्व्यवहारविषय आसीदित्यर्थः अवश्यं चैतत्त
दभ्युपगन्तव्यं अन्यथाहि भाव्यहृतमासीदित्यत्र हृत्वरीत्याभाविशाहूस्य भूतकालत्वेन भाव्या
सीच्छब्दयोः पर्यायत्वाद्धर्मापत्त्या योगो न स्यात् तस्मादेतनावनेकालेभाविन्या व्यवहृते तदि
दानीमासीदिति तत्रार्थः एवं सर्वसामंजस्ये किं सूत्रेणेति चेत् मैवं प्रत्याहारलक्षणप्रपञ्च
क्लेशं विनैव प्रायशो निर्वाहार्थं सूत्रारंभात् नहि कश्चिदत्याहारादिकं प्रत्यापतनोति सर्व
त्र तत्स्वीकर्तुमुचितमिति दिक् । क्रियासमभिहारे० । अत्र यदि लोडिति षष्ठ्यंतेन तदादे
शादिष्टो लत्वेन वा चतध्वमोरिति वाक्यशेषात् तत्राहि लिङ्कशेषः स्थानित्वेनोपादीयते ।
तच्च एवं लोडादेशस्य लिङ्परत्वे सत्येव संगच्छते अन्यथा सामान्यविहितानां लिङ्गाहिस्वाभ्यं

उ०

२७
